SANSKRIT FIRST BOOK

[SUITED TO BEGINNERS]

COMPILED BY

PANDIT-KULAPATI JIBANANDA VIDYASAGARA B.A.

EDITED AND PUBLISHED WITH

ADDITIONS AND ALTERATIONS

BY

Pandit Ashubodha Vidyabhushana

AND

Pandit Nityabodha Vidyaratna.

संस्कृतशिक्षामञ्जरी ।

प्रथमभागः ।

पण्डितकुलपतिना

बि, ए, उपाधिधारिणा

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण

सङ्कलिता ।

तदात्मजाभ्यां

पण्डित श्रीआशुबोध विद्याभूषण

पण्डित श्रीनित्यबोध-विद्यारत्नाभ्यां

संस्कृता परिवर्द्धिता प्रकाशिता च ।

अष्टात्रिंशसंस्करणम्

कलिकातानगरे

वाचस्पत्ययन्त्रे

मुद्रिता ।

इं १९५० ।

 Price As. 4 only

To be had of :- Pandit Kulapati Jibananda Vidyasagara B.A.

Superintendent, Free Sanskrit College

2 *Ramanath Mazumdar Street, Amherst Street P. O. Calcutta*

संस्कृतशिक्षामञ्जरी ।

प्रथमभागः ।

स्वरवर्णाः ।

(*The Vowels.*)

अ	आ	इ	ई	उ	ऊ
অ	আ	ই	ঈ	উ	ঊ
ऋ	ॠ	ऌ	ए	ऐ	ओ
ঋ	ৠ	ঌ	এ	ঐ	ও
औ ।	ं	अं	ः अः	ँ	अँ ।
ঔ	ং	অং	ঃ অঃ	ঁ	অঁ ।

ह्रस्वाः स्वराः ।	दीर्घाः स्वराः ।	अयोगवाही ।
(*Short Vowels.*)	(*Long Vowels.*)	
अ, इ, उ, ऋ, ऌ ।	आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ ।	

स्वरसंयुक्त—व्यञ्जनवर्णाः ।

(*The Consonants.*)

कवर्गः,—क ख ग घ ङ ।

ক খ গ ঘ ঙ ।

चवर्गः,—च छ ज झ ञ ।

চ ছ জ ঝ ঞ ।

टवर्गः,—ट ठ ड ढ ण ।

ট ঠ ড ঢ ণ ।

तवर्गः,—त थ द ध न ।

ত থ দ ধ ন ।

पवर्गः,—प फ ब भ म ।

প ফ ব ভ ম ।

अन्तःस्थाः,—य र ल व ।

য র ল ব ।

ऊष्मवर्णाः,—श ष स ह ।

শ ষ স হ ।

ड़ ढ़ ।

ড় ঢ় ।

स्वरवर्ण-परिचय-परीक्षा।

ई ए अ ॠ आ औ

ऊ इ ऋ उ ऌ ऐ

ओ अँ अं अः।

व्यञ्जनवर्ण-परिचय-परीक्षा।

ख ठ फ ब ड

ढ ङ च ग ल

घ थ ण द ष

त न क य ध

प व स झ श

छ र ञ भ ट

ड़ म ह ज ढ़।

स्वररहितव्यञ्जनवर्णाः।

क् ख् ग् घ् ङ् इत्यादि।

सङ्ख्याः।

१ २ ३ ४ ५ ६ ७ ८ ९ ०

असंयुक्तवर्णयोजना।

अकारयोगः।

क् + अ = क। ख् + अ = ख।

अथ	अदः	अधः	ऋणम्।
करः	खलः	गणः	घनः।
चरः	छलम्	जवः	झषः।
तटः	तपः	तरलः	तलम्।
दरः	दश	दशमः	धनम्।
धमनम्	धरणम्	नखम्	नदः।
नयः	नरः	पचः	पटः।
पतनम्	पदम्	फणः	फलम्।
बधः	बलम्	भयम्	भवः।
मदः	मनः	मयः	मरणम्।
यजनम्	यतनम्	यमः	रणः।
रथः	रवः	रसः	लगनम्।
लपनम्	लवणम्	वकः	वचनम्।
वदनम्	वनम्	शठः	शपथः।
शमः	शशधरः	समः	समयः।
समरः	हठः	हयः	हसनम्।

स्वरवर्णानां योगे आकृतयः।

क का कि की कु कू कृ कॄ के कै को कौ कं कः।

आकारयोगः। आ = ा।

क् + आ = का। ख् + आ = खा।

आकारः	आकाशम्	आचारः	आभा।
उमा	ऊषा	एका	ऐरावतः।
कथा	खातः	गानम्	गायकः।
जाता	तातः	दया	दानम्।
धारकः	नाम	पाठः	भाजनम्।
माता	मानम्	माया	यातना।
यानम्	राजा	रामः	लता।
लालसा	शाकम्	सभा	हासः।

इकारयोगः। इ = ि।

क् + इ = कि। ख् + इ = खि।

इति	इषिका	उचितम्	एकिका।
ऐहिकम्	ओषधिः	औदरिकः	किरणः।
गतिः	गरिमा	जितम्	नतिः।
पतिः	पिता	बलिः	मितिः।
यमिता	रसिकः	हरिणः	हितम्।

ईकारयोगः। ई=ी।

क्+ई=की। ख्+ई=खी।

अलीकम्	आजीवनम्	इरावती	ईषीका।
उशीरम्	एणी	ऐशानी	औचिती।
कीचकः	गीतिः	जननी	तरणी।
तीरम्	दीपः	नदी	नीतिः।
पीड़ा	फणी	भीमः	मीनः।
रीतिः	लीनः	वीजम्	शशी।
शीतलम्	सखी	सीसकम्	हीनः।

उकारयोगः। उ= ु।

क्+उ=कु। ख्+उ=खु।

अगुरुः	आशु	इषुधिः	उडु।
ऋजुः	कुलम्	खुरः	गुरुः।
घुणः	चतुरः	बुधः	मुकुलः।
मुदितः	युयुधानः	शिशुः	सुखम्।

ऊकारयोगः। ऊ = ू।

क् + ऊ = कू। ख् + ऊ = खू।

अनूपम्	उलूकः	कूपः	कूलम्।
गूढः	तूणः	तूणीरः	टूनः।
धूमः	नूतनम्	पूतः	भूतम्।
भूषणम्	मूलम्	यूथिका	रूढः।
लूनम्	शूलम्	सूना	हूणः।

ऋकारयोगः। ऋ = ृ।

क् + ऋ = कृ। ख् + ऋ = खृ।

अमृतम्	आहृतः	ईदृशः	कृशः।
गृहम्	घृणा	तृषा	दृढः।
पृथक्	मृगः	मृतिः	वृषभः।
बृहत्	शृगालः	सृणिः	हृदयम्।

ॠकारयोगः। ॠ = ॄ।

क् + ॠ = कॄ। ख् + ॠ = खॄ।

जामातॄणाम्	धातॄणाम्	नॄणाम्।
पितॄन्	मातॄणाम्	यातॄणाम्।

एकारयोगः। ए = े।

क् + ए = के। ख् + ए = खे।

अशेषः	आदेशः	उपमेयः	एकेशः।
कलेवरम्	केशः	चेतना	जेता।
देशः	धेनुः	भेदः	मेषः।
शेषः	सेतुः	सेवा	हेम।

ऐकारयोगः। ऐ = ै।

क् + ऐ = कै। ख् + ऐ = खै।

कैलासः	जैनः	तैजसम्	तैलम्।
दैवम्	धैवतः	नैशः	पैतामहः।
भैरवः	मैनाकः	वैभवम्	शैलः।
शैवः	सैकतम्	हैमः	हैमवती।

ओकारयोगः। ओ = ो।

क् + ओ = को। ख् + ओ = खो।

कोपः	कोमलम्	गोपनम्	घोषणा।
दोषः	बोधः	भोगः	मनोयोगः।
मोचनम्	रोदनम्	लोचनम्	लोभः।
शोकः	शोभा	सहोदरः	होमः।

औकारयोगः। औ = ौ।

क + औ = कौ। ख + औ = खौ।

कौपीनम् गौरी चौरः दौवारिकः।
धौतम् नौका पौषः मौनम्।
यौवनम् रौरवः लौहम् सौरभम्।

अनुस्वारयोगः। ं।

क + ं = कं। ख + ं = खं।

अंशः अंशुः आशंसा कंसः।
मांसम् वंशः विंशतिः संशयः।
संसारः सिंहः हंसः हिंसा।

विसर्गयोगः। :।

क + : = कः। ख + : = खः।

अतः ऊर्ध्वः एषः दुःखम्।
दुःशीलः निःशेषः पुनःपुनः शिरःपीड़ा।

असंयुक्तवाक्योदाहरणम्।

प्रथमः पाठः।

गता रजनी।
ऊषा राजते।
शिशिरं शोभते।
शेफालिका पतिता।
बालकं जागरयति।
गायको गायति।
कोकिलः कूजति।
शुकः पठति।
रविः उदेति।
झटिति जागृहि।
वसनं परिधेहि।
पाठे मनो निवेशय।

द्वितीयः पाठः।

समीरणो वहति।
मेघो नदति।
तड़ित् विलसति।
शिशुः रोदिति।
शीतं भवति।
अधुना वसनावृतो भव।
किं पठसि?
अहं करोमि।
जलं पिब।
चिराय जीव।
अनृतं मा वद।
कथमिदं वहसि?

तृतीयः पाठः ।

पापं मा कुरु । परुषं मा वद ।
कोपं परिहर । विपदि धीरो भव ।
वेगेन मा धाव । अवहितः शृणु ।
न च दैवात् परं बलम् । हिंसा न विधेया ।
किंनामको भवान् ? मानवो भवति शतायुः ।
रोषो हि विषमो रिपुः । अपि कुशली भवान् ?

चतुर्थः पाठः ।

गुरवे नमः कुरु ।
गुरुभोजनं रोगमूलम् ।
मातापितरौ पूजनीयौ ।
गुरूपदेशं परिपालय ।
कदापि अनृतं मा वद ।
सः निजपाठे मनोयोगी ।
भवान् केवलं वृथा कालं नयति ।
अलसः वृथा कालं यापयति ।
परधने लोभो न करणीयः ।
एकाकी रहसि किमपि मा खादेः ।

पञ्चमः पाठः ।

लोभं परिहर । लोभेन समं पापं कुतः ? भवान् कदापि लोभं मा करोतु ।

सततं साधूनां समागमो विधेयः । साधु-समागमेन हि लोकः सुशीलो भवति । सुशीलः खलु यशसा चिरं राजते ।

परधनापहरणं दोषावहम् । यः चोरयति स जगति सकलैः अनादृतो भवति । भवान् कदापि चौराचारं मा करोतु ।

आजीवनं सुकृतनिरतो भव । सुकृतम् एव जनानाम् ऐहिक-पारलौकिक-सुख-साधनम् । तेन च हीनाः पशुभिः समानाः ।

दीनेषु दया विधेया । यः दीनेषु दयां करोति सः पूतमनाः भवति । मनसि पूते सकलं शुभं भवति । भवान् सततं दीनेषु दयां करोतु ।

संयुक्तवर्णाः।

ण-संयोगः।

ण् + ण = ण्ण। ष् + ण = ष्ण।

ग्ण—ग् + ण = ग्ण—रुग्णः।

ण्ण—ण् + ण = ण्ण—निषण्णः, विषण्णः।

ष्ण—ष् + ण = ष्ण—तृष्णा, सहिष्णुः।

ह्ण—ह् + ण = ह्ण—अपराह्णः।

उदाहरणम्।

रुग्णः विषण्णः भवति। बालः न सहिष्णुः। अपराह्णे जनः तृष्णाविरहितो मोदते।

न-संयोगः।

क् + न = क्न। ख् + न = ख्न।

क्न—क् + न = क्न—शक्नोति।

ग्न—ग् + न = ग्न—निमग्नः, अग्निः।

घ्न—घ् + न = घ्न—कृतघ्नः, विघ्नः।

त्न—त् + न = त्न—यत्नः, रत्नम्।

द्न—द् + न = द्न—मृद्नाति।

ध्न—ध् + न = ध्न—गृध्नुः।
न्न—न् + न = न्न—अन्नम्, अवसन्नः।
म्न—म् + न = म्न—निम्नगा, आम्नायः।
स्न—स् + न = स्न—स्नातकः, स्नायुः, स्नेहः।
ह्न—ह् + न = ह्न—चिह्नम्, वह्निः।

उदाहरणम्।

स यातुं शक्नुयात्। अग्निः दहति। संभग्नपदः दुःखेन वसति। रिपुघ्नः लभते महीम्। रत्नं गृह्णाति भेषजाय भिषक्। गृध्नुः दुःखसहिष्णुः। आम्नायवचनोपमम्। भोजनात् परं न स्नायात्। वह्निः शीतं निवारयति।

म-संयोगः।

क + म = क्म। ग + म = ग्म।

क्म—क् + म = क्म—रुक्मम्, रुक्मिणी।
ग्म—ग् + म = ग्म—तिग्मम्, वाग्मी।
ङ्म—ङ् + म = ङ्म—वाङ्मयम्, पराङ्मुखः।
ट्म—ट् + म = ट्म—कुड्मलम्।
ण्म—ण् + म = ण्म—हिरण्मयम्, षाण्मातुरः।

त्म—त् + म = त्म—आत्मा, आत्मीयः।

द्म—द् + म = द्म—छद्म, पद्मम्।

ध्म—ध् + म = ध्म—आध्मातः।

न्म—न् + म = न्म—जन्म, मृन्मयः, उन्मादः।

प्म—प् + म = प्म—पाप्मा।

म्म—म् + म = म्म—सम्मतिः, सम्मानः।

ल्म—ल् + म = ल्म—गुल्मः, जाल्मः।

श्म—श् + म = श्म—श्मशानम्, रश्मिः।

ष्म—ष् + म = ष्म—ऊष्मा।

स्म—स् + म = स्म—भस्म, स्मरणम्।

ह्म—ह् + म = ह्म—जिह्मः।

उदाहरणम्।

रुक्मं शोभनीयम्। छद्मना किमपि न करणीयम्। उषसि पद्मकुट्मलं विकसति। मौनं सम्मतिसूचकम्। गुरूणां सम्मानं कुरु। जाल्मः अश्मानमपि रत्नं मनुते। श्मशानकुसुमेन देवता न पूजनीया। ऊष्मणि आतपः तिग्मः भवति। जिह्मः कृतमुपकारं विस्मरति।

य-संयोगः।

य = ा। क + य = क्य।

का--क् + य = क्य—ऐक्यम्, चाणक्यः, वाक्यम्।

खा--ख् + य = ख्य--सख्यम्, आख्या, उपाख्यानम्।

गा—ग् + य = ग्य—भोग्यम्, योग्यता।

चा—च् + य = च्य—उदीच्यः, विवेच्यम्।

जा—ज् + य = ज्य—पूज्यः, ज्योतिः।

टा—ट् + य = ट्य—कापट्यम्, नैकट्यम्।

ठा—ठ् + य = ठ्य—पाठ्यम्, शाठ्यम्।

डा—ड् + य = ड्य—जाड्यम्, ताड्यमानः।

ढा—ढ् + य = ढ्य—आढ्यः।

णा—ण् + य = ण्य—पुण्यम्, महारण्यम्।

ता—त् + य = त्य—नित्यम्, सत्यम्, मृत्युः।

था—थ् + य = थ्य—अकथ्यम्, मिथ्या।

दा—द् + य = द्य—अद्य, सद्यः, विद्या।

धा—ध् + य = ध्य—अबाध्यः, असाध्यः।

ना—न् + य = न्य—मान्यम्, शून्यम्।

पा--प् + य = प्य--कुप्यम्, दीप्यम्, याप्यम्, रौप्यम्।

भा—भ् + य = भ्य—अभ्यासः, अभ्युदयः।

मा—म् + य = म्य—रम्यम्, वैषम्यम्।

य्य—य् + य = य्य—आतिशय्यम्, शय्या।

ल्य—ल् + य = ल्य—बाल्यम्, मूल्यम्, कल्याणम्।

व्य—व् + य = व्य—काव्यम्, तालव्यः, दिव्यम्, नव्यः।

श्य—श् + य = श्य—आवश्यकम्, श्यामः।

ष्य—ष् + य = ष्य—दूष्यम्, पोष्यम्, शोष्यम्।

स्य—स् + य = स्य—आलस्यम्, शस्यम्।

ह्य—ह् + य = ह्य—दाह्यम्, लेह्यम्, वाह्यम्।

उदाहरणम्।

सत्यमेव जयति। ततः सदा सत्यं वाक्यं कथनीयम्। यः सत्यं वदति, तेन महापुण्यं लभ्यते, तस्य मुख्यता च भवति। यः मिथ्या कथयति, स जघन्यः, लोकानां घृण्योऽपि भवति। भवान् कदाऽपि मिथ्या न कथयेत्।

विद्यया समं धनं नास्ति। वाङ्मयं गद्यं पद्यं वा भवति। नियतिः केन बाध्यते? रम्यं ... बहवति। शस्यं कुप्यमिव हृम्यम्।

र-संयोगः।

र = ्र। क् + र = क्र।

क्र—क् + र = क्र—वक्रः, क्रूरः, क्रोधः।

ग्र—ग् + र = ग्र—ग्रहणम्, ग्रामः, न्यग्रोधः।

घ्र—घ् + र = घ्र—व्याघ्रः, शीघ्रम्।

ज्र—ज् + र = ज्र—वज्रम्।

त्र—त् + र = त्र—गात्रम्, त्राणम्, त्रुटिः।

द्र—द् + र = द्र—द्रव्यम्, रौद्रम्, निद्रा।

ध्र—ध् + र = ध्र—गृध्रः, ध्रुवम्।

प्र—प् + र = प्र—प्रणयः, प्रायः।

ब्र—ब् + र = ब्र—ब्रध्नः, ब्राह्मणः

भ्र—भ् + र = भ्र—भ्रमिः, भ्रुकुटिः।

म्र—म् + र = म्र—आम्रः, नम्रः।

व्र—व् + र = व्र—व्रणः, व्रीड़ा।

श्र—श् + र = श्र—श्रमः, श्रवणम्, शुश्रूषा।

स्र—स् + र = स्र—सहस्रम्, स्रोतः।

ह्र—ह् + र = ह्र—ह्रदः, ह्रासः, ह्रेषा।

उदाहरणम् ।

क्रूरता परित्याज्या । क्रोधेन समः दोषः न विद्यते। वज्रं प्रहरणं शक्रस्य। प्रातः ब्रध्नः भ्राजते। क्रमेण नम्रो भवेत् । यः विद्याऽभ्यासे प्रतिदिनं परिश्रमं करोति, विद्या तस्य प्रसीदति ।

श्रमेण गात्रात् वारि स्रवति । व्याघ्राः हिंस्राः प्राणिनः । शैत्येन ग्रीष्मः ह्रसति ।

रेफ-संयोगः ।

र = ॅ । र् + क = र्क ।

र्ऋ—र् + ऋ = र्ऋ—नैर्ऋतः ।
र्क—र् + क = र्क—अर्कः, तर्कः, कर्कशः
र्ख—र् + ख = र्ख—मूर्खः ।
र्ग—र् + ग = र्ग—दुर्गः, विसर्गः ।
र्घ—र् + घ = र्घ--दीर्घः, महार्घः ।
र्च—र् + च = र्च—अर्चना, चर्चा ।
र्ज—र् + ज = र्ज—विसर्जनम् ।
र्झ—र् + झ = र्झ—निर्झरः ।

र्ण—र् + ण = र्ण—कर्णः, वर्णः।

र्थ—र् + थ = र्थ—अर्थः, व्यर्थः, समर्थः।

र्द—र् + द = र्द—कर्दमः, निर्दयः।

र्ध—र् + ध = र्ध—निर्धनः।

र्न—र् + न = र्न—दुर्नाम।

र्प—र् + प = र्प—शूर्पः, सर्पः, कर्पूरम्।

र्ब—र् + ब = र्ब—दुर्बलः, दुर्बोधः।

र्भ—र् + भ = र्भ—निर्भरम्, दुर्भावना।

र्म—र् + म = र्म—निर्माणम्।

र्ल—र् + ल = र्ल—दुर्लभः।

र्व—र् + व = र्व—खर्वः, गर्वः, सर्वः।

र्श—र् + श = र्श—दर्शनम्, परामर्शः।

र्ष—र् + ष = र्ष—अमर्षः, हर्षः, वर्षाः, मुमूर्षुः

र्ह—र् + ह = र्ह—गर्हितम्।

उदाहरणम्।

अर्कः सर्वं प्रकाशयति। साधुः सुरलोकं प्रार्थयते। कर्दमो हि वर्णं मलिनयति। गर्वं खर्वयति बली। अवर्षणे शस्यं महार्घं भवति।

ल-संयोगः।

क्+ल=क्ल। ग्+ल=ग्ल।

क्ल—क्+ल=क्ल—क्लमः, शुक्लः, क्लेशः।
ग्ल—ग्+ल=ग्ल—ग्लानं, ग्लानिः।
प्ल—प्+ल=प्ल—प्लावनम्, प्लुतम्।
म्ल—म्+ल=म्ल—अम्लं, म्लानम्।
ल्ल—ल्+ल=ल्ल—पल्लवः, कल्लोलः।
श्ल—श्+ल=श्ल—श्लाघा, श्लेषः, श्लोकः।
ह्ल—ह्+ल=ह्ल—आह्लादः।

उदाहरणम्।

लोकः क्लमेन सीदति। क्लेशः संजायते भृशम्। यः प्रत्यहं ग्लानिं नानुभवति, तस्य मतिः परिम्लाना न भवति। प्लवमानो म्लायते। आत्मश्लाघा न शोभते विदुषाम्। सदा आह्लादितेन भवितव्यम।

व-संयोगः।

व = ्व। क् + व = क्व।

क्व—क् + व = क्व—क्वणनम्, पक्वम्।

ज्व—ज् + व = ज्व—ज्वरः।

ट्व—ट् + व = ट्व—खट्वा।

ड्व—ड् + व = ड्व—प्राड्विवाकः।

त्व—त् + व = त्व—त्वरा, सत्वरम्।

द्व—द् + व = द्व—द्वारम्, द्वीपः, द्वेषः।

ध्व—ध् + व = ध्व—ध्वनिः, ध्वंसः।

न्व—न् + व = न्व—अन्वेषणम्।

ल्व—ल् + व = ल्व—उल्वणः, पल्वलम्।

श्व—श् + व = श्व—आश्वासः, निश्वासः, श्वेतः।

स्व—स् + व = स्व—स्वभावः, स्वादु, पयस्विनी।

ह्व—ह् + व = ह्व—आह्वानम्।

उदाहरणम्।

पक्वानि आम्रफलानि रम्याणि। पल्वल-जलेन संक्रामकः ज्वरः जायते, तत् तु सत्वरं

परिहरेत्। अश्ववत् सुस्वादु भोजनीयम्। अध्वनि स्वैरं यायात्। आह्वानं विना कुत्रापि मा व्रजेत्। गुरुजनं दूरात् न आह्वयेत्।

व्यञ्जनद्वयसंयोगः।

क्क—क्+क=क्क—चिक्कणम्, कुक्कुटः।
क्त—क्+त=क्त—आसक्तः, भक्तिः।
क्ष—क्+ष=क्ष—विचक्षणः, दीक्षा, परीक्षा।
ग्ध—ग्+ध=ग्ध—दुग्धं, मुग्धः।
ग्न—ग्+न=ग्न—भग्नः, मग्नः।
ङ्क—ङ्+क=ङ्क—कलङ्कः, शङ्का, अङ्कुरः।
ङ्ख—ङ्+ख=ङ्ख—शङ्खः, शृङ्खला।
ङ्ग—ङ्+ग=ङ्ग—भङ्गः, सङ्गः, अङ्गारः।
ङ्घ—ङ्+घ=ङ्घ—सङ्घः, लङ्घनम्।
च्च—च्+च=च्च—उच्चारणम्।
च्छ—च्+छ=च्छ—पुच्छः, आच्छादनम्।
ज्ञ—च्+ञ=ञ्च—याञ्चा।
ज्ज—ज्+ज=ज्ज—सज्जा, लज्जितः।

ज्झ—ज् + झ = ज्झ—कुज्झटिका, उज्झितः।

ज्ञ—ज् + ञ = ज्ञ—ज्ञानम्, प्रज्ञा।

ञ्च—ञ् + च = ञ्च—अञ्चलम्, चञ्चलः, सञ्चारः।

ञ्छ—ञ् + छ = ञ्छ—लाञ्छना, वाञ्छा।

ञ्ज—ञ् + ज = ञ्ज—अञ्जलिः, रञ्जितः, पञ्जी।

ञ्झ—ञ् + झ = ञ्झ—झञ्झा।

ट्ट—ट् + ट = ट्ट—अट्टः, अट्टालिका।

ड्ग—ड् + ग = ड्ग—खड्गः।

ड्ड—ड् + ड = ड्ड—उड्डीनः।

ण्ट—ण् + ट = ण्ट—कण्टकम्, घण्टा।

ण्ठ—ण् + ठ = ण्ठ—आकण्ठम्, लुण्ठनम्।

ण्ड—ण् + ड = ण्ड—खण्डम्, पण्डितः, गण्डूषः।

ण्ढ—ण् + ढ = ण्ढ—षण्ढः।

त्क—त् + क = त्क—चीत्कारः, फुत्कारः।

त्त—त् + त = त्त—सत्तमः, उत्तापः।

त्थ—त् + थ = त्थ—उत्थानम्, समुत्थितः।

द्ग—द् + ग = द्ग—मुद्गरः, उद्गारः।

द्घ—द् + घ = द्घ—उद्घाटना।

द्द—द् + द = द्द—उद्दामा, उद्देशः।

द्ध—द् + ध = द्ध—बद्धः, वृद्धः, सिद्धिः।

द्भ—द्+भ=द्भ—उद्भवः, सद्भावः।

न्त—न्+त=न्त—अन्तः, वृन्तम्, सन्तानः।

न्थ—न्+थ=न्थ—रोमन्थनम्, पन्थाः।

न्द—न्+द=न्द—मन्दिरम्, उन्दुरुः, सन्देहः।

न्ध—न्+ध=न्ध—अन्धः, सन्धानम्, बन्धुः।

प्त—प्+त=प्त—तृप्तः, दृप्तः, लिप्तः।

ब्ज—ब्+ज=ब्ज—अब्जम्, कुब्जः।

ब्द—ब्+द=ब्द—अब्दः, शब्दः।

ब्ध—ब्+ध=ब्ध—प्रारब्धम्, लुब्धः।

म्प—म्+प=म्प—कम्पः, झम्पः।

म्फ—म्+फ=म्फ—रम्फणम्।

म्ब—म्+ब=म्ब—अम्बरम्, अम्बा।

म्भ—म्+भ=म्भ—आरम्भः, गम्भीरम्।

ल्क—ल्+क=ल्क—शुल्कः, उल्का।

ल्ग—ल्+ग=ल्ग—वल्गनम्, फल्गुः।

ल्प—ल्+प=ल्प—अल्पः, कल्पः, जल्पनम्।

ल्भ—ल्+भ=ल्भ—प्रगल्भः।

श्च—श्+च=श्च—निश्चितम्, पश्चिमम्।

श्छ—श्+छ=श्छ—दुश्छेद्यः।

ष्क—ष्+क=ष्क—निष्कण्टकः, शुष्कः।

ष्टे—ष् + ट = ष्ट—निकृष्टम्, दृष्टिः, मुष्टिः।

ष्ठे—ष् + ठ = ष्ठ—कनिष्ठः, निष्ठा।

ष्प—ष् + प = ष्प—पुष्पम्।

ष्फ—ष् + फ = ष्फ—निष्फलता।

स्क—स् + क = स्क—यशस्करः, तिरस्कारः।

स्ख—स् + ख = स्ख—स्खलनम्।

स्त—स् + त = स्त—प्रस्तरः, हस्तः।

स्थ—स् + थ = स्थ—स्थितिः, स्थूलता।

स्प—स् + प = स्प—परस्परम्, वाचस्पतिः।

स्फ—स् + फ = स्फ—स्फटिकः, स्फीतिः।

उदाहरणम्।

नाहङ्कारात् परो रिपुः। कज्जलेन हि दृष्टिः प्रसाध्यते। मुक्तेर्हि कारणं ज्ञानम्। ज्वराऽऽदौ लङ्घनं पथ्यम्। भस्मनि फुत्कारो न देयः। यादृशी भावना यस्य सिद्धिर्भवति तादृशी। सन्तोषमूलं हि सुखम्। महाजनो येन गतः स पन्थाः। सत्यं शिवं सुन्दरम्। शरीरं व्याधि-मन्दिरम्। बन्धुत्वं दुर्लभं रत्नम्। अशक्तस्तस्करः साधुः। भ्रातृभिः परस्परं सद्भावो रक्षणीयः।

व्यञ्जनत्रयसंयोगः।

क्ष्ण—क्+ष्+ण=क्ष्ण—तीक्ष्णता।

क्ष्म—क्+ष्+म=क्ष्म—सूक्ष्मः, लक्ष्मीः।

क्ष्य—क्+ष्+य=क्ष्य—लक्ष्यम्।

ग्ध्व—ग्+ध्+व=ग्ध्व—जग्ध्वा।

ङ्क्र—ङ्+क्+र=ङ्क्र—चङ्क्रमणम्, सङ्क्रामकः।

ङ्क्ष—ङ्+क्+ष=ङ्क्ष—आकाङ्क्षा।

ङ्ख्य—ङ्+ख्+य=ङ्ख्य—सङ्ख्या।

च्छ्व—च्+छ्+व=च्छ्व—उच्छ्वासः।

ज्ज्व—ज्+ज्+व=ज्ज्व—उज्ज्वलः।

त्त्र—त्+त्+र=त्त्र—क्षत्त्रम्, पुत्त्रः।

त्त्व—त्+त्+व=त्त्व—महत्त्वम्, सत्त्वम्।

त्म्य—त्+म्+य=त्म्य—दौरात्म्यम्, माहात्म्यम्।

न्त्र—न्+त्+र=न्त्र—निमन्त्रणम्, यन्त्रम्।

न्त्व—न्+त्+व=न्त्व—सान्त्वना।

न्द्र—न्+द्+र=न्द्र—चन्द्रः, सान्द्रः, इन्द्रियम्।

न्द्व—न्+द्+व=न्द्व—द्वन्द्वम्।

न्ध्य—न्+ध्+य=न्ध्य—वन्ध्या, सन्ध्या।

न्न्य—न्+न्+य=न्न्य—सन्न्यासः।

प्त्व—प्+त्+व=प्त्व—तप्त्वा।

म्प्र—म्+प्+र=म्प्र—साम्प्रतम्।

म्भ्र—म्+भ्+र=म्भ्र—सम्भ्रमः।

र्क्ष—र्+क्+ष=र्क्ष—असूर्क्षणम्, तार्क्ष्यः।

र्च्च—र्+च्+च=र्च्च—अर्च्चना, चर्च्चा।

र्च्छ—र्+च्+छ=र्च्छ—मूर्च्छना, मूर्च्छा।

र्ज्ज—र्+ज्+ज=र्ज्ज—आर्ज्जवम्, गर्ज्जितम्

र्त्त—र्+त्+त=र्त्त—आर्त्तः, शीतार्त्तः।

र्द्द—र्+द्+द=र्द्द—कर्द्दमः, निर्द्दशः।

र्द्ध—र्+द्+ध=र्द्ध—अर्द्धम्, निर्द्धारणम्।

र्द्र—र्+द्+र=र्द्र—आर्द्रः।

र्म्म—र्+म्+म=र्म्म—धर्म्मः, वर्म्म, निर्म्मलम्।

र्य्य—र्+य्+य=र्य्य—आर्य्यः, कार्य्यम्, धार्य्यम्

र्व्व—र्+व्+व=र्व्व—गर्व्वः, पर्व्वतः।

र्श्व—र्+श्+व=र्श्व—पारिपार्श्विकः।

ष्ट्र—ष्+ट्+र=ष्ट्र—उष्ट्रः, राष्ट्रम्।

ष्प्र—ष्+प्+र=ष्प्र—दुष्प्रवेशः, निष्प्रयोजनम्।

स्त्र—स्+त्+र=स्त्र—वस्त्रम्, शास्त्री।

स्थ्य—स्+थ्+य=स्थ्य—स्वास्थ्यम्।

उदाहरणम्।

महत्त्वस्य लक्षणं दया। उदिते चन्द्रे यास्यामि। शैशवे विद्यामुपार्ज्जयेत्। आतुरे करुणा कर्त्तव्या। यत् कर्त्तव्यं, तदद्यैव। कीर्त्तिर्यस्य स जीवति। नाऽऽर्द्रपादः शयीत। अहिंसा परमो धर्म्मः। शरदि नभो निर्म्मलं जायते। आर्य्यचरितमनुकरणीयम्। अनभ्यस्ता विद्या कार्य्यकाले न स्फुरति। स्वास्थ्यरक्षां विना देहपुष्टिः न जायते।

व्यञ्जनचतुष्टयसंयोगः।

र्क्ष्य—र्+क्+ष्+य=र्क्ष्य—तार्क्ष्यः।

र्द्ध्न—र्+द्+ध्+न=र्द्ध्न—मूर्द्ध्ना, मूर्द्ध्नि।

र्द्ध्व—र्+द्+ध्+व=र्द्ध्व—ऊर्द्ध्वम्।

र्म्म्य—र्+म्+म्+य=र्म्म्य—धर्म्म्यम्, हर्म्म्यम्।

उदाहरणम्।

तार्क्ष्यो हि अहिमर्द्दनः। स्वभावः मूर्द्ध्नि वर्त्तते। ऊर्द्ध्वमुखम् अध्वा न गन्तव्यः। धर्म्म्येण वृत्तेन उपायाः फलन्ति।

षष्ठः पाठः।

क्रोधं मा कार्षीः। नद्यादौ नैव सन्तरेः।
कालो हि दुरतिक्रमः। वाणिज्ये वर्द्धते लक्ष्मीः।
आलस्यं यत्नेन वर्ज्जयेत्। शठे शाठ्यं समाचरेत्।
पाप्मनः विरतो भवेत्। आत्मानं सततं रक्षेत्।
श्रेयांसि बहुविघ्नानि। चन्द्रे कलङ्को दृश्यते।

विल्वे पक्के काकस्य किम्?

प्राणात्ययेऽपि न मिथ्या भाषेत।

वर्षासु नादेयं नीरं नाऽऽदेयम्।

ग्रीष्माऽऽगमे रविः खरतरो भवति।

मूर्खाः सदा दुःखम् अनुभवन्ति।

कूपोदकं ग्रीष्मे शीतलम् अनुभूयते।

पराऽऽत्मनः परं पदं गवेष्यताम्।

ईश्वरस्य माहात्म्यं सदैव कीर्त्तनीयम्।

सदुपायेन धनोपार्ज्जनं हि सुखाय भवति।

आशा हि परमं दुःखं, नैराश्यं परमं सुखम्।
पुत्रे यशसि तोये च नराणां पुण्यलक्षणम्।

सप्तमः पाठः।

चत्वारः वेदाः। यथा,—ऋक्, यजुः, साम, अथर्वा च। ऋग्वेदस्य एकविंशतिः शाखाः। यजुषः शतं शाखाः। साम्नः सहस्रं शाखाः। अथर्वणश्च नव शाखाः।

पञ्च विषयाः। यथा—रूपं, रसः, गन्धः, शब्दः, स्पर्शः च। तत्र रूपं चक्षुषः विषयः, रसः जिह्वायाः, गन्धः नासिकायाः, शब्दः कर्णस्य, स्पर्शः त्वचः।

पञ्च बाणाः। तन्नामानि यथा,—सम्मोहनः, उन्मादनः, शोषणः, तापनः, स्तम्भनश्चेति।

समुद्राः सप्त। यथा,—लवणः, इक्षुः, सुरा, सर्पिः, दधि, दुग्धं, स्वादुजलः।

वाराः सप्त। यथा,—रविः, सोमः, मङ्गलः, बुधः, बृहस्पतिः, शुक्रः, शनैश्चरः इति। एते सप्त राहुः केतुश्चेति नव ग्रहाः।

अष्टौ वसवः। यथा,—धरः, ध्रुवः, सोमः, विष्णुः, अनिलः, अनलः, प्रत्यूषः, प्रभासश्च।

इन्द्रियाणि दशसङ्ख्यकानि। तत्र चक्षुः,

कर्णः, नासिका, जिह्वा, त्वक् च इति पञ्च ज्ञानेन्द्रियाणि। मनोऽपि ज्ञानेन्द्रियम् इति केचित्। हस्तौ, पादौ, पायुः, उपस्थः, वाक् चेति पञ्च कर्म्मेन्द्रियाणि।

तत्र दर्शनेन्द्रियं चक्षुः, श्रवणेन्द्रियं कर्णः, घ्राणेन्द्रियं नासिका, रसनेन्द्रियं जिह्वा, स्पर्शेन्द्रियं त्वक्।

एकचक्षुर्हीनः काणः, चक्षुर्द्वयविहीनः अन्धः, श्रवणशक्तिहीनः बधिरः, घ्राणहीनः विख्यः विघ्रो वा, विकलैकपात् खञ्जः, विकलपादद्वयः पङ्गुः, उन्नतपृष्ठः कुब्जः, स्थूलोदरः लम्बोदरः तुन्दिलः वा।

मासाश्च द्वादश। यथा,—वैशाखः, ज्यैष्ठः, आषाढ़ः, श्रावणः, भाद्रः, आश्विनः, कार्त्तिकः, अग्रहायणः मार्गशीर्षो वा, पौषः, माघः, फाल्गुनः, चैत्रश्चेति।

राशयः द्वादश। यथा,—मेषः, वृषः, मिथुनम्, कर्कटः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनः इति। ते च वैशाखाऽऽदिषु क्रमेण रविसञ्चारविषयाः।

यथा,—वैशाखे मेषः, ज्यैष्ठे वृषः, इत्यादिक्रमेण बोद्धव्याः।

तिथयः पञ्चदश। यथा,—प्रतिपत्, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्द्दशी, पूर्णिमा अमावस्या वा।

सप्तविंशतिः नक्षत्राणि। यथा,—अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशिराः, आर्द्रा, पुनर्व्वसुः, पुष्या, अश्लेषा, मघा, पूर्वफल्गुनी, उत्तरफल्गुनी, हस्ता, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूला, पूर्वाषाढ़ा, उत्तराषाढ़ा अभिजित् वा, श्रवणा, धनिष्ठा, शतभिषा, पूर्वभाद्रपदः, उत्तरभाद्रपदः, रेवती इत्येतानि।

अष्टमः पाठः।

दिङ्‌निर्णयः।

दिशो हि दश। यस्यां सूर्य्यः उदेति, सा पूर्व्वा प्राची वा। तां पूर्व्वां दिशम् अभिमुखी-

कृत्य यदि कश्चित् दण्डायमानो भवति, तदा तस्य दक्षिणः हस्तः यस्यां दिशि तिष्ठति, सा दक्षिणा अवाची वा। वामस्तु यस्यां वर्त्तते, सा उत्तरा उदीचो वा दिक्। तस्य जनस्य पश्चाद्वर्त्तिनी दिक् पश्चिमा प्रतीची वा।

पूर्व-दक्षिणयोः मध्यवर्त्तिनी या दिक्, सा आग्नेयी, अग्निकोणश्च। एवं दक्षिण-पश्चिमयोः मध्यस्था नैर्ऋती, पश्चिमोत्तरमध्यस्था वायवी, एवम् उत्तर-पूर्वमध्यस्था ऐशानी दिक्। मस्तकोपरिस्था या, सा ऊर्द्ध्वा, पदतलस्था अधः। एवं दिशो दश। तासु पूर्व-दक्षिण-पश्चिमोत्तराः इति चतस्रो दिशः। अग्नि-नैर्ऋत-वाय्वीशानसंज्ञाः चतस्रः विदिशः कोणाश्च।

नवमः पाठः।

कालपरिमाणम्।

अनुपलः—नेत्र-निमीलनपरिमितः अतिसूक्ष्मकालः। अनुपलानां षष्ट्या एकः विपलः। विपलानाञ्च षष्ट्या एकं पलम्। तस्यापरं

नाम विघटिका। पलानां षष्ट्या एकः दण्डः। सार्द्धसप्तभिः दण्डैः एकः प्रहरः यामो वा। अष्टाभिश्च प्रहरैः अहोरात्रः।

सप्तभिः दिवसैः सप्ताहः कथ्यते। पञ्चदशभिः अहोरात्रैः एकः पक्षः।

पक्षश्च द्विविधः, शुक्लः; कृष्णश्चेति। यस्मिन् पक्षे चन्द्रकला वर्द्धते, स शुक्लः, यत्र ह्रसति, स कृष्णः। द्वाभ्यां पक्षाभ्याम् एकः मासः। शुक्ल-प्रतिपदादिदर्शान्तः त्रिंशत्तिथ्यात्मकः चान्द्रः मासः; दिनानां त्रिंशता च सौरः मासः।

द्वाभ्यां मासाभ्याम् एकः ऋतुः। ऋतवः षट्सङ्ख्यकाः। यथा,—अग्रहायण-पौषौ हेमन्तः। माघ-फाल्गुनौ शिशिरः। चैत्र-वैशाखौ वसन्तः। ज्यैष्ठाऽऽषाढौ ग्रीष्मः। श्रावण-भाद्रौ वर्षाः। आश्विन-कार्त्तिकौ शरत्। केचित्तु वैशाख-ज्यैष्ठौ ग्रीष्मः इत्यादिक्रमेण गणयन्ति। मतान्तरे तु— कार्त्तिकाग्रहायण-पौष-माघाः शीतः। फाल्गुन-चैत्र-वैशाख-ज्यैष्ठाः ग्रीष्मः। आषाढ़-श्रावण-भाद्राऽऽश्विनाः वर्षाः, इति त्रिविधाः ऋतवः। द्विविधश्च यथा,—कार्त्तिकाऽऽदयः षट् मासाः

शीतर्त्तुः । वैशाखाऽऽदयः षट् मासाः ग्रीष्मः इति ।

षड्भिश्च मासैः एकम् अयनम् । माघ-फाल्गुन-चैत्र-वैशाख-ज्यैष्ठाऽऽषाढैः षड्भिः मासैः सूर्य्यस्य उत्तरम् अयनम् (उत्तरायणम्) । श्रावण-भाद्राऽऽश्विन-कार्त्तिकाग्रहायण-पौषैः षड्भिश्च दक्षिणम् अयनम् (दक्षिणायनम्) ।

उक्तैश्च द्वादशभिः मासैः एको वत्सरो भवति ।

दशमः पाठः ।

शश-कूर्म्मयोः ।

"दर्पेण पतनं नूनं भविष्यति भविष्यति ।"

एकः शशकः केनचित् कच्छपेन सह मैत्रीम् अकरोत् । शशकः उत्प्लुत्य उत्प्लुत्य द्रुतं गच्छति, कूर्मस्तु शनैः शनैः व्रजति; तेन च शशकः सर्वदा कच्छपम् अभिलक्ष्य उपहसति । असौ कच्छपः एकदा शशकस्य उपहासम् आकर्ण्य सस्मितम् आह,—"भ्रातः ! अलं कथया, दिवसमेकं स्थिरीकुरु ; तस्मिन् दिने स्थानमेकं उद्दिश्यम्

आवां गमिष्यावः। कः तत्र प्रथमं यातुं शक्नुयात्, तत्प्रत्यक्षं भविष्यति"।

शशकः तत् श्रुत्वा आह,—"अलं दिनान्तरेण, अद्यैव भवतु। तदेतत् प्रत्यक्षीभूतं भविष्यति, कतर-स्तावत् आवयोः अधिकं चलितुं समर्थः" इति।

इत्यवधार्य्य शुष्कतरुतलमेकं लक्ष्यीकृत्य तौ द्वौ अपि युगपत् एकतः चलितुम् आरब्धवन्तौ। कूर्मः धीरगामी, किन्तु सः अविश्रान्तं चचाल। शशकस्तु अतिद्रुतं धावति, ततः जाताभिमानः स इदं व्यचिन्तयत् यत्,—"कच्छपः यादृगेव द्रुतं चलतु, अहन्तु तत्पूर्वमेव तत्स्थानं प्राप्स्यामि"।

इति निश्चित्य शशकः कियद्दूरं द्रुतं गत्वा क्वचित् वृक्षतले शीतलच्छायायां निद्रितः। ततः उत्थाय यावत् असौ निर्णीतस्थानं गतवान्, तावत् तत्र उपविष्टं कच्छपं दृष्ट्वा परं विस्मयम् अवाप।



शशकः *** परं विस्मयम् अवाप।

उपदेशः ;—यः हि किमपि कार्य्यं समारभ्य न विरमति, स कच्छपवत् स्वल्पेनापि कालेन तस्य अन्तं गच्छति, अतः अविश्रान्तम् अध्यवसायः कर्त्तव्य इति।

एकादशः पाठः।

सिंह-मूषिकयोः।

"उपकृताः क्षुद्रा अपि प्रत्यपकर्त्तुं शक्नुवन्ति"।

कस्मिंश्चित् पर्वते विकटदंष्ट्रो नाम कश्चित् सिंहः प्रतिवसति स्म। स च एकदा आतपक्लिष्टः तस्यैव गुहायां सुखेन निद्रां ययौ। तत्र च एकः मूषिकः अपि आसीत्। स इतस्ततः विचरन् दैवयोगात् यावत् तस्य सिंहस्य आस्यसमीपं गतः, तावदेव असौ तच्छ्वासवायुना आकृष्टः तस्यैव नासिकारन्ध्रं प्रविवेश। सिंहस्तु तत्-क्षणमेव उत्थाय यावत् क्षुवति, तावत् मूषिकः वहिर्निःसृतः; दृष्ट्वा च तम् अतीव क्रुद्धः सन् नखराऽऽघातेन हन्तुम् अचेष्टत।

अथैनं नखरप्रहारेण विनाशयितुम् उद्यतं दृष्ट्वा मूषिकः भयेन कृताञ्जलिः सविनयम् इदम् आह,—"देव! भवान् पशूनां राजा, अहन्तु

क्षुद्रः प्राणी ; मादृशानां क्षुद्रजन्तूनां विनाशे भवतः एव कलङ्कः भविष्यति । विशेषतश्च नाहम् अपराधी ;



मूषिकः *** नाहम् अपराधी ।

भवतः एव श्वासवायुना समाकृष्टः नासिकां प्रविष्टः" । सिंहः तद्वचनं श्रुत्वा दयापरवशः सन् मूषिकं तत्याज ।

अथ एकदा असौ सिंहः अरण्यानीमध्ये आहारान्वेषणार्थं परिभ्रमन् कस्यचित् व्याधस्य जालेन निबद्धो बभूव । सिंहस्तु बहुशश्चेष्टमानोऽपि यदा तत् जालं छेत्तुं न शशाक, तदा आत्मत्राणासमर्थतया महाक्रुद्धः सन् समग्रम् अरण्यं कम्पयन्निव गर्ज्जितुम् आरेभे ।

असौ विकटदंष्ट्रः सिंहः प्राक् यस्य मूषिकस्य प्राणरक्षां चकार, स तदा तत्रैव वनोद्देशे विचरन् आत्मनः प्राणदातुः स्वरम् अभिज्ञाय सत्वरं तत्र आजगाम ; आगत्य च कृतोपकारम् अनुस्मरन् अविलम्बेन स्वदशनाग्रैः तस्य जालं चिच्छेद । ततश्च सिंहो जालमुक्तः स्वच्छन्दं स्वस्थानं प्रस्थितः ।

उपदेशः ;—अभिसन्धिं विहाय यदि दया क्रियते, तदा सा निष्फला न भवति ।

द्वादशः पाठः ।

स्वास्थ्यपालनविधिः ।

धर्म्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।
तान् निघ्नता किं न हतं, रक्षता किं न रक्षितम् ? ॥ १ ॥
ब्राह्मे मुहूर्त्ते बुध्येत स्वस्थो रक्षार्थमायुषः ।
आयुष्यमुषसि प्रोक्तं मलाऽऽदीनां विसर्ज्जनम् ॥ २ ॥
दन्तस्य धावनं कृत्वा व्यायाममपि सञ्चरेत् ।
शक्त्यर्द्धेन च कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा ॥ ३ ॥
कुक्षौ ललाटे ग्रीवायां यदा घर्म्मः प्रवर्त्तते ।
शक्त्यर्द्धं तं विजानीयात् यावदुच्छ्वासमेव च ॥ ४ ॥
प्रातराशश्च कर्त्तव्यः पाठाभ्यासो यथाक्रमम् ।
ततः स्नानं प्रकुर्वीत भोजनञ्च ततश्चरेत् ॥ ५ ॥

प्रातराशि त्वजीर्णे तु सायमाशी न दुष्यति ।
सायमाशि त्वजीर्णे तु प्रातर्भुक्तं विषोपमम् ॥ ६ ॥
अध्यशनं न कर्त्तव्यं न चापि गुरुभोजनम् ।
षड्रसान्वितस्वाद्वन्नं कदुष्णं शुचि भोजयेत् ॥ ७ ॥
अर्द्धन्तु पूरयेदन्नैः तदर्द्धन्तु जलेन वै ।
वायोः सञ्चरणार्थाय तुरीयमवशेषयेत् ॥ ८ ॥
आदौ लवण-तिक्तौ च मध्ये कटु-कषायकौ ।
अम्लेन पूरणं कुर्य्यात् मधुरेण समापयेत् ॥ ९ ॥
फलानां भोजनं शस्तं भोजनान्तेऽपराह्णके ।
व्यायामो वायुसेवा च सायाह्नेऽपि प्रशस्यते ॥ १० ॥

त्रयोदशः पाठः ।

सुभाषितानि ।

विद्या ।

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्य्यत्वात् अनर्घ्यत्वात् अक्षयत्वाच्च सर्वदा ॥ १ ॥
ज्ञातिभिर्वण्ट्यते नैव, चौरेणापि न नीयते ।
दानेन न क्षयं याति, विद्यारत्नं महाधनम् ॥ २ ॥
विद्या ददाति विनयं, विनयात् याति पात्रताम् ।
पात्रत्वात् धनमाप्नोति, धनात् धर्म्मं ततः सुखम् ॥ ३ ॥
अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत् ॥ ४ ॥
विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ५ ॥

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ६ ॥
प्रथमे नार्ज्जिता विद्या, द्वितीये नार्ज्जितं धनम् ।
तृतीये नार्ज्जितं पुण्यं, चतुर्थे किं करिष्यति ? ॥ ७ ॥
पुस्तकस्था तु या विद्या, परहस्तगतं धनम् ।
कार्य्यकाले समुत्पन्ने न सा विद्या, न तद्धनम् ॥ ८ ॥

विद्याऽर्ज्जनोपायः ।

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थी नोपपद्यते ॥ ९ ॥

सत्यभाषिता ।

सत्यवाक्यं सदा ब्रूयात् न तु मिथ्या कदाचन ।
मिथ्यावादी सदा सर्वैः सर्वत्र परिभूयते ॥ १० ॥
अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेधसहस्रात् हि सत्यमेवातिरिच्यते ॥ ११ ॥

नीतिः ।

मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥ १२ ॥
षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ १३ ॥
विषं चङ्क्रमणं रात्रौ, विषं व्याधिरवीक्षितः ।
दुरधीता विषं विद्या, अजीर्णे भोजनं विषम् ॥ १४ ॥

सत्सङ्गः ।

त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम् ॥ १५ ॥
हीयते हि मतिस्तात ! हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥ १६ ॥

सदाचारः।

बालको यदि वा वृद्धो युवा वा गृहमागतः।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः॥ १७॥
परहिंसां परद्रव्यं परीवादं परस्य च।
परिहासं गुरोः स्थाने चापल्यं परिवर्ज्जयेत्॥ १८॥
गुरोर्यत्र परीवादः निन्दा वाऽपि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥ १९॥

उद्यमः।

कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः।
सर्वेषां मूर्द्ध्नि वा तिष्ठेत् विशीर्य्येत वनेऽथवा॥ २०॥
उद्यमेन हि सिध्यन्ति कार्य्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ २१॥

वञ्चना, कृतघ्नता, विश्वासघातकता।

उपकारस्य विस्मर्त्ता कृतघ्नः, वञ्चनापरः।
वञ्चकः, कृतयाथार्थ्यः शठ इत्यभिधीयते॥ २२॥
सद्भावप्रतिपन्नानां वञ्चने का विदग्धता?।
अङ्कमारुह्य सुप्तं तु हत्वा किं नाम पौरुषम्?॥ २३॥
सेतुबन्धे समुद्रे च गङ्गासागरसङ्गमे।
ब्रह्महा मुच्यते पापात्, मित्रद्रोही न मुच्यते॥ २४॥
मित्रद्रोही कृतघ्नश्च यश्च विश्वासघातकः।
त्रयस्ते नरकं यान्ति यावच्चन्द्रदिवाकरौ॥ २५॥

दुर्ज्जनता।

दुर्ज्जनः परिहर्त्तव्यो विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः?॥ २६॥
सर्पः क्रूरः खलः क्रूरः सर्पात् क्रूरतरः खलः।
मन्त्रौषधिवशः सर्पः, खलः केन निवार्य्यते?॥ २७॥

चतुर्द्दशः पाठः ।

नाना ज्ञातव्यविषयाः ।

श्रोत्रियः ।

जन्मना ब्राह्मणो ज्ञेयः, संस्कारैर्द्विज उच्यते ।
विद्यया याति विप्रत्वं, त्रिभिः श्रोत्रिय उच्यते ॥ १ ॥

धर्म्माधिकरणम् ।

धर्मशास्त्रानुसारेण अर्थशास्त्रनिरूपणम् ।
यत्राधिक्रियते स्थाने धर्माधिकरणं हि तत् ॥ २ ॥

धर्म्माधिकारी ।

समः शत्रौ च मित्रे च सर्वशास्त्रे विशारदः ।
विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत् ॥ ३ ॥

त्रिविधस्य ऋणस्य शोधनविधिः ।

ऋणं देवस्य यागेन, ऋषीणां दानकर्म्मणा ।
सन्तत्या पितृलोकानां शोधयित्वा परिव्रजेत् ॥ ४ ॥

पञ्च पितरः ।

अन्नदाता भयत्राता यस्य कन्या विवाहिता ।
जनिता चोपनेता च पञ्चैते पितरः स्मृताः ॥ ५ ॥

बाणपुष्पाणि ।

अरविन्दमशोकञ्च शिरीषं चूतमुत्पलम् ।
पञ्चैतानि प्रकीर्त्यन्ते पञ्चबाणस्य सायकाः ॥ ६ ॥

षडङ्गानि ।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गणः ।
छन्दसां विचितिश्चैव षडङ्गो वेद उच्यते ॥ ७ ॥

सप्त मातरः।

आत्ममाता गुरोः पत्नी ब्राह्मणी राजपत्निका।
गवी धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः॥ ८॥

वर्षपर्वताः।

हिमवान् हेमकूटश्च निषधो मेरुरेव च।
श्वेतो नीलश्च शृङ्गी च सप्तैते वर्षपर्वताः॥ ९॥

कुलपर्वताः।

महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः।
विन्ध्यश्च पारिपात्रश्च सप्तैते कुलपर्वताः॥ १०॥

महाद्वीपाः।

जम्बुप्लक्षाऽऽह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज!।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः॥ ११॥

अष्टविभूतिः।

अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥ १२॥

द्वादश सूर्य्याः।

विवस्वानर्य्यमा पूषा त्वष्टा च सविता भगः।
धाता विधाता वरुणो मित्रः शक्रुरुक्रमः॥ १३॥

अष्टादश विद्याः।

सषड़ङ्गा चतुर्वेदो मीमांसा न्यायविस्तृतिः।
आयुर्वेदो धनुर्वेदो गान्धर्वमर्थशासनम्।
पुराणं धर्मशास्त्रञ्च विद्या अष्टादश स्मृताः॥ १४॥

ब्रह्मावर्त्तः।

सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्।
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते॥ १५॥

आर्य्यावर्त्तः।

आ समुद्रात्तु वै पूर्व्वादा समुद्राच्च पश्चिमात्।
हिमवद्विन्ध्ययोर्मध्यमार्य्यावर्त्तं प्रचक्षते॥ १६॥

आर्य्यः।

कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्।
तिष्ठति प्रकृताऽऽचारे स वा आर्य्य इति स्मृतः॥ १७॥

पञ्चदशः पाठः।

अथ कारकम्।

क्रियानिमित्तं कारकम्। कारकाणि षट्। यथा,—कर्त्ता, कर्म्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणञ्चेति।

कर्त्ता।

यः कार्य्यं करोति, स कर्त्ता। यथा,—रामः गच्छति। स च द्विविधः,—प्रयोज्यकर्त्ता, प्रयोजककर्त्ता च। प्रयोज्यकर्त्ता यथा,—रामः गच्छति इत्यादौ रामादिः। तमेव प्रयोज्य-कर्त्तारं यः कर्म्मणि नियोजयति स प्रयोजककर्त्ता। यथा,—श्यामः रामं गमयति इत्यादौ श्यामादिः।

कर्म्म।

कर्त्ता यत् क्रियते, तत् कर्म्म। यथा,—अन्नं पचति। कर्म त्रिविधं,—निर्व्वर्त्त्यं, विकार्य्यं, प्राप्यञ्चेति। तत्र निर्व्वर्त्त्यं नाम,—यत्र केवलं विकृतिवाचकशब्दस्य प्रयोगः। यथा,—कुण्डलं करोति। विकार्य्यं नाम,—यत्र प्रकृतिवाचकस्य विकृतिवाचकस्य च द्वयोरेव प्रयोगः। यथा,—सुवर्णं कुण्डलं करोति। यत्र तु प्रकृति-विकृतिभावो नास्ति, तत् प्राप्यम्। यथा,—सूर्य्यं पश्यति इत्यादि।

करणम्।

येन च साधनेन कर्त्ता कार्य्यं निष्पादयति, तत् करणम्। यथा,—काष्ठेन अन्नं पचति। अत्र काष्ठं करणम्।

सम्प्रदानम्।

यस्मै ददाति, तत् सम्प्रदानम्। यथा,—याचकाय धनं ददाति। अत्र याचकः सम्प्रदानम्।

अपादानम्।

यस्मात् विभागः, भयं, नियमतो विद्याग्रहणं वा, तत् अपादानम्। क्रमेण यथा,—वृक्षात् पत्रं पतति। व्याघ्रात् बिभेति। गुरोः विद्यां गृह्णाति इत्यादि।

अधिकरणम्।

आधारोऽधिकरणम्। स च त्रिविधः। यथा,—एकदेशः, अभिव्यापकः, विषयश्च। क्रमेण यथा,—वने वसति, वनैकदेशे इत्यर्थः। तिलेषु तैलं, तिलान् व्याप्य इत्यर्थः। पुस्तके ज्ञानं, पुस्तकविषये इत्यर्थः।

अथ विभक्तिः।

संख्या-कारकयोः बोधिका विभक्तिः। सा द्विविधा।—नामविभक्तिः, धातुविभक्तिश्च। प्रथमाऽऽदिसप्तमीपर्य्यन्ताः सप्त नामविभक्तयः। तत्र उक्ते कारके प्रथमा, कर्मणि द्वितीया, करणे कर्त्तरि च तृतीया, सम्प्रदाने चतुर्थी, अपादाने पञ्चमी, सम्बन्धे षष्ठी, अधिकरणे च सप्तमी विभक्तिः।

अथ समासः ।

समर्थानामेकपदीभावः समासः। स च प्रधानतः षड्विधः। यथा,—अव्ययीभावः, तत्पुरुषः, कर्मधारयः, द्विगुः, बहुव्रीहिः, द्वन्द्वश्च ।

अव्ययीभावः ।

अव्ययपूर्वपदः पूर्वपदार्थप्रधानः समासः अव्ययीभावः। यथा,—उपकुम्भम्, यथारुचि इत्यादि ।

तत्पुरुषः ।

द्वितीयाऽऽदिविभक्तियुक्तपूर्वपदः उत्तरपदार्थप्रधानः समासः तत्पुरुषः। क्रमेण यथा,—कष्टाऽऽश्रितः, करलूनः, विप्रदत्तः, वृक्षपतितः, राजपुत्त्रः, गृहस्थितः इत्यादि ।

कर्मधारयः ।

उत्तरपदप्रधानः समानविभक्तियुक्तः विशेष्यविशेषणभावमापन्नः समासः कर्मधारयः। यथा,—नीलोत्पलम् ।

द्विगुः ।

कर्मधारय एव संख्यावाचकपूर्वपदो द्विगुसमासः। स च समाहार-तद्धितार्थोत्तरपदत्वेन त्रिविधः। क्रमेण यथा,—पञ्चमूली, पञ्चगुः, पञ्चगवधनः ।

बहुव्रीहिः ।

अन्यपदार्थप्रधानः समासः बहुव्रीहिः। यथा,—कृतप्रणामः पुरुषः ।

द्वन्द्वः ।

समासान्तर्गतसर्वपदार्थप्रधानः समासः द्वन्द्वः। यथा,—रामलक्ष्मणौ, करचरणम् इत्यादि ।

समासोऽयं ग्रन्थः ।

संस्कृतशिक्षामञ्जरी

द्वितीयभागः ।

पण्डितकुलपतिना-

बि. ए, उपाधिधारिणा-

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण

सङ्कलितः ।

तदात्मजाभ्यां—

पण्डित श्रीआशुबोध-विद्याभूषण-

पण्डित श्रीनित्यबोध-विद्यारत्नाभ्यां

संस्कृतः परिवर्द्धितः प्रकाशितश्च ।

सप्तमसंस्करणम् ।

कलिकातानगर्य्यां

गोवर्द्धनयन्त्रे

मुद्रितः ।

इं १९२० ।

 मूल्यम् सपादरूप्यकम् ।

संस्कृतशिक्षामञ्जरी

द्वितीयभागः।

[illegible]

वि, ए, उपाधिधारिणा-

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण

सङ्कलितः।

तदात्मजाभ्यां-

पण्डित श्रीआशुबोध-विद्याभूषण-

पण्डित श्रीनित्यबोध-विद्यारत्नाभ्यां

संस्कृतः परिवर्द्धितः प्रकाशितश्च

सप्तमसंस्करणम्।

कलिकातानगर्य्यां

गोवर्द्धनयन्त्रे

मुद्रितः।

ई १९२०।

প্রকাশক — { পণ্ডিত শ্রীআশুবোধ বিদ্যাভূষণ
ও
পণ্ডিত শ্রীনিত্যবোধ বিদ্যারত্ন।

প্রাপ্তিস্থান— { ২নং রমানাথ মজুমদার ষ্ট্রীট,
পোঃ, আঃ, আমহার্ষ্ট ষ্ট্রীট, কলিকাতা।

PRINTED BY GOBARDHAN PAN
209, Cornwalis Street, Calcutta.

संस्कृतशिक्षामञ्जरी

द्वितीयभागः ।

मङ्गलपाठः ।

सर्व्वशक्तिमतो जगदीश्वरस्य कृपया इदं जगत् शक्तिमद्भवति । यस्य शक्त्या सूर्य्यः करैः रसान् गृहीत्वा पुनरस्माकं जीवनाय ददाति ; तैश्च शस्यादिकमुत्पाद्य अस्मान् रक्षति च । यस्य च शक्त्या वायुः श्वासप्रश्वासादिरूपेण अस्माकं जीवनाय उपकरोति । यस्य चाऽऽदेशेन अनलोऽस्माकं देहान्तर्निविष्टः सन् भुक्तान्यन्नादीनि रसशोणिताऽऽदिरूपेण परिणामयति । यस्य कृपया च क्षितिः सर्वंसहा सती अस्मान् धारयति । यस्य शक्त्या च आकाशस्तु पदार्थाऽऽघातजनितं शब्दं जनयति । यस्य भूमण्डलस्य वितानरूपे नभोमण्डले चन्द्रमसं तारकाराजिञ्च यथायथं

विन्यस्य स्वस्य शिल्पनैपुण्यं शश्वत्प्रकटयति । यश्च जननात् प्रागेव प्राणिनां रक्षणाय मातृस्तनेषु क्षीरं, पित्रोर्हृदये स्नेहञ्च सदैव ददाति । यश्च शश्वत् अशेषतो विपद्गणात् अस्मान् रक्षति, तञ्च सर्वशक्तिमन्तं भगवन्तं वयं वन्दामहे ।

सन्ध्याकाले आकाशमण्डलं निर्मलं लोहितञ्च जायते । तस्मिन् ब्राह्मणाः सन्ध्याम् उपासते । सर्वे जीविनो जगदीशस्य परिचय ददति । केचन वचसा, केचन गानेन, केचन विद्यया, केचन पुष्पेण, केचन सत्सङ्गेन इति ।

ज्ञानेन विना जगद्रक्षितारं परमेश्वरं निर्णेतुं केनापि न शक्यते । ज्ञानन्तु विद्योपार्जनं विना न सम्भवति ; अतः विद्याचर्चा तु सर्वदैव करणीया । विद्यारत्नस्य मणिमुक्ताऽऽदिभिः कदाचिदपि न साम्यम् । मणिमुक्ताऽऽदिभिः विद्यालाभस्तु कदाचिदपि न सम्भवति, परन्तु विद्यया मणिमुक्ताऽऽदीनां लाभः अनायाससाध्य एव । मणिमुक्ताऽऽदीनान्तु रक्षणे तस्कराऽऽदिभ्यो भयं, नाशे व्यये च दुःखम्; महामूल्यविद्यारत्नस्य न नाशः सम्भवति, परन्तु

व्यये च वृद्धिमापद्यते । अपि च, विद्या तु केवलं न ज्ञानं, विनयं यशश्च ददाति । विनयेन नरः स्नेहभाजनं जायते, यशसा चिरं जीवति च । विद्यासमो जगति कोऽपि बन्धुर्नास्ति । अतः बाल्यादेव विद्योपार्जनं श्रेयः ।

प्रथमः पाठः ।

अस्ति कस्मिंश्चित् समुद्रोपकण्ठे महान् जम्बूपादपः सदाफलः । तत्र च रक्तमुखो नाम वानरः प्रतिवसति स्म । तत्र च तस्य तरोरधः कदाचित् करालमुखो नाम मकरः समुद्र-सलिलात् निष्क्रम्य सुकोमलबालुकासनाथे तीरो-पान्ते न्यविशत । ततश्च रक्तमुखेन स प्रोक्तः,— "भोः ! भवान् समभ्यागतोऽतिथिः, तद्भक्षयतु मया दत्तानि अमृततुल्यानि जम्बूफलानि । उक्तञ्च,—

अपूजितोऽतिथिर्यस्य गृहाद् याति विनिःश्वसन् ।
गच्छन्ति विमुखास्तस्य पितृभिः सह देवताः ॥"

एवमुक्त्वा तस्मै जम्बूफलानि ददौ । सोऽपि तानि भक्षयित्वा तेन सह चिरं गोष्ठीसुखमनुभूय भूयोऽपि स्वभवनम् अगात् । एवं नित्यमेव तौ वानरमकरौ जम्बूच्छायास्थितौ विविधशास्त्रगोष्ठ्या कालं नयन्तौ सुखेन तिष्ठतः । सोऽपि मकरो भक्षितशेषाणि जम्बूफलानि गृहं गत्वा स्वपत्न्यै प्रयच्छति । अथ अन्यतमे दिवसे तया स पृष्टः,—"नाथ ! क्व एवंविधानि अमृतकल्पानि फलानि प्राप्तानि ?" स आह,—"भद्रे ! ममास्ति परमसुहृत् रक्तमुखो नाम वानरः । स प्रीतिपूर्वम् इमानि फलानि प्रयच्छति" ।

ततोऽसौ भार्य्यया सह सुहृत्समीपम् अगात् । मकरी फलानि तं ययाचे । वानरः स्मितं कृत्वा ताम् अवादीत्,—"किमिति फलानि आदातुम् इहाऽऽगतोऽसि" ? अतोऽहं ब्रवीमि,—

स्निग्धात् याञ्चा न कर्त्तव्या प्राणव्ययेऽपि पण्डितैः ।
याच्यालाभे हि बन्धुत्वं मानश्चैव विनश्यति ॥

द्वितीयः पाठः ।

अस्ति कस्मिंश्चित् कूपे गङ्गदत्तो नाम मण्डूकराजः। स कदाचित् दायादैः उद्वेजितः तस्मात् निष्क्रान्तः। अथ तेन चिन्तितं यत्,—"कथं तेषां दायादानां मया प्रत्यपकारः कर्त्तव्यः ?" स एवं चिन्तयन् विले प्रविशन्तं कृष्णसर्पम् अपश्यत्। तं दृष्ट्वा भूयोऽपि अचिन्तयत् यत्,—"एनं तत्र कूपे नीत्वा सकलदायादानाम् उच्छेदं करिष्यामि। उक्तञ्च,—

शत्रुमुन्मूलयेत् प्राज्ञस्तीक्ष्णं तीक्ष्णेन शत्रुणा।
व्यथाकरं सुखार्थाय कण्टकेनैव कण्टकम्"॥

एवं स विभाव्य विलद्वारं गत्वा तम् आहूतवान्,—"एहि एहि प्रियदर्शन! एहि"। तत् श्रुत्वा सर्पः चिन्तयामास,—"य एष माम् आह्वयति, स स्वजातीयो न भवति, यतो नैषा सर्पवाणी। अन्येन केनापि सह मम मर्त्त्यलोके सङ्गतिः नास्ति। तदत्र एव दुर्गे स्थितः तावद् वेद्मि, कोऽयं भवति। उक्तञ्च,—

यस्य न ज्ञायते शीलं न कुलं न च संश्रयः।
न तेन सङ्गतिं कुर्य्यादित्युवाच बृहस्पतिः॥

कदाचित् कोऽपि मन्त्रवाद्यौषधचतुरो वा माम् आहूय बन्धने क्षिपति । अथवा कश्चित् पुरुषो वैरमाश्रित्य कस्यचिद् भक्षणार्थे माम् आह्वयति" । आह च,—"भोः ! को भवान्?" स आह,—"अहं गङ्गदत्तो नाम मण्डूकाधिपतिः, त्वत्सकाशे मैत्र्यर्थम् अभ्यागतः" । तत् श्रुत्वा सर्पः आह,—"भोः ! अश्रद्धेयम् एतत् यत्, तृणानां वह्निना सह सङ्गमः । उक्तञ्च,—

यो यस्य जायते बध्यः स स्वप्नेऽपि कथञ्चन ।
न तत्समीपमभ्येति तत् किमेवं प्रजल्पसि?" ॥

गङ्गदत्त आह,—"भोः ! सत्यमेतत्, स्वभाव-वैरी त्वम् अस्माकम् । परं दायादपरिभवात् प्राप्तोऽहं ते सकाशम् । उक्तञ्च,—

सर्वनाशे च सञ्जाते प्राणानामपि संशये ।
अपि शत्रुं प्रणम्यापि रक्षेत् प्राणधनानि च" ॥

अथ सर्पेण प्रोक्तः,—'भोः ! एहि, त्वामहं सुखीकरोमि, किन्तु मया सह ते बन्धुत्वम् अग्रे कर्त्तव्यम्" । स सस्मितम् आह,—

"योऽमित्रं कुरुते मित्रं वीर्य्याभ्यधिकमात्मनः।
स करोति न सन्देहः स्वयं हि विषभक्षणम्"।

तृतीयः पाठः।

अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः। तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति स्म। स च सर्वैर्जलचरैः पक्षिभिर्मिलित्वा पक्षिराज्ये अभिषिक्तः। यतः,—

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव॥

अपरञ्च,—

प्रजां संरक्षति नृपः सा वर्द्धयति पार्थिवम्।
वर्द्धनाद्रक्षणं श्रेयस्तदभावे सदप्यसत्॥

एकदाऽसौ राजहंसः सुविस्तीर्णकमलपर्य्यङ्के सुखाऽऽसीनः परिवारपरिवृतः तिष्ठति। ततः कुतोऽपि देशात् आगत्य दीर्घमुखो नाम बकः प्रणम्य उपविष्टः। राजा उवाच,—"दीर्घमुख! देशान्तरात् आगतोऽसि, वार्त्तां कथय"। स ब्रूते,—"देव! अस्ति महती वार्त्ता। ताम् आख्यातुकामः

एव सत्वरम् आगतोऽहं, श्रूयताम् ।—अस्ति जम्बूद्वीपे विन्ध्यो नाम गिरिः । तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति । तस्य अनुचरैः अहं दग्धारण्यमध्ये चरन् अवलोकितः, पृष्टश्च,—'कः त्वम् ? कुतः समागतोऽसि ?' ततो मया उक्तम्,—'अहं कर्पूरद्वीपस्य राज्ञो हिरण्यगर्भस्य अनुचरः । कौतुकात् देशान्तरं द्रष्टुम् आगतोऽस्मि' । तत् श्रुत्वा पक्षिभिः उक्तं,—'तत्र कीदृशो देशः ? राजा कीदृशो वा ?' ततो मया उक्तम्,—'आः ! किमेवम् उच्यते ? महदन्तरम् यतः कर्पूरद्वीपः स्वर्गैकदेशः । राजा च द्वितीयः स्वर्गपतिः । कथं वर्णयितुं शक्यते ? अत्र मरुस्थले पतिता यूयं किं कुरुथ ? आगच्छत अस्मद्देशे । यतः,—

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्य्यते ? ॥

अन्यच्च,—

हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः ।
पयोऽपि शौण्डिकीहस्ते वारुणीत्यभिधीयते' ॥

ततः मद्वचनम् आकर्ण्य पक्षिणः सकोपा बभूवुः । तथा चोक्तम्,—

"पयःपानं भुजङ्गानां केवलं विषवर्द्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय, न शान्तये॥
अन्यच्च,—

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याज्ज्ञान् स्थानभ्रष्टा ययुः खगाः॥"

राजा उवाच,—"कथमेतत्?" दीर्घमुखः कथयति,—"अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः। तत्र निर्मितनीड़े पक्षिणः सुखेन वर्षासु अपि निवसन्ति। अथ नीलपटलैः इव जलधरपटलैः आवृते नभस्तले धारासारैः महती वृष्टिः बभूव। ततो वानरान् तरुतलेऽवस्थितान् शीतार्त्तान् कम्पमानान् अवलोक्य पक्षिभिः उक्तं,—'भो भो वानराः! श्रूयताम्,—

अस्माभिर्निर्मिता नीड़ाश्चञ्चुमात्राऽऽहृतैस्तृणैः।
हस्तपादाऽऽदिसंयुक्ता यूयं किमवसीदत?'॥

अनन्तरं शान्ते पानीयवर्षे तैः वानरैः वृक्षम् आरुह्य सर्वे नीड़ा भग्नाः। तेषां पक्षिणाम् अण्डानि च अधःपातितानि। अतस्ते ऊचुः,—'विद्वानेवोपदेष्टव्यः' इत्यादि"। राजा उवाच,—

"ततः किमभूत् ?" दीर्घमुखः कथयति,—"ततः पक्षिभिः कोपादुक्तं,—'केन असौ राजहंसः कृतः राजा ?' ततो मया उपजातकोपेन उक्तम्,—'अयं ते मयूरः केन राजा कृतः ?' तत् श्रुत्वा ते पक्षिणो मां हन्तुम् उद्यताः ; ततो मया अपि सुविक्रमो दर्शितः" । राजा विहस्य आह,—

"आत्मनश्च परेषाञ्च यः समीक्ष्य बलाबलम् ।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः" ॥

चतुर्थः पाठः ।

अस्ति हस्तिनापुरे विलासो नाम रजकः । तस्य गर्दभोऽतिभारवहनात् दुर्बलो मुमूर्षुः अभवत् । ततः तेन रजकेन असौ व्याघ्रचर्मणा प्रच्छाद्य अरण्यसमीपे शस्यक्षेत्रे मोचितः । ततो दूरात् अवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः पलायन्ते । अथ केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुःकाण्डं सज्जीकृत्य अवनतकायेन एकान्ते स्थितम् । ततस्तञ्च दूरे दृष्ट्वा

गर्दभः, पुष्टाङ्गो गर्दभोऽयमिति मत्वा शब्दं कुर्वाणः तदभिमुखं धावितः। ततस्तेन शस्यरक्षकेण गर्दभोऽयमिति ज्ञात्वा लीलया एव व्यापादितः। अतोऽहं ब्रवीमि,—

यः स्वभावो हि यस्य स्यात् तस्य स दुरतिक्रमः।
श्वा यदि क्रियते राजा स किं नाश्नात्युपानहम्?।

पञ्चमः पाठः।

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराऽऽख्यं नगरम्। तत्र शैलशिखरे घण्टाकर्णो नाम राक्षसः प्रतिवसति, इति जनप्रवादः श्रूयते। एकदा घण्टाम् आदाय पलायमानः कश्चित् चौरो व्याघ्रेण व्यापादितः, तत्पाणिपतिता घण्टा वानरैः प्राप्ता। ते वानराः तां घण्टाम् अनुक्षणं वादयन्ति। ततो नगरजनैः मनुष्यः खादितो दृष्टः, प्रतिक्षणं घण्टारवश्च श्रूयते। अनन्तरं घण्टाकर्णः कुपितो मनुष्यान् खादति, घण्टाञ्च वादयति, इति श्रुत्वा जनाः सर्वे नगरात्

पलायिताः । ततः करालाऽऽख्यया कामिन्या विमृष्य मर्कटा घण्टां वादयन्ति, स्वयं विज्ञाय राजा विज्ञापितः,—"देव ! यदि कियद्धनोपचयः क्रियते, तदाऽहम् एनं घण्टाकर्णं साधयामि"। ततो राज्ञा तुष्टेन तस्यै धनं दत्तम् । करालया कामिन्या च मण्डलं कृत्वा तत्र गणेशाऽऽदि-गौरवं दर्शयित्वा स्वयं वानरप्रियफलानि आदाय वनं प्रविश्य फलानि आस्तीर्णानि । ततो घण्टां परित्यज्य वानराः फलाऽऽसक्ता बभूवुः । कामिनी च घण्टां गृहीत्वा नगरमागता सकललोकपूज्या-ऽभवत् । अतोऽहं ब्रवीमि,—

विमृष्य सर्वकर्माणि कुरुते हि विचक्षणः ।
विमृष्यकारी सर्वत्र प्राप्नुयादात्मगौरवम् ॥

षष्ठः पाठः।

अस्ति दाक्षिणात्ये जनपदे मिथिलारोप्यं नाम नगरम्। तस्य समीपस्थः अनेकशाखा-सनाथः अतिघनतरपत्रच्छन्नो न्यग्रोधपादपोऽस्ति। तत्र च मेघवर्णो नाम वायसराजः अनेककाक-परिवारः प्रतिवसति स्म। स तत्र विहितदुर्ग-रचनः सपरिजनः कालं नयति स्म। तथा अन्यः अरिमर्दनो नाम उलूकराजः असंख्योलूक-परिवारो गिरिगुहादुर्गाऽऽश्रयः प्रतिवसति स्म। स च रात्रौ अभ्येत्य सदा एव तस्य न्यग्रो-धस्य समन्तात् परिभ्रमति। अथ उलूकराजः पूर्व-विरोधवशात् यं कञ्चित् वायसं समासादयति, तं व्यापाद्य गच्छति। एवं नित्याभिगमनात् शनैः शनैः तत् न्यग्रोधपादपदुर्गं तेन समन्तात् निर्वायसं कृतम्; अथवा भवति एवम्।—

उक्तञ्च यतः,—

"य उपेक्षेत शत्रुं स्वं प्रसरन्तं यदृच्छया।
रोगञ्चाऽऽलस्यसंयुक्तः स शनैस्तेन हन्यते॥
जातमात्रं न यः शत्रुं व्याधिञ्च प्रशमं नयेत्।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात्तेन हन्यते"॥

अथ अन्येद्युः स वायसराजः सर्वान् वायस-सचिवान् आहूय प्रोवाच,—"भोः! उल्कटः तावत् अस्माकं शत्रुः उद्यमसम्पन्नश्च, कालवशात् नित्यमेव निशाऽऽगमे समेत्य अस्मत्पक्षकदनं करोति। तत् कथमस्य प्रतिविधानम्? वयं तावद् रात्रौ न पश्यामः; न च तस्य दुर्गं विजानीमः, येन दिवा गत्वा प्रहरामः। तत् अत्र विषये किं युज्यते, सन्धिविग्रहयानाऽऽसन-संश्रयद्वैधीभावानाम् एकतमस्य क्रियमाणस्य? तद्विचार्य्य शीघ्रं कथयन्तु भवन्तः"। अथ ते प्रोचुः,—"युक्तम् अभिहितं देवेन, यत् एष प्रश्नः कृतः। उक्तञ्च,—

'असहायः समर्थोऽपि तेजस्वी किं करिष्यति?।
निर्वाते ज्वलितो वह्निः स्वयमेव प्रशाम्यति॥
वनानि दहतो वह्नेः सखा भवति मारुतः।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम्'?॥ इति'

—

सप्तमः पाठः।

अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः। तत्र चिरात् सङ्कटविकटनामानौ हंसौ निवसतः। तयोर्मित्रं कम्बुग्रीवनामा कूर्मः प्रतिवसति। अथ एकदा धीवरैः आगत्य तत्रोक्तं यत्,—"अत्र अस्माभिः अद्योषित्वा प्रातर्मत्स्यकूर्मादयो व्यापादयितव्याः"। तदाकर्ण्य कूर्मो हंसौ आह,—"सुहृदौ! श्रुतोऽयं धीवराऽऽलापः? अधुना किं मया कर्त्तव्यम्?" हंसौ आहतुः,—"ज्ञायतां तावत्, पश्चात् यदुचितं, तत् कर्त्तव्यम्"। कूर्मो ब्रूते,—"मा एवम्; यतो दृष्टव्यतिकरोऽहमत्र"। तौ आहतुः,—"कथमेतत्?" कूर्मः कथयति,—"पुरा एतस्मिन् एव सरसि एवंविधेषु एव धीवरेषु उपस्थितेषु मत्स्यत्रयेण आलोचितम्। तत्र अनागतविधाता नाम एको मत्स्यः आसीत्। तेनोक्तम्,—'अहं तावत् जलाशयान्तरं गच्छामि' इत्युक्त्वा स ह्रदान्तरं गतः। अपरेण प्रत्युत्पन्नमतिनाम्ना मत्स्येन अभिहितं,—"भविष्यदर्थे प्रमाणाभावात् कुत्र मया गन्तव्यम्? तदुत्पन्ने कार्य्ये यथाकार्य्यम् अनुष्ठेयम्'। यद्भविष्यः आह,—

'पितृपितामहप्रभृतिभिः उपभुक्तमेतत् सरः नाहं त्यजामि। यद् भविष्यति, तद् भविष्यत्येव, नियतिर्लङ्घयितुं न शक्या'। एवमुक्त्वा दैवपरतन्त्र एव स्थितः।

अत्रान्तरे प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिः मृतवदात्मानं सन्दर्श्य स्थितः। ततो जालात् अपसारितः स्थलादुत्प्लुत्य गम्भीरं नीरं प्रविष्टः। यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः। अतोऽहं ब्रवीमि,—यथाऽहमन्यह्रदं प्राप्नोमि, तदद्य विधीयताम्"। हंसौ आहतुः,—"जलाशयान्तरे प्राप्ते तव कुशलम्; स्थले गच्छतः तव को विधिः?"। कूर्मो ब्रूते,—"यथाऽहं भवद्भ्यां सह आकाशवर्त्मना यामि, स उपायो विधीयताम्"। हंसौ ब्रूतः,—"कथमुपायः सम्भवति?" कूर्मो वदति,--"युवाभ्यां चञ्चुधृतं काष्ठमेकं मया मुखेन अवलम्बितव्यम्; अतो भवतोः पक्षबलेन मयाऽपि सुखेन गन्तव्यम्"। हंसौ ब्रूतः,—"सम्भवत्येव उपायः, अस्तु एवम्।—

पक्षहीनः सदा दुःखं लभते सबलो जनः।
तरोरधो हरिः शेते वायसोऽश्नाति तत्फलम्"॥

अष्टमः पाठः ।

अस्ति कस्यचित् महीपतेः कस्मिंश्चित् स्थाने मनोरमं शयनस्थानम् । तत्र शुक्लतरपटयुगल-मध्यसंस्थिता मन्दविसर्पिणी नाम श्वेता यूका प्रतिवसति स्म । सा च तस्य महीपतेः रक्तम् आस्वादयन्ती सुखेन कालं नयमाना तिष्ठति । अन्येद्युश्च तत्र शयने क्वचिद् भ्राम्यन् अग्निमुखो नाम मत्कुणः समायातः । अथ तं दृष्ट्वा सा विषण्णवदना प्रोवाच,—'भो अग्निमुख ! कुतः त्वमत्र अनुचितस्थाने समायातः ? तत् यावत् न कश्चित् वेत्ति, तावत् शीघ्रं गम्यताम्" इति । स आह,—"भगवति । गृहाऽऽगतस्य असाधोरपि न एतत् युज्यते वक्तुम् । उक्तञ्च,—

'एह्यागच्छ समाश्वसाऽऽसनमिदं कस्माच्चिराद्दृश्यसे ?
का वार्त्ता ? अतिदुर्बलोऽसि कुशलम् ?
प्रीतोऽस्मि ते दर्शनात् ।
एवं नीचजनेऽपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्मोऽयं गृहमेधिनां निगदितः स्मार्त्तैः लघुस्वर्गदः' ॥

अपरं, मया अनेकमानुषाणाम् अनेक-विधानि रुधिराणि आस्वादितानि आहार-

दोषात् कटुतिक्तकषायाम्लरसाऽऽस्वादनानि च, मया कदाचित् मधुररक्तं न समास्वादितम् । तत् यदि त्वं प्रसादं करोषि, तदा अस्य नृपतेः विविध-व्यञ्जनान्नपान-चोष्यलेह्यस्वाद्वाहारवशात् यत् मिष्टं रक्तं सञ्जातं, तदास्वादनेन सौख्यं सम्पादयामि जिह्वाया इति । उक्तञ्च,—

'यदसत्यं वदेत् मर्त्यो यद्वाऽसेव्यञ्च सेवते ।
यद्गच्छति विदेशञ्च तत्सर्वमुदरार्थतः' ॥

तन्मया गृहाऽऽगतेन बुभुक्षया पीड्यमानेन त्वत्सकाशात् भोजनम् अर्थनीयम् । तन्न त्वया एकाकिन्या अस्य भूपतेः, रक्तभोजनं कर्त्तुं युज्यते" । तच्छ्रुत्वा मन्दविसर्पिणी आह,-"भो मत्कुण ! अहम् अस्य नृपतेः निद्रावशं गतस्य रक्तमास्वादयामि, त्वं पुनः अग्निमुखः चपलश्च, तद् यदि मया सह रक्तपानं करोषि, तत्तिष्ठ, पश्चात् अभीष्टतरं रक्तम् आस्वादय" । सोऽब्रवीत्, —"भगवति ! एवं करिष्यामि, यावत् त्वं न आस्वादयसि प्रथमं नृपरक्तं, तावत् मम देवगुरुकृतः शपथः स्यात्, यदि तत् आस्वादयामि" । एवं तयोः परस्परं वदतोः स राजा तच्छयनम् आसाद्य

प्रसुप्तः। अथ असौ मत्कुणो जिह्वालौल्यात् उत्कृष्टरक्तपानौत्सुक्याच्च जाग्रतमपि तं महीपतिम् अदशत्। अथवा साध्विदमुच्यते,—

"स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम्॥
यदि स्याच्छीतलो वह्निः शीतांशुर्दहनाऽऽत्मकः।
न स्वभावोऽत्र मर्त्यानां शक्यते कर्त्तुमन्यथा"॥

अथ असौ महीपतिः सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा तत्क्षणादेव उत्थितः प्रोवाच,—"अहो! ज्ञायताम्, अत्र प्रच्छादनपटे मत्कुणो यूका वा नूनं तिष्ठति, येन अहं दष्टः" इति। अथ ये कञ्चुकिनः तत्र स्थिताः, ते सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मदृष्ट्या वीक्षाञ्चक्रुः। अत्रान्तरे स मत्कुणः चापल्यात् खट्वाऽन्तं प्रविष्टः, सा मन्दविसर्पिणी अपि वस्त्रसन्ध्यन्तर्गता तैः दृष्टा, व्यापादिता च। उक्तञ्च,—

"मिष्टाऽऽलापेन सन्तुष्टः मैत्रं न कुरुते सुधीः।
अज्ञातहृदये तत्तु मरणाय प्रकल्पते"॥

—

नवमः पाठः।

कस्मिंश्चित् समुद्रतीरैकदेशे टिट्टिभदम्पती प्रतिवसतः स्म। ततो गच्छति काले समयम् आसाद्य टिट्टिभी गर्भम् आधत्त। अथ आसन्न-प्रसवा सती सा टिट्टिभम् ऊचे,—"भोः कान्त! मम प्रसवसमयो वर्त्तते, तद्विचिन्त्यतां किमपि निरुपद्रवं स्थानं, येन तत्र अहम् अण्डकविमोचनं करोमि"। टिट्टिभ आह,—"भद्रे! रम्योऽयं समुद्र-प्रदेशः, तदत्र एव प्रसवः कार्य्यः"। सा प्राह,—"अत्र पूर्णिमादिने समुद्रवेला चरति, सा मत्त-गजेन्द्रान् अपि समाकर्षति, तद् दूरम् अन्यत्र किञ्चित् स्थानम् अन्विष्यताम्"। तत् श्रुत्वा विहस्य टिट्टिभः प्राह,—"भद्रे! न युक्तमुक्तं भवत्या, का शक्तिः समुद्रस्य—यो मम दूषयिष्यति प्रसू-तिम्?—किं न श्रुतं भवत्या?—

बद्धाम्बरचरमार्गं व्यपगतधूमं सदा महद्भयदम्।
मन्दमतिः कः प्रविशति हुताशनं स्वेच्छया मनुजः?"॥

तत् श्रुत्वा समुद्रः चिन्तयामास,—"अहो! गर्वः पक्षिकीटस्य अस्य!! अथवा साध्विदमुच्यते,—
'उत्क्षिप्य टिट्टिभः पादावास्ते भङ्गभयाद्दिवः।
स्वचित्तकल्पितो गर्वः कस्य नात्रापि विद्यते'?॥

तत् मया अस्य प्रमाणं कूतूहलादपि द्रष्टव्यं, किं मम एषोऽण्डापहारे कृते करिष्यति?" इति चिन्तयित्वा स्थितः। अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाः टिट्टिभ्याः समुद्रो वेला-व्याजेन अण्डानि अपजहार। अथ आयाता सा टिट्टिभी प्रसवस्थानं शून्यम् अवलोक्य प्रलपन्ती टिट्टिभम् ऊचे,—"भो मूर्ख! कथितम् आसीत् मया ते यत्, समुद्रवेलया अण्डानां विनाशो भवि-ष्यति, तद् दूरतरं व्रजावः; परं मूढ़तया अह-ङ्कारमाश्रित्य मम वचनं न करोषि"।

टिट्टिभ आह,—"भद्रे! एवं भवतु, सुहृद्वर्ग-समुदायेन समुद्रं शोषयिष्यामि" इति निश्चित्य वकसारसमयूरादीन् समाहूय प्रोवाच,—"भोः! पराभूतोऽहं समुद्रेण अण्डकापहारकेण; तच्चिन्त्य-ताम् अस्य शोषणोपायः"। ते सम्मन्त्र्य प्रोचुः,—"अशक्ता वयं समुद्रशोषणे, तत् किं वृथाप्रया-सेन? उक्तञ्च,—

'अबलः प्रोन्नतं शत्रुं यो याति मदमोहितः।
युद्धार्थं स निवर्त्तेत शीर्णदन्तो गजो यथा'॥ इति"।

दशमः पाठः ।

अस्ति कस्मिंश्चित् वनोद्देशे वज्रदंष्ट्रो नाम सिंहः । तस्य चतुरक-क्रव्यमुखनामानौ शृगाल-वृकौ भृत्यभूतौ सदैवानुगतौ तत्रैव वने प्रतिवसतः । अथ अन्यदिने सिंहेन कदाचित् आसन्न-प्रसवा प्रसववेदनया स्वयूथाद् भ्रष्टोपविष्टा उष्ट्री कस्मिंश्चित् वनगहने समासादिता । अथ तां व्यापाद्य यावदुदरं स्फोटयति, तावज्जीवन् लघु-दासेरकशिशुर्निष्क्रान्तः । सिंहोऽपि दासेरक्याः पिशितेन सपरिवारः परां तृप्तिम् उपागतः ; परं स्नेहात् बालदासेरकं त्यक्तं गृहमानीय इदम् उवाच,—"भद्र ! न तेऽस्ति मृत्योर्भयं मत्तः, न अन्यस्मादपि । ततः स्वेच्छया अत्र वने भ्राम्यतु ; यतस्ते शङ्कुसदृशौ कर्णौ, ततः शङ्कुकर्णो नाम भविष्यति" इति । एवमनुष्ठिते चत्वा-रोऽपि ते एकस्थाने विहारिणः परस्परम् अनेक-प्रकारगोष्ठीसुखम् अनुभवन्तः तिष्ठन्ति । शङ्कु-कर्णोऽपि यौवनपदवीम् आरूढः, क्षणमपि न तं सिंहं मुञ्चति । अथ कदाचित् वज्रदंष्ट्रस्य केनचित् वन्येन मत्तगजेन सह युद्धम् अभवत् ।

तेन मदवीर्य्यात् स दन्तप्रहारैः तथा क्षतशरीरो विहितः,—यथा प्रचलितुं न शक्नोति। तदा क्षुत्क्षामकण्ठः तान् प्रोवाच,--"भोः! अन्विष्यतां किञ्चित् सत्वं, येन अहमेवं स्थितोऽपि तं व्यापाद्य आत्मनो युष्माकञ्च क्षुत्प्रणाशं करोमि"। तच्छ्रुत्वा ते वयोऽपि वने सन्ध्याकालं यावद्-भ्रान्ताः, परं न किञ्चित् सत्वम् आसादितवन्तः। अथ चतुरकः चिन्तयामास,—"यदि शङ्कुकर्णोऽयं व्यापाद्यते, ततः सर्वेषां कतिचित् दिनानि तृप्तिर्भवति, परं नैनं स्वामी मित्रत्वात् आश्रय-समाश्रितत्वाच्च विनाशयिष्यति। अथवा बुद्धि-प्रभावेण स्वामिनं प्रतिबोध्य तथा करिष्ये,—यथा व्यापादयिष्यति। उक्तञ्च,—

'अवध्यं चाथवाऽगम्यमकृत्यं नास्ति किञ्चन।
लोके बुद्धिमतां बुद्धेस्तस्मात्तां विनियोजयेत्'॥ इति"

एवं विचिन्त्य शङ्कुकर्णम् इदमाह,—"भोः शङ्कु-कर्ण! स्वामी तावत् पथ्यं विना क्षुधया परिपीड्यते। स्वाम्यभावात् अस्माकमपि ध्रुवं विनाश एव। ततो वाक्यं किञ्चित् स्वाम्यर्थे वदिष्यामि, तत् श्रूयताम्"। शङ्कुकर्ण आह,—

"भोः ! शीघ्रं निवेद्यतां,—येन ते वचनं निर्विकल्पं करोमि। अपरं, स्वामिनो हिते कृते मया सुकृतशतं कृतं भविष्यति"। अथ चतुरक आह,—"भो भद्र ! आत्मशरीरं द्विगुणलाभेन स्वामिने प्रयच्छ, येन ते द्विगुणं शरीरं भविष्यति, स्वामिनः पुनः प्राणयात्रा भवति"। तत् आकर्ण्य शङ्कुकर्णः प्राह,—"भद्र ! यदि एवं, तत् मदीयप्रयोजनम् एतत्, कथमुच्यताम्,—'स्वाम्यर्थः क्रियतामिति ?' परमत्र धर्मः प्रतिभुः"। इति विचिन्त्य ते सर्वे सिंहसकाशम् आजग्मुः। तत्र चतुरक आह,—"देव ! न किञ्चित्सत्त्वं प्राप्तम् ; भगवान् आदित्योऽपि अस्तं गतः। तद् यदि स्वामी द्विगुणं शरीरं प्रयच्छति, ततः शङ्कुकर्णोऽयं द्विगुणवृद्ध्या स्वशरीरं प्रयच्छति धर्मप्रतिभुवा"। सिंह आह,—"भोः ! यदि एवं, तत् सुन्दरतरम्। व्यवहारस्य अस्य धर्मः प्रतिभूः क्रियताम्" इति। अथ सिंहवचनानन्तरं वृकशृगालाभ्यां विदारितोभयकुक्षिः शङ्कुकर्णः पञ्चत्वमुपागतः। अथ वज्रदंष्ट्रः चतुरकमाह,—"भो चतुरक ! यावदहं नदीं गत्वा स्नानदेवताऽर्चनविधिं कृत्वा आग-

च्छामि, तावत् त्वया अत्र अप्रमत्तेन भाव्यम्" इति उक्त्वा नद्यां गतः। अथ तस्मिन् गते चतुरकः चिन्तयामास,—"कथं मम एकाकिनो भोज्योऽयम् उष्ट्रो भविष्यति ?" इति विचिन्त्य क्रव्यमुखमाह,— "भोः क्रव्यमुख ! क्षुधालुर्भवान्, तद् यावदसौ स्वामी न आगच्छति, तावत् त्वमस्य उष्ट्रस्य मांसं भक्षय। अहं त्वां स्वामिनो निर्दोषं प्रतिपादयिष्यामि"। सोऽपि तच्छ्रुत्वा यावत् किञ्चित् मांसम् आस्वादयति, तावत् चतुरकेण उक्तम्,— "भोः क्रव्यमुख ! समागच्छति स्वामी ; तत् त्यक्त्वा एनं दूरे तिष्ठ, येन अस्य भक्षणं न विकल्पयति"। तथा अनुष्ठिते सिंहः समायातो यावत् उष्ट्रं पश्यति, तावत् रिक्तीकृतहृदयो दासेरकः दृष्टः। ततः भ्रूकुटिं कृत्वा परुषतरमाह,— "अहो ! केन एष उष्ट्र उच्छिष्टतां नीतः ?—येन तमपि व्यापादयामि"। एवमभिहिते क्रव्यमुखः चतुरकमुखं तथा अवलोकयति किल, यथा 'तद्वद किञ्चित्, येन मम शान्तिर्भवति' इति प्रतीयते। अथ चतुरको विहस्य उवाच,—"भोः ! माम् अनादृत्य पिशितं भक्षयित्वा अधुना मन्मुखम्

अवलोकयसि? तदास्वादय अस्य दुनयतरोः फलम्” इति। तदाकर्ण्य क्रव्यमुखो प्राणनाशभयाद् दूरदेशं गतः। एतस्मिन् अन्तरे तेन मार्गेण दासेरकसार्थो भाराऽऽक्रान्तः समायातः। तस्य अग्रेसरस्य उष्ट्रस्य कण्ठे महती घण्टा बद्धा। तस्याः शब्दं दूरतोऽपि आकर्ण्य सिंहो जम्बूकम् आह,—“भद्र! ज्ञायतां किमेषः रौद्रः शब्दः श्रूयतेऽश्रुतपूर्वः”। तच्छ्रुत्वा चतुरकः किञ्चित् वनान्तरं गत्वा सत्वरम् अभ्युपेत्य प्रोवाच,—“स्वामिन्! गम्यतां गम्यतां, यदि शक्नोषि गन्तुम्”। सोऽब्रवीत्,—“भद्र! किमेवं मां व्याकुलयसि? तत् कथय, किमेतत्?” इति। चतुरक आह,—“स्वामिन्! एष धर्मराजः तवोपरि कुपितः, यदनेन अकाले दासेरकोऽयं मदीयो व्यापादितः; तत् सहस्रगुणम् उष्ट्रमस्य सकाशात् ग्रहीष्यामि, इति निश्चित्य वृहन्मानम् आदाय, अग्रेसरस्य उष्ट्रस्य ग्रीवायां घण्टां बद्धा, व्यापन्नदासेरकसक्तानपि पितृपितामहान् आदाय वैरनिर्य्यातनार्थम् आयात एव”। सिंहोऽपि तत् श्रुत्वा सर्वतो दूरादेव अवलोक्य मृतमुष्ट्रं परित्यज्य प्राणभयात् प्रनष्टः। चतु-

रकोऽपि शनैः शनैः तस्य उष्ट्रस्य मांसं भक्षयामास,—

सर्वं कर्म सुसंसाध्यं चातुर्य्यं विद्यते यदि।
बलीयानपि चातुर्य्याद्धीनः सीदति भूतले॥

एकादशः पाठः।

केचन बकाः प्रतिदिनं शस्यभक्षणार्थं कस्यचित् कृषकस्य क्षेत्रं व्रजन्ति स्म। तदवलोक्य एकदा स कृषकः तान् बकान् धर्त्तुकामः क्षेत्रोपरि जालं विस्तारयामास। यदा स जालपर्य्यवेक्षणार्थं गतः, तदा तत्र एकेन सारसेन सह तान् बकान् जालपतितान् ददर्श। सारसः कृषकमवलोक्य भीतभीतोऽवदत्,—"भ्रातः कृषक! नाहं बकः, मया ते शस्यं न खादितं, मां त्यज। त्वं विचार्य्य पश्य, अत्र नास्ति कोऽपि ममापराधः, भुवि यावन्तः पक्षिणो विद्यन्ते, तेष्वहम् एव धर्मपरायणः, मया कदाऽपि कस्याप्यपकारो न कृतः। अतिस्थविरयोः पित्रोः सम्माननां, सेवा, नानास्थानेषु परिभ्रम्य गुरूणां परिपोषणं च मया सर्वदा विधीयते"। एतदाकर्ण्य कृषको-

ऽवदत्,-"शृणु रे सारस ! त्वया यदुक्तं, तत् सत्यमेव, परन्तु ये मम शस्यापकारिणः, तेषां समगतः निरपराधस्यापि तव दण्डः अवश्यम्भावनीयः,—

असत्सङ्गाद्धि साधूनां भवन्ति विपदोऽनिशम् ।
तस्मादसाधुसंसर्गं दूरतः परिवर्जयेत् ॥

द्वादशः पाठः ।

आसीत् पुरा चन्द्रवती नाम नगरी । तत्र सकलभूपाललतामभूतः कश्चिदवनिपतिः प्रतिवसति स्म । कदाचित् स सुमतिवर्माणं मन्त्रिणम् अवलोक्य जगाद,—"भो मन्त्रिन् ! हस्ते किमास्ते तव ?" तेन धार्मिकप्रवरेण मन्त्रिणोक्तं,—"छुरिकेयम्" इति । राजाऽऽह,-"किं, छुरिका !! मह्यं देहि, प्रेक्षे" । "अतीव तीक्ष्णास्त्रमेतत्, सावधानेन भवितव्यं भवता" इत्युक्त्वा मन्त्री तदस्त्रं तस्मै दत्तवान् ।

यदा राजा तदादाय निरीक्षाञ्चक्रे, तदा तद्धस्तात् स्खलितं सत् स्वस्यैव सव्यचरणस्य अङ्गुष्ठोपरि सहसा संपत्य शोणितधारामपातयत् । राजा तु कातरस्वरेणावोचत्,—"भो मन्त्रिवर ! किमिति अतीव यन्त्रणा जायते ?" मन्त्री तु तत्-

क्षणमेव सजलचेलखण्डेन सशोणितम् अङ्गुष्ठं संवेष्ट्य तस्मात् शोणितधारां निवार्य्य चाकथयत्,—“भो राजन्! ईश्वरेच्छया यत् घटते, तन्मङ्गलाय” इति। क्रुद्धेन नृपेण अभाणि,—“रे मूढ़! मां न जानासि? ममाङ्गुलिच्छेदनजनितः शोणितपातः त्वां सुखाकरोति? नो चेत्, ‘मङ्गलाय’ इति कथं वदसि? अस्य समुचितदण्डं तव विधास्यामि” इति। मन्त्रिणोक्तम्,—“ईश्वरेच्छया घटित चेत्, तदपि मङ्गलाय”। राजाऽऽह,—“भवतु तावत्, दर्शयिष्यामि”।

ततः पञ्चषेषु दिनेषु गतेषु कदाचित् यथार्थवादिनि अमात्ये अवैधदण्डं विधित्सुः राजा धार्मिकप्रवरेण बुद्धिमता सुमतिवर्मणा मन्त्रिश्रेष्ठेन, धानुष्कपदातिभिश्च सार्द्धं मृगयां कर्त्तुं काननमगमत्। ततो राजमन्त्रिणौ,—“अयं मृगः, अयं वराहः, इतो याति, इहाऽऽगच्छति, जहि जहि” इत्यादि निगदितवन्तौ, रयेण स्वसैन्यानि द्रवयन्तौ वनाद्वनान्तरम् आंहिषाताम्।

राज्ञा तु एतावन्तं कालं यथार्थवादिनोऽमात्यस्य अवैधदण्डविधाने कोऽप्यपायो नावलोकितः।

ततो राजा तस्मिन् एकं कूपं दृष्ट्वा अमात्यं जगाद,—"भो मन्त्रिन्! अहं पिपासाऽऽर्त्तोऽस्मि, अस्मात् कूपात् किञ्चित् जलमुत्तोल्य दीयताम्"। मन्त्री यदा कूपसन्निधिं गत्वा शिरोवेष्टनवस्त्र-प्रान्तेन जलमुत्तोलयति, तदैव राजा सहसा तं कूपेऽपातयत्, अकथयच्च,-"इदानीम् ईश्वरेच्छया यत् घटते, तन्मङ्गलाय, इत्यस्य फलम् अनुभव" इति। मन्त्री पतितोऽपि पुनस्तदेवापठत्।

मन्त्रिणं कूपे पातयित्वा काननान्तरं गच्छन्—"किं कृतं मया दुष्कृतकारिणा!!" इत्थं नरहत्याजनितपापचिन्तया व्याकुलचेता राजा इतस्ततश्च बंभ्रम्यमाणः सन् किञ्चित् महाऽरण्य-मगमत्। अस्मिन्नेवावसरे—"मातः! कालि! मङ्गलमयि! विजयतां विजयताम्" इत्यादि कल-कलान् कुर्वन्तः केचन दस्यवः तं बलादधा-रयन्; स च राजा उपायान्तरमनवलोक्य तान् प्रसादयितुं धनप्रलोभनेन नम्री-भावेण च अतितरां विनिनाय। तैः श्रुत्वाऽपि तन्न श्रुतं, परन्तु ते परुषवचनमवोचन्,—"रे मूढ़! किं त्वां परित्यज्य वयं रिक्तहस्तेन

गमिष्यामः ? किमाश्चर्य्यमेतत्, यदि भाग्यवशात् एकं नरबलिं लभेमहि, तर्हि किम् अस्माकमीश्वरीं कालीं तेन असमभ्यर्च्य त्वां परित्यजामः ? अद्य तु नरपशोस्तव शोणितेन तां तर्पयिष्यामः। एवञ्च सति तवापि जन्मसाफल्यं भविष्यति। रे दुर्बुद्धे ! आयाहि अस्माभिः साकं, नो चेत् प्रहारेणास्थिभेदं करिष्यामः"।

राजा तेषाम् एवं वचनं शृण्वन् अतीव बिभेति स्म। ते तु दस्यवः तं राजानं देवीसन्निधिमानीय स्नापयित्वा, रक्तमाल्यवस्त्रादिना अलङ्कृत्य च उत्ससृजुः, ननन्दुश्च। स च तस्मिन्नेवावसरे प्रतिक्षणं यमयातनामनुभवन् चक्रन्द; क्रन्दनन्तु केनापि श्रुतमपि तन्न श्रुतं, परन्तु ते दस्यवः सहर्षं यूपाभ्यन्तरगतं तं चक्रुः; तेषां कश्चित् निशितखड्गमुद्यम्य तच्छेदनाय तस्थौ। एतस्मिन्नन्तरे पलितोत्तमाङ्गः कश्चित् दस्युप्रवरः प्राह,—"भोऽसमीक्ष्यकारिणः ! किं परीक्षितोऽयं नरः ? बलिप्रदानायोग्ये खलु एतस्मिन् मङ्गलन्तु सुदूरमास्तां, परन्तु अनिष्टमापतिष्यति"। एवमाकर्ण्य ते यूपान्निष्क्राम्य तस्य सर्वावयवान्

अवलोक्य च युगपदेव प्रोचुः,—"अस्य सव्यपादा-ङ्गुष्ठं चेलखण्डवेष्टितं दृश्यते, किमिति पश्य पश्य" इति। अथ तस्य सव्यपादाङ्गुष्ठं चेलखण्डबन्धना-दुन्मोच्य सर्वे—"क्षतं क्षतम्" इति युगपदेवा-वोचन्। दस्युप्रवरस्त्ववोचत्,—"इह मङ्गलमये स्थाने अस्य स्थापनेनाप्यनिष्टाऽऽशङ्का, किमुत बलिप्रदानेन? भो भोः! मुच्यतां मुच्यतामेष दुर्लक्षणाऽऽक्रान्तः; अपरश्चानुसन्धीयताम्"।

तदा ते तदाकर्ण्य तं राजानं तस्मात् बहि-श्चक्रुः। राजा तु पुनर्जीवनमायातमिति मन्य-मानः सन् मन्त्रिवचनं स्मृत्वा व्यचिन्तयत्,—"यथार्थवादिना मन्त्रिप्रवरेण सत्यमुक्तम्, 'ईश्व-रेच्छया यत् घटते, तन्मङ्गलाय' इति। ईश्वरे-च्छयैव मम क्षतं सञ्जातं, क्षतन्तु मङ्गलाय अभवत्; अक्षतश्चेदहम्, अवश्यमेव बलिदानार्हो भवेयम्" इति। ततः,—"हा मङ्गलमय जगदीश्वर! अनपराधिनं सत्यवादिनं मन्त्रिणं छलेन निघ्नतः मम का गतिर्भवेत्? क्व गच्छामि?" इत्येवं विललाप। "भवतु तावत्, तत्कूपसन्निधिम् अनु-सन्धाय गच्छामि" इत्युक्त्वा राजा कूपसन्निधिं

ययौ । तत्र गत्वा,—"भो मन्त्रिन् ! दर्शनं देहि, अपराधिनं मां क्षमस्व, मन्त्रिघातिनं मां भगवान् कस्मिन्निरये पातयिष्यति, तन्न जाने"। एवं विलपन्तं राजानं मन्त्री कूपमध्यादवोचत्,—"राजन् ! मा विलप, अहमीश्वरेच्छया न म्रिये, अल्पजलोऽयं कूपः" इति । राजा सहर्षं प्रक्षिप्तशिरोवेष्टनवस्त्रेण तमुद्दतारयत्, दस्युभिः स्वस्य आक्रमणात् परित्यागपर्य्यन्तं सर्ववृत्तान्तम् अश्रावयच्च । मन्त्री तस्मात् सर्ववृत्तान्तमाकर्ण्य अब्रवीत्,—"भो महाराज ! कृपानिधे ! भवता यदि कूपे नापातयिष्ये, तर्हि ते सत्वरं त्वामपहाय, निर्व्रणं मां निशितखड्गधारामुखेऽपातयिष्यन् ; परन्तु भवता मम प्राणरक्षा कृता, अतोऽहं ब्रवीमि,—'ईश्वरेच्छया यद्घटते, तन्मङ्गलाय' इति"। राजा सलज्जं सविनयं च मन्त्रिणं प्रोवाच,-"मन्त्रिवर ! मा मां लज्जय, एषः वृत्तान्तश्च कुत्रापि नैव वाच्यः, भवत्समीपे नितरामहं लज्जितोऽस्मि। अद्य तु सम्यगवगतं, मङ्गलमयस्य जगदीश्वरस्य कृपया समुद्भूता सर्वैव घटना मङ्गलमयीति,—

दैवं कार्य्यं सदा विज्ञैः ज्ञेयं श्रेयस्करं भुवि ।
संशयो नैव कर्त्तव्यः प्राणिनां श्रेयसे हि तत् ॥"

त्रयोदशः पाठः ।

अस्ति रत्नवती नाम नगरी । तत्र प्रियस्वदेशः चन्द्र इव लोचनसुभगकान्तिः चन्द्रदेवाऽऽख्यः कश्चित् नरपतिः प्रतिवसति स्म । तदा तादृशः कोऽपि स्वाधीनमनाः भूपतिः भुवि प्रायेण नाऽऽसीत् । स हि तात्कालिकस्य तेजोऽतिक्रान्त-तपनमण्डलस्य तपनदेवस्य राज्ञः अधीनतामसह-मानः परिवारवर्गपरिवृतः दृषद्बन्धुरं पार्वत्यप्रदेश-महर्निशं चंक्रमित्वा, आरण्यकैः फलमूलादिभिः कथमपि स्वजीवनमरक्षत् । तदीयः कनीयान् सोदरः नक्षत्रदेवः केनापि एकेनांशेन सर्व-प्रशंसितचरित्रस्य ज्यायसः चन्द्रदेवस्य सदृशी-भवितुं नाशकत्; परन्तु नितरामुद्धतस्वभावः एवाऽऽसीत् । कदाचित् अल्पमेव हेतुं लक्ष्यीकृत्य अग्रजेन सार्द्धं विवदमानः "अस्य समुचित प्रतिशोधं ग्रहीष्यामि" इत्युक्त्वा विपक्षस्य तपन-देवस्य शरणमाप स नक्षत्रदेवः ।

दुरवस्थामापन्नः चन्द्रदेवः स्वराज्यात् पलायितः पार्वत्यप्रदेशे भ्राम्यति, वार्त्तामेतां विदित्वा तपनदेवः तं रोद्धुं त्वरितं कैश्चित् योद्धृभिः सह चन्द्रदेवस्यैव भ्रातरं प्राहिणोत्। सोऽपि उपयुक्तं वैरनिर्यातनावकाशमुत्प्रेक्षमाणः तैः सह द्रुतपदमग्रजस्याभिमुखं प्रतस्थे; प्राप्य च ज्येष्ठोषितं स्थानम्, आश्रितपादपच्छायं, विश्रान्तनिद्रितं, विशाले ललाटपट्टके निन्दितमुक्ताफलाः स्थूलाः स्वेदकणिकाः बिभ्रतमग्रजमपश्यत्।

अस्मिन् क्षणे आयासमन्तरेणैवाग्रजस्यानिष्टमुत्पादयितुं समर्थोऽपि नक्षत्रदेवः प्राप्तहर्षान् वेगादायातः समभिव्याहारिणः सैनिकान् प्रेक्ष्य तारस्वरेणैवं वक्तुमुपाक्रमत,--"अरे रे सैनिकाः! मैवं स्वमनसि कुरुत यत्, निःसहायमेनं बद्धा प्रभुसकाशात् पर्य्याप्तं पारितोषिकं लप्स्यामः इति। भोः! मामेव सुप्तस्य अस्य सहायस्थाने गणयत"।

योद्धारस्ते एवं श्रुत्वा असिं निष्कास्य चन्द्रदेवं विहाय नक्षत्रदेवमाचक्रमुः; चिरम् असयसियुद्धं प्रवृत्तमासीत्; किन्तु नक्षत्रदेवः स्वविक्रमेण

सर्वानेव तान् एकैकशः जघान । ततः रुधिर-विच्छुरितकलेवरः ज्येष्ठभ्रातुः पदोपान्तभूमौ अव-तस्थे । सुप्तोत्थितः चन्द्रदेवः सहसा तथाऽवस्थं कनीयांसं विलोक्य चिन्तितवान्,—"अहो ! मम पुत्रकलत्रादिकं हत्वा मद्विनाशायैव समुपस्थितो-ऽयं, तत् न कालं प्रतीक्षे" इति । एवं विचिन्त्य उक्तम्,—"नक्षत्र ! आगच्छ, देहि मह्यं प्रति-शोधम्" । नक्षत्रस्तु एतावन्तं कालं लुप्तसंज्ञः अतिष्ठत्, ज्येष्ठस्य वचांसि श्रुत्वा लब्धज्ञानः छिन्नकबन्धान् शवान् प्रदर्श्याबादीत्,—"आर्य्य ! आर्य्य ! अयमेव मे प्रतिशोधः" ।

वाष्पसंरुद्धकण्ठः चन्द्रदेवस्तु तदैव कनीयां-समालिलिङ्ग । तदीयगूढाश्रुभिः नक्षत्रस्य कलङ्कः विधूतोऽभूत् । नक्षत्रदेवो भूयः अग्रजस्य स्नेह-मवाप्तः सन् परममानन्दमनुबभूव,—

उपकारैर्यथा वश्याः जायन्ते शत्रवो भुवि ।
प्रभूतैरपकारैस्तु न तथा स्यात् कदाचन ॥

चतुर्दशः पाठः।

आसीत् कर्मपुरसंज्ञके नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् ब्राह्मणकुमारः। बाल्ये वयसि विद्याऽर्जनपराङ्मुखः सः यौवनसीमानमधिरूढः सांसारिककष्टं सोढ़ुमक्षमः सन् तवस्थेनैव केनचित् दुष्टबुद्धिनाम्ना चौरेण संमिलितः अपहरण-विद्याऽनुशीलनेनैव कियन्तं कालमनैषीत्; अथवा उदरार्थं कामन्यां वृत्तिमवलम्बेत वराकः? अनया प्रक्रियया सुखमलभमानः कदाचित् दुष्टबुद्धिना सह धनवतः कस्यचित् वेश्मनि स्वविद्यायाः परिचयं प्रदातुं ग्रामान्तरं प्रस्थितः।

अथ चलन्तौ तौ पथि प्रवभ्ररचनानियुक्तान् कांश्चित् बालकान् प्रेक्ष्य सममं प्रोचतुः,—"भो बालकाः! न युक्तमेवं क्रीड़ितुम्; यदि कश्चित् गर्त्तेऽस्मिन् निपतेत्, तर्हि सः विकलाङ्गो भूत्वा सुचिरं क्लेशमनुभविष्यति"। निशम्यैतद् वचः क्रीड़तां तेषामेको जगाद,—"राजपथं सन्त्यज्य यदि कश्चित् कुमार्गगामी स्यात्, तर्हि तत्पतने को नाम दोषः?" इति।

अनेनैव वचसा प्रतिहतान्तःकरणः विप्रवटुः,—"अये ! कथेयं विशेषेण मामेव लक्ष्यीकरोति । कुमार्गं प्रधावितस्य मम एतादृशी महती क्लेशपरम्परा । एतेन गुरोरनुशासनसदृशेन बालवचसा मम ज्ञानाक्षि समुन्मीलितम् । अद्य प्रभृति पापमार्गं त्यक्ष्यामि" सशोकमेवं बहु विचिन्त्य सहचरं दुष्टबुद्धिम् अवादीत्,—"सखे ! यदि मां मित्रस्थाने परिगणयसि, यदि वा मम वचसि श्रद्धा वर्त्तते, तर्हि साधुजनजुगुप्सितम् अनिर्वृतिप्रायं त्यजतु भवानिमं पन्थानम् । वृत्तावस्थां संस्थितोऽहं मुहूर्त्तमपि शान्तिं न लब्धवानस्मि"। एवं श्रुत्वा स्मिताऽऽस्यः दुष्टबुद्धिः सहचरं विकृतचित्तं विभाव्य कर्त्तव्यानुष्ठानार्थं ग्रामाभिमुखं प्रययौ, ब्राह्मणस्तु स्वगृहं प्रति ।

गृहाऽऽगतेन तेन भर्तृमङ्गलकाङ्क्षिणी स्वभार्य्या व्यलोकि । दृष्ट्वा च सा अयथाकालं समुपस्थितं भर्त्तारमागमनप्रयोजनमपृच्छत् । सम्प्रति धर्ममतिः सः ब्राह्मण्यै आनुपूर्विकं सर्वं निवेद्य सकरुणमुच्चैः अक्रन्दत् । बुद्धिमती तद्भार्य्या स्थिरप्रकृतिमवलम्बमाना एव धर्म्यवाचा तदवस्थं

स्वामिनं बहु उपदिदेश। स ब्राह्मणस्तु सारगर्भामुपदेशमालामाकर्ण्यापि व्याकुलितमनाः 'राजदण्ड एव मे पापापहन्ता' एवं निश्चित्य कथमपि यामिनीमतिवाह्य प्रातः राज्ञः सभामण्डपं गत्वा, तत्र यथाकर्त्तव्यमनुष्ठाय सर्वं समाचचक्षे नृपालाय। धर्मभीरुः राजा तस्मै सेवावृत्तिपरिग्रहे मतिमदात्। राजाज्ञामेव सम्मान्य स दासत्वं चिकीर्षुः प्रतिगृहं धनिनां समगच्छत्, परं सर्वे एव तं चौरं सम्भाव्य स्वाऽऽलयात् दूरीचक्रुः। "अहो! कष्टम्! प्रथमं धृतचौरव्रतं, पश्चात् दत्तधर्ममानसमपि जनम् अन्यथा विशङ्कन्ते महाजनाः। किं कर्त्तुमुचितमधुना मम?" इत्येवं विमृशन् कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्य्यं कर्त्तुं जगाम, तया च वृत्त्या यत् किञ्चित् उपार्जयामास, तेनैव सुकष्टं परिवारवर्गमात्मानञ्चापुषत्।

एकदा निशीथे भार्य्यया सह तस्य दुरवस्थानिमित्तः संवादः समारब्धः। तत्र ब्राह्मणी आह,— "स्वामिन्! गच्छ त्वं प्रभाते जीविकाऽर्जनाय, अहं सुखोपायसमुद्भावनार्थं यतिष्ये"। ब्राह्मणस्तु

"तथा" इत्युक्त्वा समापितप्रातःकृत्यः प्रभोः चेत्रं गत्वा कठोरपरिश्रमं कृत्वा मध्यन्दिने सम्प्राप्तालयः काश्चित् ताम्रमुद्राः ब्राह्मण्यै प्रादात्। ततः तैलेनाभ्यज्य कलेवरं स्नातुं प्रस्थितं तमन्वगात् ब्राह्मणी। अवाप्तमरस्तोरा सा ता मुद्राः पयसि निक्षिप्य तासां पुनःसंग्रहे ब्राह्मणं न्ययोजयत्। उपायान्तरमनवलोक्य ब्राह्मणः सावधानमन्विष्य उपार्जितमुद्राणामर्द्धं लेभे। ततः ब्राह्मणी-वाक्यतः पुनर्निक्षिप्तोत्तोलिताः ता मुद्रा विगणय्य अर्द्धमेवोपार्जितानां लब्ध्वा स्तब्धीबभूव।

अथ ब्राह्मणीवाक्यतः दृढ़प्रतीतिरभूत् प्रच्छन्नभाग्यस्य यत्, अहं स्वामिनः कार्य्यं सुसम्पन्नं न करोमि, अत एव मे दुःखं नापास्तम्। परेऽह्नि ब्राह्मणः द्विगुणतरेण परिश्रमेण स्वामिनः कार्य्यं सम्पादयामास। प्रभुरपि परितुष्टः द्विगुणतरं वेतनमयच्छत्। एवं स्वामिनोऽनुकम्पां सम्प्राप्य संसारदुःखविनिर्मुक्त एकं गृहं निर्ममौ। काञ्चित् भूसम्पत्तिमपि उपार्जयामास।

अथ दुष्टबुद्धिः ब्राह्मणस्य सम्पदमसहिष्णुः

कदाचित् मध्यरात्रे तस्य धनादिकमपहर्त्तुकामः गृहपार्श्वे सन्धिखननसुयोगमनुसन्दधानः तस्थौ ।

अत्रान्तरे ब्राह्मणस्तु सुप्तोत्थितः व्याकुलितमनाः प्रियतमां सम्बोध्य कथयामास,—"प्रिये! महदद्भुतं दृष्टम्! निद्रितं मां काचित् दिव्या रमणी स्वरूपं प्रदर्श्य आदिदेश,—'वत्स! दुराचारः त्वम् एकदा मया त्यक्तः आसीः, अधुना प्रीताऽहं त्वां धनवन्तं कर्त्तुमागता। एहि मया सह, तत्र क्षेत्रसमीपे विशालाश्वत्थतरुतले यदस्ति, तत् स्वगृहमानय। तच्च धनं त्वदन्वये कदाऽपि न क्षयं गमिष्यति' इति"। तच्छ्रुत्वा ब्राह्मणी स्वामिने न्यवेदयत्,— "नाथ! विरम अस्मात् सम्भाव्यानिष्टपातात् लोभात्। परिश्रमलभ्यादन्यस्मै धनाय न स्पृहयामः वयम्। उत्साहवन्तं भवन्तं लक्ष्मीः स्वयमेवानुग्रहीष्यति"। ब्राह्मणः,—"तथा" इत्युक्त्वा पुनः शेते स्म। दुष्टबुद्धिरेतत् सर्वं ज्ञात्वा तदैव गत्वा तत् अश्वत्थमूलं चखान, एकं सुवर्णकलसञ्च उत्तोल्य तदावरणमुन्मोच्य गर्जन्तमेकं विषधरमपश्यत्। भीतः निराशश्च सः ब्राह्मणाय क्रुध्यन् सन् कमपि उपायमवलम्ब्य कलसं गृहीत्वा

ब्राह्मणगृहमभिप्रतस्थे । तत्र सन्धिं प्रकल्प्य तन्मध्यतः कलसं गृहाभ्यन्तरे निक्षिप्तवान् । अथ कलसात् विनिर्गतेन विषधरेण दष्टोऽसौ चौरो दुष्टबुद्धिः मृतश्च । सर्पोऽपि पलायाञ्चक्रे । कलसपातशब्देनैव ब्राह्मणः तत्पत्नी च जजागार । अल्पक्षणेनैव तद्गृहं राजयोग्यैः मणिमाणिक्यादिभिः पूरितं दम्पत्योर्मनसि विस्मयमुत्पादयामास ।

पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम् ।
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ॥

पञ्चदशः पाठः ।

पुराऽऽसीत् नलो नाम निषधाधिपतिर्नृपतिः । यस्य रूपेण एव विजितः कामोऽवमत्याऽऽत्मानं कोपितस्य त्रिपुरारेः नेत्राग्नौ तनुम् अजहात् । तेन अकृतदारेण विचिन्वता दमयन्ती इति भीमस्य विदर्भाधिपतेः सुता सुसदृशी अश्रावि । भीमेन अपि धरां विचिन्वता सर्वेषु राजसु नलात् अपरो राजा स्वदुहितुः सदृशः न

ददर्श । अत्रान्तरे दमयन्ती जलक्रीड़ाऽर्थं सरोवरमेकम् अवातरत् । तत्र कमपि राजहंसं दृष्टाम्बुजं दृष्ट्वा क्रीड़ाऽर्थं चिप्तोत्तरीया बबन्ध । स बद्धस्तां दिव्यहंसः दिव्यया गिरा समब्रवीत् —"राजपुत्रि ! ते महान्तम् उपकारं करिष्यामि, विमुञ्च माम्, अस्ति नैषधेषु नलो नाम राजा, यं हि सद्गुणैः गुम्फितं हारमिव हृदि दिव्याङ्गनाः सततं वहन्ति । तस्य त्वं सदृशी भार्य्या, स च तव सदृशः पतिः, तदत्र योग्यसंयोगे अहं युवयोः कामदूतो भवामि" । तदाकर्ण्य सा दिव्यहंसं तं सत्यवादिनं मत्वा "एवमस्तु" इतिवादिनी अमुञ्चत्, अगदच्च,—"न मया अन्यो नलात् वरणीयः" इति ।

ततश्च हंसोऽसौ निषधेषु आशु गत्वा जलक्रीड़ाप्रवृत्तेन नलेन सङ्गतं सरः समाश्रयत् । नलोऽपि तमपूर्वं राजहंसं दृष्ट्वा कौतुकाऽऽचिप्तचेताः स्वोत्तरीयेण तं बबन्ध । अथ बद्धोऽसौ राजहंसः मनुष्यगिरा समवादीत्,—"राजन् ! मुञ्च मां त्वदुपकारार्थम् आगतं, शृणु, यदहं कथयामि ।—

अस्ति विदर्भेषु भीमस्य राज्ञः सुता क्षिति-तलतिलोत्तमा देवैरपि स्पृहणीया दमयन्ती नाम। त्वद्गुणाऽऽकृष्टचेतसा तया त्वमेव भर्त्ता वृतः, तदहं वक्तुम् दूतस्त्वाम् उपागतः"। इत्येवं राजहंसस्य सफलोज्ज्वलैः वचोभिः पुष्पधन्वनो विशिखैश्च सममसौ नलोऽविध्यत; अब्रवीच्च.—"हंसराज! धन्योऽस्मि, योऽहं मूर्त्तया इव मनोरथसम्पत्त्या तया वृतः" इत्युक्त्वा तेन राज्ञा मुक्तोऽसौ हंसः गत्वा दमयन्त्यै यथावृत्तं यथाक्रमं शशंस, जगाम च स्वस्थानम्। दमयन्ती च सोत्कण्ठा युक्त्या मातृमुखेन निजं पितरं नल-प्राप्त्यै स्वयंवरम् अयाचत। राजा च विदर्भ-पतिस्तस्याः स्वयंवरम् अनुमत्य पृथिव्यां सर्वान् पार्थिवान् प्रति दूतान् व्यसर्जयत्। दूतमुखात् विदितवार्त्ताश्च भूमिपाः विदर्भान् प्रति व्रजन्ति स्म। नलोऽपि समुत्सुको रथाऽऽरूढश्चचाल। तावच्च इन्द्रादयो लोकपाला मुनेः नारदात् दमयन्त्याः नलप्रेमस्वयंवरौ शृण्वन्ति स्म। तेषु च इन्द्रवायुयमाग्निवरुणाः सम्मन्त्र्य समुत्सुकाः गच्छतः तस्य नलस्य एव अन्तिकं

समाजग्मुः, ऊचुश्च तं विनीतं विदर्भान् प्रति प्रस्थितं,—"राजन्! इतो गत्वा अस्मद्वचनात् दमयन्तीम् इदं वचः ब्रूहि, पञ्चानाम् अस्माकम् एकतमं वरय, मर्त्त्येन नलेन ते किम्? मर्त्त्याः मरणशीलाः, देवास्तु अमराः। नृपते! त्वञ्च अस्मद्वरात् अन्यैः अलक्षितः तत्पार्श्वं प्रवेक्ष्यसि" इति। नलोऽपि "तथा" इति देवाऽऽज्ञां शिरसि गृहीत्वा, गत्वा च अन्तःपुरं तस्याः, अलक्षित एव राजपुरुषैः शशंस सर्वं देवनिदेशं दमयन्त्यै। सा तु श्रुत्वा एतत् साध्वी प्राब्रवीत्,—"देवास्ते सन्तु तादृशाः, मम तु नल एव भर्त्ता, न प्रयोजनं मे देवैः" इति तस्या वचः श्रुत्वा नलः आत्मानं प्रकाश्य, गत्वा च यथावृत्तं देवेभ्यः समाचचक्षे। देवाश्च—"वश्या वयं ते स्मृतमात्रोपगामिनो भविष्यामः" इति तुष्टा वरं तस्मै नलाय प्रददुः। अथ हृष्टे नले विदर्भान् प्रति प्रयाते, तैश्च सुरेश्वरैः दमयन्त्या वचनं शुश्रुषुभिः विदर्भान् गत्वा नलरूपम् अधारि। ततश्च भीमसभां गत्वा स्वयंवरे प्रवृत्ते मर्त्त्यधर्मानुपाश्रिता देवा नलान्तिकमेव उपाविशन्।

अथ दमयन्ती स्वयंवरा स्वयंवरक्षेत्रमेत्य स्वेन भ्रात्रा समाविद्यमानान् एकैकशो नृपान् उज्झती क्रमात् नलान्तिकम् आगतवती ; दृष्ट्वा च तत्र छायानिमेषादिगुणान् षट् नलान् उपविष्टान् समुद्भ्रान्ता व्याकुला च समचिन्तयत्,-- "नूनं तैः लोकपालैः पञ्चभिर्मायया एषा परिकल्पिता, षष्ठञ्च एषां नलं मन्ये, न च अत्र मे अस्ति गतिः"। इत्यालोच्य एव साध्वी सा नलैकाऽऽसक्तमानसा आदित्याभिमुखी एवम् अब्रवीत्,—हे लोकपालाः ! यदि मे मनः स्वप्नेऽपि नलादन्यत्र न चलितं, तत्तेन सत्येन यूयं मे स्वस्वरूपं दर्शयत, कन्यायाः पूर्ववृतात् वरात् अन्ये परपुरुषाः, सा च कन्या तेषां परदाराः, तत् कथमेष मोहो युष्माकम् ?" एतच्छ्रुत्वा ते शक्रादयः पञ्च स्वेन स्वेन रूपेण तदा व्यराजन्, षष्ठस्तु सत्यनल एव अभवत्। अथ सा दमयन्ती तस्मिन् फुल्लेन्दीवरसन्निभतां दृशं वरणमालाञ्च संप्रहृष्टा समर्पयत्। पुष्पवृष्टिश्च तदानीं नभसः सम्बभूव। ततो राजा भीमः तस्य नलस्य तस्याश्च दमयन्त्या विवाहमङ्गलं व्यधात। तेन

च नृपेण विदर्भपतिना यथायथं कृतसत्क्रिया अपरे नृपा देवाश्च महेन्द्रादयः यथागतं प्रतिजग्मुः। गच्छन्तश्च शक्रादयः द्वौ आगच्छन्तौ पथि दमयन्त्यर्थं कलिद्वापरौ ददृशुः, ऊचुश्च,--"न गन्तव्यं विदर्भेषु युवाभ्यां, तत एव आगता वयं, वृत्तश्च असौ स्वयंवरः, नृपतिर्नल एव तया दमयन्त्या वृतः" इति। तौ ऊचतुः पापौ क्रोधपरीतौ,--"देवान् भवादृशान् हित्वा यत् स मर्त्यस्तया वृतः, तदवश्यम् आवां तयार्वियोगं करिष्यावः"। एवं कृतप्रतिज्ञौ तौ निवृत्य स्वस्थानं ययतुः। नलश्च सप्त दिवसान् श्वशुरसद्मनि स्थित्वा दमयन्त्या समं कृतार्थो निषधान् देशान् प्रत्यगमत्। तत्र तु दम्पत्योः तयोर्यथा प्रेम समभवत्, तथा गौरीशङ्करयोरपि न, गौरी शङ्करस्य देहार्द्धं, सा तु दमयन्ती तस्य नलस्य आत्मैव अभूत्।

कालेन सा दमयन्ती नलात् इन्द्रसेनं नाम तनयम् इन्द्रसेनाञ्च नाम कन्यकां क्रमात् प्रासूत। तावच्च कलिरसौ अनुक्षणमनुवर्त्तिनोऽपि नलस्य चिराय छिद्रं प्राप्य प्रतिज्ञार्थनिश्चितः समभवत। एकदाऽसौ नलः पानमदेन मुषित-

स्मृतिः अप्रक्षालितचरणः सन्ध्याम् अनुपास्यैव सुष्वाप। दिवानिशं दत्तदृष्टिः कलिः छिद्रमेतदवाप्य तस्य नलस्य शरीरमध्ये प्रविशत्। देहप्रविष्टेन च तेन कलिना अपहृतज्ञानः असौ नृपः धर्म्यमाचारम् अपहाय यथारुचि समाचचार। अक्षैः अदीव्यत्, दासीभिः अरंस्त, असत्यम् अब्रवीत्, दिवास्वप्नम् असेवत, रात्रिषु जजागार, अकारणं कोपं चकार, अन्यायेन अर्थमाददे, सताम् अवमानम् असताञ्च सम्मानं चकार। द्वापरश्च छिद्रं प्राप्य प्रविष्टान्तःशरीरः तस्य राज्ञः भ्रातरं पुष्कराऽऽख्यं समुत्सृष्टसत्पथं व्यधत्त।

कदाचित् नृपतिर्नलः भ्रातुः पुष्कराऽऽख्यस्य गृहे दानाऽऽख्यं सुन्दरं धवलं वृषं व्यलोकयत्। लोभाच्च तं वृषं मृगयमाणाय तस्मै ज्यायसे नलाय असौ द्वापरग्रस्तबुद्धिः पुष्कराऽऽख्यः न प्रादात्, अवादीच्च,—"यदि ते तस्मिन् वृषभे वाञ्छा अस्ति, तदा द्यूतेन मत्त एनं विजित्य गृहाण"। तदाकर्ण्य सोऽपि नलस्तथैव प्रतिपेदे। प्रवृत्तं भ्रात्रोरुभयोः परस्परं द्यूतम्। पुष्करा-

ऽऽख्यस्य धन स एव वृष:, नलस्य तु इभादीनि बहूनि । पुष्कराऽऽख्य: पुन: पुनर्जिगाय, नलस्तु अजीयत एव। इत्थं द्वित्रैर्दिनै: समग्रे बले कोशे च दुरोदरहारिते वार्य्यमाणोऽपि नल: नैव चचाल स्वव्यवसायात् कलिविप्लुतमति: ।

अथ क्रमेण समग्रं राज्यं हृतं विदित्वा दमयन्ती निजौ तनयौ रथमारोप्य स्वपितु: गृहं प्राहिणोत् । तत: सर्वं हारितम् अवलोक्य पुष्कराऽऽख्य: नलम् अब्रवीत्,—"त्वया अन्यत् सर्वं हारितम्, इदानीं मत्समक्षं दमयन्तीम् आनीय प्रतिपणं कुरु" । इत्युक्तिवात्यया अनल इव असौ नल: प्रजज्वाल, न च तत्काले किञ्चित् प्रत्युवाच, नापि तां पणीचकार । तत: पुष्कराऽऽख्य: समब्रवीत्,—"न करोषि चेत् भार्य्यापणं, तदस्मात् मम राज्यात् सभार्य्य: सत्वरं निर्याहि" । तत् श्रुत्वा एव नल: दमयन्त्या समं देशात् तस्मात् राजपुरुषै: आसीमान्तप्रवासित: निर्ययौ । हा कष्टं ! नलस्यापि कलिना एतादृशी अवस्था कृता, किमन्येषां क्षमीणामिव देहिनां !! धिक् ! धिक् ! राजर्षीणामपि ईदृशं वैक्लव्यदं विपदामाश्रयं द्यूतम् ।

अथ आहृतैश्वर्य्योऽसौ नलः विदेशं व्रजन् दमयन्त्या सह क्षुधापरीतः वनात् वनान्तरं प्रापत्। तत्र तया कुशक्षतसुकुमारचरणया सार्कं कस्मिंश्चित् सरित्तीरे विश्रान्तः चरन्तौ द्वौ हंसौ समैक्षत; दृष्ट्वा एव आहारार्थं तयोर्ग्रहणाय उत्तरीयकं निचिक्षेप, तौ च हंसौ तत् हृत्वा अन्तरीक्षं प्रजग्मतुः। ततश्च विस्मितोऽसौ नलः,— "हंसरूपेण तौ एव कलिद्वापरौ वासस्ते हृत्वा गतौ" इति अन्तरीक्षात् वाचः शुश्राव। अथ स राजा एकवस्त्रः विमनाश्च युक्त्या दमयन्त्यै पितुर्गृहगमनाय पन्थानम् अदर्शयत्,—"हे प्रिये! अयं पितृगृहगमनाय विदर्भजनपदमार्गः, एषः अङ्गदेशगमनमार्गः, असौ च कोसलजनपदपथः"। तदाकर्ण्य सा दमयन्ती—"किमर्थं माम् आर्य्यपुत्रस्त्यक्ष्यन् इव मार्गं वदति?" इति शङ्किता इव अभवत्। ततः तौ दम्पती फलमूलभुजौ तत्र वने निशायां श्रान्तौ कुशसंस्तरे समविशताम्। क्रमेण अध्वखिन्ना दमयन्ती निद्राम् अवाप। नलस्तु कलिमोहितो गन्तुमनाः समुत्थाय एकवस्त्रः तां दमयन्तीं विमुच्य छिन्नं तदुत्तरीयार्द्धं प्राहृत्य च

प्रययौ। दमयन्ती तु रात्र्यर्द्धे प्रबुध्य तं पतिम् अपश्यन्ती समन्तात् विचित्य क्लिन्नमम,—"हा आर्य्यपुत्र! महासत्त्व! रिपुषु अपि कृपालो! हा मत्प्रियतम! केनासि मयि निष्करुणीकृतः? एकाकी च कथं पद्भ्याम् अटवीषु विचरिष्यसि? कस्ते श्रमापनयनाय सलिलादिदानेन सेवां करिष्यति? यौ च ते चरणाम्बुजौ महीभुजां मौलिमालापरागेण सततं रञ्जितौ, किं तौ धूलिः कलुषयिष्यति? यच्च तेऽङ्गं हरिचन्दन-चूर्णेन आलिप्तं, तत् कथं मध्याह्नार्कातपं सहिष्यते? किं मे शिशुना पुत्रेण, दुहित्रा, वा आत्मना? तव एकस्यैव शिवं देवाः कुर्वन्तु, यदि अहं सती"। इत्येवम् अनुशोचन्ती एकाकिनी दमयन्ती तत्-पूर्वदर्शितेन पथा शनैः प्रतस्थे। कथञ्चित् सा नदीशैलवनानि अतिचक्राम, न अतिचक्राम तु भर्त्तरि ऐकान्तिकीं भक्तिम्। सतीतेजश्च मार्गे ताम् अरक्षत्, येन दमयन्तीं ग्रसन्तं भुजङ्गं निघ्नन् कश्चित् लुब्धकः तां कामयमानः क्षणा-देव भस्मसात् अभूत्। ततो दैवात् वणिक्-सार्थेन अन्तरा मिलितेन सह गत्वा सुबाहुनाम्नः

नरपतेः पुरं प्राप । तत्र च राजमाता प्रासाद-शिखरगता दूरात् तां राजपुत्रीम् इव सौन्दर्य्य-समुज्ज्वलां दृष्ट्वा स्वात् हर्म्यतः अवतीर्य्य दासीभिः ससत्कारम् आनाय्य स्वान्तिकमवासयत् । सा तु तस्या महादेव्याः सकाशे सततं भर्त्तृत्यक्तेति विमनाः समतिष्ठत । तावच्च तस्याः पिता भीमनरपतिः तं नलोदन्तम् अवगत्य तयोर्दम्पत्योः अन्वेषणाय आप्तान् द्विजान् व्यसर्जयत् । तेषाञ्च सुदेवो नाम एकः ब्राह्मणः दमयन्त्याः भ्रातृसखः भ्रमन् तां सुबाहुराजधानीं प्राप । स तु तत्र तां दमयन्तीं सुदुःखिताम् आगत्य समुदैक्षत, साऽपि तं तथैव भ्रातृसखम् अद्राक्षीत् ।

अथ अन्योन्यं प्रत्यभिज्ञाय समेत्य तौ तथा रुदितः स्म, यथा राजमाता न किमपि अबुध्यत । यावच्च सा देवी तौ यथावत् वस्तु अपृच्छत्, तावत् तां दमयन्तीं स्वां भगिनीसुतां बुबुधे । ततः सा तद्वृत्तान्तं पुत्राय आवेद्य तां यथोचितं सम्मान्य रथारूढ़ां कृत्वा प्रभूतसैनिकसहितां पितृगृहं प्रैषयत् । तत्र सा दमयन्ती प्राप्तापत्यद्वया पित्रा प्रबोध्यमानाऽपि सततं पत्यवार्त्तां विचिन्वती

व्यतिष्ठत। ततश्च तत्पिता समन्ततः तं नलं सूदस्यन्दनविद्याभ्यां दिव्याभ्याम् उपेतं समन्वेष्टुं चारान् व्यसर्जयत्, आदिशच्च,—“भवद्भिः यत्र स स्थितः सम्भाव्यते, तत्र एवं वक्तव्यं, यथा,--‘हे नृशंस! चन्द्र! बालां वने प्रसुप्तां कान्तां कुमुदिनीं सन्त्यज्य अम्बरखण्डं प्राप्य च अदृश्यः क्व यातोऽसि?’ इति”।

अत्रान्तरे स राजा नलश्च तस्मिन् वने निशि प्राप्ततार्द्धपटो दूरं गत्वा दावाग्निम् ऐचत, अपश्यच्च तत्र,—“भो महासत्त्व! यावदहं न दह्ये अनेन दावाग्निना, तावत् माम् अस्य समीपात् अपसारय” इति वदन्तम्, आवद्धमण्डलं, फणारत्नप्रभाजालजटिलं, वनवह्निना उद्यहेतिहस्तेन शिरसि गृहीतमिव कञ्चन नागम्। यावच्च स उपेत्य कृपया तं दूरतो नीत्वा त्यजति, तावत् स नागः तम् अब्रवीत्,—“भद्र! इतः पदानि दश गणयित्वा मां नय”। ततः स नलः पदानि गणयन् एव दश प्रययौ। “एकं, द्वौ, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्टौ, नव, दश” इति उक्तवन्तं तं नलं स्कन्धस्थितो नागो ललाटान्ते अदशत्। तेन च असौ नृपः ह्रस्वभुजः कृष्णः विरूपश्च अभवत्।

ततः स राजा स्कन्धात् अहिम् अवतार्य्य पृष्टवान्,—"को भवान्? त्वया च कीयं मे प्रत्युपक्रिया कृता?" एतत् तस्य वचः श्रुत्वा स नागः तम् अब्रवीत्,—"राजन्! कर्कोटनामानं नागराजं माम् अवगच्छ, दंशोऽयञ्च मया कृतस्ते गुणाय एव, पश्चात् वेत्स्यसि। गूढ़ाऽऽवासे च वैरूप्यं महतां कार्य्यसिद्धये, गृहाण च अग्निशौचाऽऽख्यमिदं मद्दत्तं वसनद्वयम्, अनेन प्रावृतेन च सुरूपं पुनः प्रतिपत्स्यसे" इत्युक्त्वा दत्ताग्निशौचवसनयुगे कर्कोटके गते, नलः तस्मात् प्रदेशात् गत्वा कोसलान् प्रत्यपद्यत। तत्र स कोसलाधिपस्य ऋतुपर्णस्य बाहुकनामा सन् सारथ्यम् अकरोत्। तस्य च दिव्यरसानि भोजनानि पपाच, तेन, रथचर्य्याविज्ञानतश्च स परां प्रसिद्धिम् अगमत्।

एवं गच्छत्सु कालेषु एकदा विदर्भराजचाराणां कश्चित् तत्र समाययौ। स तु चारः,—"अत्र सूदरथविद्ययोर्नलतुल्यः कश्चित् बाहुक इति सारथिः अस्ति" इति वचः शुश्राव। ततश्च स तं

नृपतेः आस्थाने स्थितं दृष्ट्वा नलं सम्भाव्य युक्त्या तव एतां प्रभुणा उपदिष्टाम्—

'बालां वने प्रसुप्तां नृशंस! मन्त्यज्य कुमुदिनीं कान्ताम्।
प्राप्यैवाम्बरखण्डं चन्द्र! अदृश्यः क्व यातोऽसि?'॥

इति आर्य्यां पपाठ। तत्रस्थाश्च जनाः तदाकर्ण्य उन्मत्तवाक्यमिव मेनिरे। छद्मस्थितस्तु सारथिः तं प्रत्युवाच,—"अम्बरैकदेशवर्त्ती क्षीणश्चन्द्रः अन्य-मण्डलं प्राप्य प्रविशन् कुमुदिन्या यत् अदृश्यः, तत् तस्य का नृशंसता?" एतत् तदुत्तरं श्रुत्वा सत्यमेव तं नलं विपदुद्भूतवैरूप्यं सम्भाव्य स चारस्ततः प्रययौ; आगत्य च विदर्भेषु दमयन्त्यै तत् सर्वं दृष्टं श्रुतञ्च समवर्णयत्। ततः सा दमयन्ती रहसि स्वैरं मातरम् अब्रवीत्,— "मातः! सत्यमेव असौ आर्य्यपुत्रः सारथिव्याजम् उपाश्रितः, तस्मात् तदानयने मन्मतानुसारिणी युक्तिर्विधीयताम्; न चायमुदन्तः पितरि त्वया कदाचन विज्ञापयितव्यः। तस्य ऋतुपर्णस्य राज्ञः समीपे दूतो विसृज्यते। गतेन च तेन दूतेन स राजा तत्र भण्यतां, यथा—'नलः क्वापि गतः, न अद्यापि तद्वार्त्ता श्रूयते, तत् प्रातरेव दमयन्ती

भूयः स्वयंवरं कुरुते, अतोऽद्यैव त्वया विदर्भेषु शीघ्रम् आगम्यताम्' इति । ततः श्रुत्वा एतां वार्त्तां रथचर्य्यानिपुणेन आर्य्यपुत्रेण स राजा एकाह्नेन एव ध्रुवम् इह आनेतव्यः" इत्येवं मातरम् अभिधाय दमयन्ती तं सुदेवनामानं दूतमेवं सन्दिश्य कोसलेषु व्यसृजत् । तेन च तूर्णं गत्वा तथैवोक्तः स ऋतुपर्णः समुत्सुकः श्यतत्त्वज्ञं तं पार्श्वगं नलं समानयन् जगाद,--"बाहुक ! 'रथज्ञानं मम अस्ति' इति अवदत् भवान्, तत् यदि शक्नोषि, तर्हि शीघ्रम् अद्यैव मां विदर्भान् प्रापय" । तदाकर्ण्य नलः,—"बाढं प्रापयामि" इत्युदीर्य्य गत्वा वराश्वान् संयोज्य रथोत्तमं सज्जीचकार । "स्वयंवरप्रवादोऽयं केवलं मत्प्राप्तये नूनं तया कल्पितः, न तु सा स्वप्नेऽपि ईदृशी सम्भवति । तत् यावदहं तत्र गच्छामि, पश्यामि च ताम्" इति विचिन्त्य तस्य ऋतुपर्णस्य राज्ञः रथम् उपानयत् । ततश्च तस्मिन् रथम् आरूढे नृपे नलः तार्च्यंजवजेतेण रंहसा रथं वाहयितुं प्रववृते । पथि रथवेगच्युतं वस्त्रं ग्रहीतुं रथविधारणं कर्त्तुकामम् ऋतुपर्णं नलः प्रोवाच,—"राजन् !

क्व तव वस्त्रम् ? अनेन चणेन अयं ते रथः बहूनि योजनानि व्यतिक्रान्तः"। श्रुत्वा एतत् ऋतुपर्णः तम् अवादीत्,—"बाहुक! देहि मे इदं रथज्ञानम्, अहं ते अक्षज्ञानं ददामि, येन अक्षा वश्या भवन्ति, संख्याज्ञानञ्च जायते। साम्प्रतमेव पश्य, ते विश्वासं जनयामि, यः पुरतोऽयं कलितरुः विद्यते, अस्य फलपत्राणां संख्यां वच्मि, गणयित्वा एतं पश्य"। इत्युक्ता स ऋतुपर्णः यावन्त्येव फलपर्णानि जगाद, तावन्ति एव नलेन अस्य तरोः गणितानि। ततो नलः ऋतुपर्णाय रथज्ञानं प्रादात्। ऋतुपर्णोऽपि तस्मै अक्षज्ञानं तत् प्रददौ। अथ नलः अपरे तरौ तज्ज्ञानं परीक्षते स्म, सम्यग् बुबुधे च। ततो यावत् स नलः हृष्यति, तावत् तस्य शरीरतः कृष्णकायः कश्चित् पुरुषः निरगात्। "कोऽसि?" इत्युक्ता क्रोधात् शप्तुमिच्छन्तं तं स पुरुषः कृताञ्जलिः प्राब्रवीत्,—"अहं कलिः, दमयन्तीहृतस्य ते शरीरम् ईर्ष्यया प्राविशं, तेन ते श्रियः तादृशीं दशाम् अवाप्ताः, वने च कर्कोटकेन त्वं दष्टोऽपि न दग्धः, अहन्तु

त्वयि स्थितः दग्धः एव। पश्य, मिथ्या परापकारः न हि कस्यापि धर्माय भवति, तदिदानीं गच्छामि एषः, शुभं ते भूयात्" इति अभिधाय तमेव तरुं प्रविवेश। नलश्च तत्त्वणात् प्राप्तधर्ममतिः प्राग्वत् अभवत्। अथ रथम् आरुह्य तस्मिन्नेव अह्नि तेनैव जवेन तम् ऋतुपर्णं विदर्भान् अनयत्। आगत्य च पृष्टाऽऽगमनकारणेन भीमेन सत्कृतः, विस्मितश्च किमपि स्वयंवरचिह्नमदृष्ट्वा राजा ऋतुपर्णः "भवन्तं द्रष्टुमागतोऽस्मि" इत्युक्त्वा राजनिर्दिष्टवेश्मनि समाविशत्। दमयन्ती तु आश्चर्य्यं रथशब्दम् आकर्ण्य सम्भावितनलाऽऽगमना तं नलं प्राप्तं बुद्ध्वा जहर्ष, विससर्ज च तत्त्वम् अन्वेष्टुं स्वां चेटिकाम्। सा च चेटी अन्विष्य आगता तां प्रियोत्सुकाम् उवाच,—"देवि! मया गत्वा अन्विष्टं, य एषः कोसलेश्वरः ऋतुपर्णस्ते स्वयंवर-प्रवादं श्रुत्वा आगतः, स एकेन ह्रस्वबाहुना रथविज्ञानशालिना सूदकर्म्माभिज्ञेन च रथवाहेन एकेन अश्वैः आनीतः। स च सूदशालायां गत्वा मया निरीक्षितः कृष्णवर्णः विरूपश्च; परं तस्य कोऽपि प्रभावः यत्, अक्षिप्तमपि पानीयं तस्य

चरुषु उत्थितं, काष्ठान्यपि अनर्पितानलानि स्वयं प्रज्वलितानि। क्षणेन च तत्तत् भोजनीयं दिव्यं निष्पन्नम्। एतत् महाश्चर्य्यं दृष्ट्वा अहमिह आगता” इति।

एतदाकर्ण्य चेटीमुखात् दमयन्ती व्यचिन्तयत्,—“यदयं वय्ह्याग्निवरुणाः रथविद्यारहस्यविच्च, तदयमेव आर्य्यपुत्रः, मन्ये, मद्विप्रयोगेण वैरूप्यं गतः, तदहम् अमुं पृच्छामि” इति सङ्कल्प्य, युक्त्या तया चेटिकया सह द्वौ दारकौ दर्शयितुं तदन्तिकं प्रैषयत्। स च नलः तौ निजौ सुतौ दृष्ट्वा अङ्के कृत्वा चिरं बद्धाश्रुधारः समरोदीत्, अवादीच्च तां चेटीं वार्त्तां पृच्छन्तीम्,—“ईदृशौ एव मे बालौ मातामहगृहे स्थितौ, तत्स्मरणात् मे दुःखं जातम्” इति। सा तु चेटी शिशुभ्यां सह आगत्य दमयन्त्यै तत् सर्वं यथावत् शशंस। साऽपि तेन सम्यक् विश्वस्ता अभवत्। पुनश्च सा स्वां चेटीं समादिशत्,—“सखि! गत्वा त्वं मद्वचनात् तं सारथिं वद,—‘श्रुतं मया यत्, भवता तुल्यो नान्योऽस्ति कश्चित् सूपकृत्, तदद्य त्वया आगत्य मम व्यञ्जनं निष्पाद्यताम्’

इति" । तथेति स तया चेष्टया समभ्यर्थितः, ऋतुपर्णम् अनुज्ञाप्य दमयन्तीम् उपाययौ । अथ तं दृष्ट्वा सा दमयन्ती प्राब्रवीत्,—"सत्यं ब्रूहि, यदि त्वं नलो राजा सूतरूपधारी, चिन्ताऽब्धिमग्नं मां समुत्तारय" इति । स तु श्रुत्वा नलः स्नेहहर्षदुःखलज्जाजडः अवाङ्मुखः अश्रुगद्गदं ताम् अवादीत्,—"देवि ! स एवास्मि नलः पापः कुलिशकर्कशः, येन त्वां सन्तापयता व्यामोहात् अनलायितम्" । ततः सा अब्रवीत्,— "कथं त्वया ईदृशं वैरूप्यमासादितम् ?" ततः स नलः तस्यै सर्वं स्वादन्तम् आकर्कोटसख्यात् कलिनिर्गमनान्तम् अवर्णयत् । तत्क्षणाच्च सः कर्कोटदत्तम् अग्निशौचं तत् वस्त्रयुग्मं प्रावृत्य स्वं रूपं प्रत्यपद्यत । ततस्तं प्राप्ताभिरामरूपं नलं दृष्ट्वा सा दमयन्ती विकसद्वदनारविन्दा नेत्राम्बुभिः शमितदुःखाग्निः कमपि अनुपमं हर्षम् अवाप । अथ एतद्वृत्तान्तं परिजनमुखात् आकर्ण्य विदर्भनाथः नलं समभिनन्द्य प्रपूज्य च, पुरं महोत्सवपूर्णम् अकार्षीत् ; व्यसर्जयच्च कृतयथोचितसत्क्रियं श्रुतनलोदन्तहृष्टम् ऋतुपर्णं

कोसलान् प्रति । ततश्च नलः निषधान् गत्वा तं पुष्कराऽऽख्यम् अक्षज्ञानेन पुनर्विजित्य, धर्माचाररतः दैवात् गतद्वापरम् अनुजं तं कृतसंविभागं कृत्वा दमयन्त्या सह राज्यं सुखेन अशासत् ।

षोड़शः पाठः ।

सद्भिरासीत सततं सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवादं मैत्रीञ्च नासद्भिः किञ्चिदाचरेत् ॥ १ ॥
पण्डितैश्च विनीतैश्च धर्मज्ञैः सत्यवादिभिः ।
बन्धनस्थोऽपि तिष्ठेत न तु राज्ये खलैः सह ॥ २ ॥
सावशेषाणि कार्य्याणि कुर्वन्नर्थैश्च युज्यते ।
तस्मात् सर्वाणि कार्य्याणि सावशेषाणि कारयेत् ॥ ३ ॥
मधुदेव दुहेद्राष्ट्रं कुसुमञ्च न पातयेत् ।
वत्सापेक्षो दुहेत् क्षीरं भूमिं गाञ्चैव पार्थिवः ॥ ४ ॥
यथा क्रमेण पुष्पेभ्यश्चिनुते मधु षट्पदः ।
तथा वित्तमुपादाय राजा कुर्वीत सञ्चयम् ॥ ५ ॥
वल्मीकं मधुजालञ्च शुक्लपक्षे तु चन्द्रमाः ।
राजद्रव्यञ्च भैक्ष्यञ्च स्तोकस्तोकेन वर्द्धते ॥ ६ ॥
अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम् ।
अवन्ध्यं दिवसं कुर्य्याद्दानाध्ययनकर्म्मसु ॥ ७ ॥

वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्म्मणि यः प्रवर्त्तते
निवृत्तरागस्य गृहं तपोवनम् ॥ ८ ॥

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते पात्रं कुलं शीलेन रक्ष्यते ॥ ९ ॥

वरं विन्ध्याटव्यां निवसनमभुक्तस्य मरणं
वरं सर्पाऽऽकीर्णे शयनमथ कूपे निपतनम् ।
वरं भ्रान्ताऽऽवर्त्ते सभयजलमध्ये प्रविशनं
न तु स्वीये पक्षे तु धनमणु देहीति कथनम् ॥ १० ॥
भाग्यक्षयेषु क्षीयन्ते नोपभोगेन सम्पदः ।
पूर्वार्जिते हि सुकृते न नश्यन्ति कदाचन ॥ ११ ॥
विप्राणां भूषणं विद्या पृथिव्या भूषणं नृपः ।
नभसो भूषणं चन्द्रः शीलं सर्वस्य भूषणम् ॥ १२ ॥
माता यदि भवेल्लक्ष्मीः पिता साक्षाज्जनार्दनः ।
कुबुद्धिप्रतिपत्तिश्चेत् तद्दण्डं विहतं सदा ॥ १३ ॥
येन येन यथा यद्वत् पुरा कर्म सुनिश्चितम् ।
तत्तदेवान्तरा भुङ्क्ते स्वयमाहितमात्मनः ॥ १४ ॥
आत्मना विहितं दुःखमात्मना विहितं सुखम् ।
गर्भशय्यामुपादाय भुङ्क्ते वै पौर्वदेहिकम् ॥ १५ ॥
न चान्तरीक्षे न समुद्रमध्ये न पर्वतानां शिखरप्रदेशे ।
न मातृमूर्ध्नि प्रधृतस्तथाऽङ्के त्यक्तुं क्षमः कर्म कृतं नरो हि ॥१६॥
दुर्गस्त्रिकूटः परिखा समुद्रो रक्षांसि योधाः परमा च वृत्तिः ।
शास्त्रञ्च वै तूशनसा प्रदिष्टं स रावणः कालवशाद्विनष्टः ॥१७॥
यस्मिन् वयसि यत्काले यद् दिवा यच्च वा निशि ।
यन्मुहूर्त्ते क्षणे वाऽपि तत्तथा न तदन्यथा ॥ १८ ॥
गच्छन्ति चान्तरीक्षे वा प्रविशन्ति महीतले ।
धारयन्ति दिशः सर्वा नादत्तमुपलभ्यते ॥ १९ ॥
पुराऽधीता च या विद्या पुरा दत्तञ्च यद्धनम् ।
पुरा कृतानि कर्माणि ह्यग्रे धावन्ति धावतः ॥ २० ॥
कर्माण्यत्र प्रधानानि सम्यगृक्षे शुभग्रहे ।
वशिष्ठकृतलग्नोऽपि जानकी दुःखभाजनम् ॥ २१ ॥

नाल्पीयति हि सद्विद्या दीयमानाऽपि वर्द्धते।
कूपस्थमिव पानीयं भवत्येव बहूदकम्॥ २२॥
येऽर्था धर्मेण ते सत्या ये धर्मेण गताः श्रियः।
धर्मार्थी च महान् लोके तत् स्मृत्वा ह्यर्थकारणात्॥ २३॥
अन्नार्थी यानि दुःखानि करोति कृपणो जनः।
तान्येव यदि धर्मार्थी न भूयः क्लेशभाजनम्॥ २४॥
सर्वेषामेव शौचानामन्नशौचं विशिष्यते।
योऽन्नार्थैः शुचिः भूतो न मृदा वारिणा शुचिः॥ २५॥
सत्यः शौचं मनः शौचं शौचमिन्द्रियनिग्रहः।
सर्वभूते दया शौचं जलशौचञ्च पञ्चमम्॥ २६॥
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः।
सत्यं हि वचनं यस्य सोऽश्वमेधाद्विशिष्यते॥ २७॥
मृत्तिकानां सहस्रेण उदकानां शतेन च।
न शुध्यति दुराचारो भावोपहतचेतनः॥ २८॥
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते॥ २९॥
न प्रहृष्यति सम्मानै नावमानेन कुप्यति।
न क्रुद्धः परुषं ब्रूयादेतत् साधोस्तु लक्षणम्॥ ३०॥
दरिद्रस्य मनुष्यस्य प्राज्ञस्य मधुरस्य च।
काले श्रुत्वा हितं वाक्यं न कश्चित् परितुष्यति॥ ३१॥
न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च।
अलभ्यं लभ्यते मर्त्त्यैस्तत्र का परिदेवना?॥ ३२॥
अयाचितो मया लब्धो लब्धोऽपि च पुनर्गतः।
यत्राऽऽगतस्तत्र गतस्तत्र का परिदेवना?॥ ३३॥
एकवृक्षे यथा रात्रौ नानापक्षिसमागमः।
प्रभातेऽन्यदिशं यान्ति का तत्र परिदेवना?॥ ३४॥

एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्त्वेकस्त्वरितो याति का तत्र परिदेवना ? ॥ ३५ ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक ! ।
अव्यक्तनिधनान्येव का तत्र परिदेवना ? ॥ ३६ ॥
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
कुशाग्रेण तु संस्पृष्टः प्राप्तकालो न जीवति ॥ ३७ ॥
लब्धव्यान्येव लभते गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥ ३८ ॥
आचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वकालं नातिवर्त्तन्ते तथा कर्म पुरा कृतम् ॥ ३९ ॥

शीलं कुलं नैव न चैव विद्या
ज्ञानं गुणा नैव न बीजशुद्धिः ।
भाग्यानि पूर्वं तपसाऽर्जितानि
काले फलन्तीह यथैव वृक्षाः ॥ ४० ॥

तत्र मृत्युर्यत्र हन्ता तत्र श्रीर्यत्र सम्पदः ।
तत्र तत्र स्वयं याति प्रेर्यमाणः स्वकर्मभिः ॥ ४१ ॥
भूतपूर्वं कृतं कर्म कर्त्तारमनुतिष्ठति ।
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ॥ ४२ ॥
एवं पूर्वकृतं कर्म कर्त्तारमनुतिष्ठति ।
सुकृतं भुङ्क्ष्व चात्मीयं मूढ ! किं परितप्यसे ? ॥ ४३ ॥
यथा पूर्वकृतं कर्म कर्त्तारमनुतिष्ठति ।
एवं पूर्वकृतं कर्म शुभं वा यदि वाऽशुभम् ॥ ४४ ॥
नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥ ४५ ॥
रागद्वेषादियुक्तानां न सुखं कुत्रचित् द्विज ! ।
विचार्य्य खलु पश्यामि तत् सुखं यत्र निर्वृतिः ॥ ४६ ॥

यत्र स्नेहो भयं तत्र स्नेहो दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत् सुखम्॥ ४७॥
शरीरमेवाऽऽयतनं दुःखस्य च सुखस्य च।
जीवितञ्च शरीरञ्च जात्यैव सह जायते॥ ४८॥
सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः॥ ४९॥
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्।
सुखं दुःखं मनुष्याणां चक्रवत् परिवर्त्तते॥ ५०॥
यद् गतं तदतिक्रान्तं यदि स्यात्तच्च दूरतः।
वर्त्तमाने च वर्त्तेत न च शोकेन बाधितः॥ ५१॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।
कारणादेव जायन्ते मित्राणि रिपवस्तथा॥ ५२॥
शोकत्राणं भयत्राणं प्रीतिविश्वासभाजनम्।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्?॥ ५३॥
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति॥ ५४॥
न मातरि न दारेषु न सोदर्य्ये न चाऽऽत्मजे।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे॥ ५५॥
यदीच्छेत् शाश्वतीं प्रीतिं त्रीणि दोषाणि वर्जयेत्।
द्यूतमर्थप्रयोगञ्च परेषां दारदर्शनम्॥ ५६॥
नात्मच्छिद्रं परे दद्याद्विद्याच्छिद्रं परस्य च।
रक्षन् कूर्म इवाङ्गानि परभावञ्च लक्षयेत्॥ ५७॥

कुचेलिनं दन्तमलापधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम्।
सूर्य्योदये ह्यस्तमयेऽपि शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम्॥ ५८॥

गवां रजो धान्यरजः पुत्रस्याङ्गभवं रजः ।
एतद्रजो महाशस्तं महापातकनाशनम् ॥ ५९ ॥
अजारजः खररजो यत्तु सम्मार्जनीरजः ।
एतद्रजो महापापं महाकिल्बिषकारकम् ॥ ६० ॥
शूर्पवातो नखाग्राम्बु स्नानवस्त्रमृजोदकम् ।
केशाम्बु मार्जनीरेणुः हन्ति पुण्यं पुरा कृतम् ॥ ६१ ॥
विप्रयोर्विप्रवह्न्योश्च दम्पत्योः स्वामिनोस्तथा ।
अन्तरेण न गन्तव्यं हयस्य वृषभस्य च ॥ ६२ ॥
स्त्रीषु राजाग्निसर्पेषु स्वाध्याये शत्रुसेवने ।
भोगाऽऽस्वादेषु विश्वासं कः प्राज्ञः कर्त्तुमर्हति ? ॥ ६३ ॥
न विश्वसेदविश्वस्तं विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलादपि निकृन्तति ॥ ६४ ॥
वैरिणा सह सन्धाय विश्वस्तो यदि तिष्ठति ।
स वृक्षाग्रे प्रसुप्तो हि पतितः प्रतिबुध्यते ॥ ६५ ॥
नात्यन्तं मृदुना भाव्यं नात्यन्तं क्रूरकर्मणा ।
मृदुनैव मृदुं हन्ति दारुणेनैव दारुणम् ॥ ६६ ॥
नात्यन्तं सरलैर्भाव्यं नात्यन्तं मृदुना तथा ।
सरलास्तत्र छिद्यन्ते कुब्जास्तिष्ठन्ति पादपाः ॥ ६७ ॥
नमन्ति फलिनो वृक्षा नमन्ति गुणिनो जनाः ।
शुष्कवृक्षाश्च मूर्खाश्च भिद्यन्ते न नमन्ति च ॥ ६८ ॥
अप्रार्थितानि दुःखानि यथैवाऽऽयान्ति यान्ति च ।
सम्पदश्च तथाऽऽयान्ति क्षणात् यान्ति तथैव च ॥ ६९ ॥
पूर्वं पश्चाच्चरन्त्यार्य्ये सदैव बहुसम्पदः ।
विपरीतमनार्य्ये च यथेच्छसि तथा चर ॥ ७० ॥
षट्कर्णो भिद्यते मन्त्रश्चतुःकर्णश्च धार्य्यते ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माऽप्यन्तं न बुध्यते ॥ ७१ ॥

तथा गवा किं क्रियते ? या न दोग्ध्री न गर्भिणी।
कोऽर्थः पुत्रेण जातेन यो न विद्वान धार्मिकः ? ॥ ७२ ॥
एकेनापि सुपुत्रेण विद्यायुक्तेन धीमता।
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा ॥ ७३ ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वनं सुवासितं सर्वं सुपुत्रेण कुलं यथा ॥ ७४ ॥
एको हि गुणवान् पुत्रो निर्गुणेन शतेन किम् ?।
चन्द्रो हन्ति तमांस्येको न च ज्योतिः सहस्रशः ॥ ७५ ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताड़येत्।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत् ॥ ७६ ॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम्।
म्रियमाणो हरेत् प्राणान्नास्ति पुत्रसमो रिपुः ॥ ७७ ॥
केचिन्मृगमुखा व्याघ्राः केचिद् व्याघ्रमुखा मृगाः।
तत्स्वरूपपरिज्ञाने ह्यविश्वासः पदे पदे ॥ ७८ ॥
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ७९ ॥
एतदेवानुमन्येत भोगा हि क्षणभङ्गिनः।
स्निग्धेषु च विदग्धस्य मतयो वै ह्यनाकुलाः ॥ ८० ॥
ज्येष्ठः पितृसमो भ्राता मृते पितरि शौनक !।
सर्वेषां स पिता हि स्यात् सर्वेषामनुपालकः ॥ ८१ ॥
कनिष्ठेषु च सर्वेषु समत्वेनानुवर्त्तते।
समोपभोगजीवेषु यथैव तनयेषु च ॥ ८२ ॥
बहूनामल्पसाराणां समुदायो हि दारुणः।
तृणैरावेष्टिता रज्जुस्तया नागोऽपि बध्यते ॥ ८३ ॥
अपहृत्य परस्वं हि यस्तु दानं प्रयच्छति।
स दाता नरकं याति यस्यार्थस्तस्य तत् फलम् ॥ ८४ ॥

देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ८५ ॥
ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते तथा।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥ ८६ ॥
अकृतज्ञमनार्यञ्च दीर्घरोषमनार्जवम्।
चतुरो विद्धि चाण्डालान् जात्या जायेत पञ्चमः ॥ ८७ ॥
नोपेक्षितव्यो दुर्बुद्धिः शत्रुरल्पोऽप्यवज्ञया।
वह्निरल्पोऽप्यसंग्राह्यः कुरुते भस्मसाज्जगत् ॥ ८८ ॥
नवे वयसि यः शान्तः स शान्त इति मे मतिः।
धातुषु क्षीयमाणेषु शमः कस्य न जायते? ॥ ८९ ॥
उद्यान इव विप्रेन्द्र! सर्वसाधारणाः श्रियः।
मदीया इति मत्वा वै न हि हर्षयुतो भव ॥ ९० ॥

चित्तायत्तं धातुवश्यं शरीरं
चित्ते नष्टे धातवो यान्ति नाशम्।
तस्माच्चित्तं सर्वदा रक्षणीयं
स्वस्थे चित्ते धातवः सम्भवन्ति ॥ ९१ ॥

परान्नञ्च परस्वञ्च परशय्याः परस्त्रियः।
परवेश्मनि वासश्च शक्रादपि श्रियं हरेत् ॥ ९२ ॥
आलापाद् गात्रसंस्पर्शात् संसर्गात् सह भोजनात्।
आसनाच्छयनाद् यानात् पापं संक्रमते नृणाम् ॥ ९३ ॥
आसनादेकशय्याया भोजनात् पङ्क्तिसङ्करात्।
ततः संक्रमते पापं घटाद् घट इवोदकम् ॥ ९४ ॥
लालने बहवो दोषास्ताडने बहवो गुणाः।
तस्माच्छिष्यञ्च पुत्रञ्च ताडयेन्न तु लालयेत् ॥ ९५ ॥
अध्वा जरा देहवतां पर्वतानां जलं जरा।
असम्भोगश्च नारीणां वस्त्राणामातपो जरा ॥ ९६ ॥

अधमाः कलिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ ९७ ॥
मानो हि मूलमर्थस्य माने सति धनेन किम्?।
प्रभ्रष्टमानदर्पस्य किं धनेन किमायुषा? ॥ ९८ ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ ९९ ॥
वनेऽपि सिंहा न नमन्ति कर्णं बुभुक्षिताः स्वल्पनिरोक्षणाश्च।
धनैर्विहीनाः सुकुलेषु जाता न नीचकर्माणि समारभन्ते ॥१००॥
नाभिषेको न संस्कारः सिंहस्य क्रियते वने।
नित्यमूर्जितसत्त्वस्य स्वयमेव मृगेन्द्रता ॥ १०१ ॥
दाता दरिद्रः कृपणोऽर्थयुक्तः पुत्रोऽविधेयः कुजनस्य सेवा।
परापकारेषु नरस्य मृत्युः प्रजायते दुश्चरितानि पञ्च ॥ १०२ ॥
चिन्तासहस्रेषु च तेषु मध्ये चिन्ताश्चतस्रोऽप्यसिधारतुल्याः।
नीचापमानं क्षुधितं कलत्रं भार्या विरक्ता सहजोपरोधः ॥१०३॥
वश्यश्च पुत्रोऽर्थकरी च विद्या अरोगिता सज्जनसङ्गतिश्च।
इष्टा च भार्या वशवर्त्तिनी च दुःखस्य मूलोद्धरणानि पञ्च ॥१०४॥
कुरङ्गमातङ्गपतङ्गभृङ्गा मीना हताः पञ्चभिरेव पञ्च।
एकः प्रमाथी स कथं न घात्यो यः सेवते पञ्चभिरेव पञ्च ॥१०५॥
अधीरः कर्कशः स्तब्धः कुचेलः स्वयमागतः।
पञ्च विप्रा न पूज्यन्ते बृहस्पतिसमा यदि ॥ १०६ ॥
आयुः कर्म चरित्रञ्च विद्या निधनमेव च।
पञ्चैतानि विविच्यन्ते जायमानस्य देहिनः ॥ १०७ ॥
पर्वताऽऽरोहणे तोये गोकुले दुष्टनिग्रहे।
पतितस्य समुत्थाने शस्ताः ह्येते गुणाः स्मृताः ॥ १०८ ॥
अस्थिरं जीवितं लोके अस्थिरं धनयौवनम्।
अस्थिरं पुत्रदाराद्यं धर्मः कीर्त्तिर्यशः स्थिरम् ॥ १०९ ॥

शतं जीवितमत्यल्पं रात्रिस्तस्यार्द्धहारिणी।
व्याधिशोकजराऽऽयासैरर्द्धं तदपि निष्फलम्॥ ११०॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्द्धं हृतं
तस्यार्द्धं स्थित किञ्चिदर्द्धमधिकं बालस्य काले हृतम्।
किञ्चिद्बन्धुवियोगदुःखमरणैर्भूपालसेवागतं
शेषं वारितरङ्गगर्भचपलं मानेन किं मानिनाम्?॥ १११॥

अहोरात्रिमये लोके जरारूपेण सञ्चरन्।
मृत्युर्ग्रसति भूतानि पवनं पन्नगो यथा॥ ११२॥

गच्छतस्तिष्ठतो वाऽपि जाग्रतः स्वपतो न चेत्।
कार्य्यं सत्त्वहितार्थाय तत् पशोरिव चेष्टितम्॥ ११३॥

अहितहितविचारशून्यबुद्धेः हितकरणे बहुभिर्वितर्कितस्य।
उदरभरणमात्रतुष्टबुद्धेः पुरुषपशोः पशोश्च को विशेषः?॥११४॥

शौर्य्ये तपसि दाने च यस्य न प्रथितं यशः।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः॥ ११५॥

यज्जीवितं क्षणमपि प्रथितं मनुष्यैः
विज्ञानविक्रमयशोभिरभग्नमानैः।
तन्नाम जीवितमिति प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते॥ ११६॥

किं जीवितेन धनमानविवर्जितेन?
मित्रेण किं भवति नित्यसशङ्कितेन?।
सिंहव्रतं चरत गच्छत मा विषादं
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते॥ ११७॥

यो वाऽऽत्मनीह न गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च मित्रवर्गे।
किं तस्य जीवितफलेन मनुष्यलोके?
काकोऽपि जीवति चिरञ्च बलिञ्च भुङ्क्ते॥ ११८॥

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च।
स लौहकारभस्त्रेव श्वसन्नपि न जीवति॥ ११९॥
स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिता।
ये पराधीनकर्माणो जीवन्तोऽपि च ते मृताः॥ १२०॥
स्वपूरा वै कापुरुषाः स्वपूरो मूषिकाञ्जलिः।
असन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति॥ १२१॥
अभ्रच्छाया तृणादग्निर्नीचसेवा पथे जलम्।
वेश्यारागः खले प्रीतिः षडेते बुद्बुदोपमाः॥ १२२॥
वाचा विहितसार्थेन लोको न च सुखायते।
जीवितं मानमूलं हि माने म्लाने कुतः सुखम्?॥ १२३॥
अबलस्य बलं राजा बालस्य रुदितं बलम्।
बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम्॥ १२४॥
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति।
तथा तथाऽस्य मेधा स्याद्विज्ञानञ्चास्य रोचते॥ १२५॥
यथा यथा हि पुरुषः कल्याणे कुरुते मतिम्।
तथा तथा हि सर्वत्र श्लिष्यते लोकसुप्रियः॥ १२६॥
लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः।
तस्माल्लोभो न कर्त्तव्यः प्रमादो नो न विश्वसेत्॥ १२७॥
तावद्भयस्य भेतव्यं यावद्भयमनागतम्।
उत्पन्ने तु भये तीव्रे स्थातव्यं वै ह्यभीतवत्॥ १२८॥
ऋणशेषञ्चाग्निशेषं व्याधिशेषं तथैव च।
पुनः पुनः प्रवर्द्धन्ते तस्माच्छेषं न कारयेत्॥ १२९॥
कृते प्रतिकृतं कुर्य्यात् हिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दोषं समाचरेत्॥ १३०॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं मायामयमरिन्तथा॥ १३१॥

दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति।
प्रसन्नमपि पानीयं कर्दमैः कलुषीकृतम् ॥ १३२ ॥

सम्यक् भुङ्क्ते जनः सो हि द्विजायार्थो हि यस्य वै।
तस्मात् सर्वप्रयत्नेन द्विजः पूज्यः प्रयत्नतः ॥ १३३ ॥

तद् भुज्यते यद् द्विजभुक्तशेषं
स बुद्धिमान् यो न करोति पापम्।
तत् सौहृदं यत् क्रियते परोक्षे।
दम्भैर्विना यः क्रियते स धर्मः ॥ १३४ ॥

न सा सभा यत्र न सन्ति वृद्धाः
वृद्धा न ते ये न वदन्ति धर्मम्।
धर्मः स नो यत्र न सत्यमस्ति
सत्यं न तत् यच्छलनाऽनुविद्धम् ॥ १३५ ॥

ब्राह्मणोऽपि मनुष्याणामादित्यश्चैव तेजसाम्।
शिरोऽपि सर्वगात्राणां व्रतानां सत्यमुत्तमम् ॥ १३६ ॥

तन्मङ्गलं यत्र मनः प्रसन्नं तज्जीवनं यत्र परस्य सेवा।
तदर्जितं यत् स्वजनेन भुक्तं तद् गर्जितं यत् समरे रिपूणाम् ॥१३७॥

अम्भसः परिमाणेन उन्नतं कमलं भवेत्।
स्वस्वामिना बलवता भृत्यो भवति गर्वितः ॥ १३८ ॥

स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ।
स्थानच्युतस्य तस्यैव क्लेशशोषणकारकौ ॥ १३९ ॥

स्थाने स्थितस्य मित्रत्वमस्थाने रिपुतां गतम्।
भानोः प्रीतिर्जलस्थाब्जे रिपुता स्थलवर्त्तिनि ॥ १४० ॥

सप्तदशः पाठः ।

सदाचारः ।

मैत्रीं सद्भिः समं कुर्य्यात् स्नेहं सत्सु तु सर्वथा ।
संसर्गं साधुभिः कुर्य्यादसत्सङ्गं परित्यजेत् ॥
सेवेत देवभूदेववृद्धवैद्यनृपातिथीन् ।
विमुखान्नार्थिनः कुर्य्यान्नावमन्येत कानपि ॥
गुरूणां सन्निधौ तिष्ठेत् सदैव विनयान्वितः ।
पादप्रसारणादीनि तत्र नैव समाचरेत् ॥
अपकारपरेऽपि स्यादुपकारपरः पुमान् ।
आत्मवत् सकलान् पश्येद्वैरिणो दूरतो वसेत् ॥
न कञ्चिदात्मनः शत्रुं नात्मानं कस्यचिद्रिपुम् ।
प्रकाशयेन्नापमानं न च निःस्नेहतां प्रभोः ॥
नात्मानमुदके पश्येत् न नग्नः प्रविशेत् जलम् ।
तथा नाज्ञातगाम्भीर्य्यं न हिंस्रप्राणिसेवितम् ॥
काले हितं मितं सत्यं संवादि मधुरं वदेत् ।
भुञ्जीत मधुरप्रायं स्निग्धं काले हितं मितम् ॥
न रात्रौ दधि भुञ्जीत न च निर्लवणान्तथा ।
नामुद्गसूपं नाक्षौद्रं न चाप्यघृतशर्करम् ॥
जनस्याऽऽशयमालक्ष्य यो यथा परितुष्यति ।
तं तथैवानुवर्त्तेत पराऽऽराधनपण्डितः ॥
नैकः सुखी न सर्वत्र विश्वस्तो न च शङ्कितः ।
नोद्यमे विरमेत् क्वापि हेतावीर्षेत् फले न तु ॥
न वेगान् धारयेज्जातु मनोवेगान् विधारयेत् ।
न पीडयेदिन्द्रियाणि न चैतानति लालयेत् ॥
वर्षाऽऽतपादिषु छत्री दण्डी रात्रौ भयेषु च ।
सोपानत्कस्ततं रक्षेत् विचरेत् युगमात्रदृक् ॥

नदीं तरेत् न बाहुभ्यामग्निस्कन्धमभिव्रजेत् ।
सन्दिग्धनावं वृक्षञ्च नारोहेद् दुष्टयानकम् ॥
नासंवृतमुखं कुर्य्यात् सभायाञ्च विचक्षणः ।
कासं श्वासं तथोद्गारं जृम्भणं क्षवथुं तथा ॥
नोर्द्ध्वजानुश्चिरन्तिष्ठेत् न नखेन लिखेद्भुवम् ।
सम्मार्जनीरजो नैव देहे दद्यात् कदाचन ॥
न नखेन तृणं छिन्द्यात् नोच्छिष्टो ब्राह्मणं स्पृशेत् ।
नोपरक्तं न चोद्यन्तं नास्तं यान्तं दिवाकरम् ॥
सर्वथा न समीक्षेत न जले प्रतिबिम्बितम् ।
नेक्षेत सततं सूक्ष्मं दीप्तमेध्याप्रियाणि च ॥
पौरन्दरं धनुर्नैव दर्शयेत् कमपि क्वचित् ।
नेच्छेद् बलवता युद्धं न भारं शिरसा वहेत् ॥
गात्रं न नादयेत् क्लेशात् हस्तेन धनुषाथ च ।
न गच्छेत् पूज्ययोर्मध्ये दम्पत्योरन्तरेण च ॥
रिपोरन्नं न भुञ्जीत गणिकाऽन्नमपि क्वचित् ।
प्रतिभूर्न भवेत् क्वापि न च साक्षी वृथा भवेत् ॥
कार्गीं न धारयेज्जातु द्यूतं दूरात्परित्यजेत् ॥
विश्वासं नाचरेत् स्त्रीणां ताः स्वतन्त्राश्च नाचरेत् ।
रक्षणीयाः सदा यत्नाद् यौवने तु विशेषतः ॥
न भिन्ने शयने सुप्यात् नानेकविवरेऽपि च ।
नैको देवालये नैव रात्रौ तरुतलेऽपि च ॥
एवं दिनानि गमयेत् सदाचारपरः सदा ।
ततो रात्रिप्रयुक्तानि कुर्य्यात् कर्माणि मानवः ॥
इत्याचारं समासेन भाषितं यः समाचरेत् ।
स विन्दत्यायुरारोग्यं प्रीतिं धर्मं धनं यशः ॥

सम्पूर्णः ।

SANSKRIT SIKSHAMANJARI

PART III

OR

SANSKRIT THIRD BOOK,

SUITED TO BEGINNERS

BY

PANDIT-KULAPATI

SHRI JIBANANDA VIDYASAGARA. B. A.

Superintendent, Free Sanskrit College, Calcutta.

Third Edition.

Calcutta.

PRINTED BY SIDDHESWAR PAN

AT THE SIDDHESWAR PRESS.

38. Shibnarayan Dass's Lane.

1901.

To be had from

Pandit-kulapati Shri Jibánanda Vidyáságara, B. A.

Superintendent, Free Sanskrit College,

No. 2, Rama'-natha Majumda'r's Street, Calcutta.

संस्कृतशिक्षामञ्जर्य्याः

तृतीयभागः।

पण्डितकुलपतिना
बि, ए, उपाधि-धारिणा
श्रीजीवानन्द-विद्यासागर-भट्टाचार्य्येण
सङ्कलितः।

द्वितीय संस्करणम्।

कलिकातानगर्य्याम्

सिद्धेश्वरयन्त्रे
मुद्रितः।

ई १८०१॥

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২নং রমানাথ মজুম্‌দারের ষ্ট্রীট্‌
কলিকাতা।

প্রিণ্টর—শ্রীসিদ্ধেশ্বর পান
৩৮ নং শিবনারায়ণ দাসের লেন
কলিকাতা।

संस्कृतशिक्षामञ्जर्य्याः

तृतीयो भागः ।

प्रथमोच्छ्वासः ।

प्रणम्य परमात्मानं श्रीजीवानन्दशर्म्मणा ।
बालानां ज्ञानवृद्ध्यर्थं शिक्षामञ्जरी रच्यते ॥

अस्ति मगधो नाम महान् जनपदः। तत्रासीत् पुष्पपुरी नाम नगरी। राजहंसो नाम महाप्रतापस्तस्यां राजा बभूव। तस्य वसुमतीनाम्नी महादेवी परमविधेया धर्म्मपालपद्मोद्भवसितवर्म्मनामधेयास्त्रयोऽमात्याश्चासन्। तेषाञ्च धर्म्मपालस्य सुमन्त्रसुमित्रकामपालाः, पद्मोद्भवस्य सुश्रुतरत्नोद्भवौ, सितवर्म्मणः सुमतिसत्यवर्म्माणौ इति सूनवः समभवन्। तेषु धर्म्मशीलः सत्यवर्म्मा संसारस्य असारतां बुद्धा तीर्थयात्रार्थं देशान्तरमगमत्। कामपालः वारनारीपरो दुर्विनीतः पितुरग्रजस्य च शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवः वाणिज्यार्थं समुद्रपारगमनमकार्षीत्। अपरे सुमन्त्रसुमित्रसुश्रुतसुमतयः पितृषु सुरलोकमितेषु यथापूर्व्वमन्वतिष्ठन्।

एकदा मगधाधिपतिः मालवेन्द्रं मानसारं जिगीषुर्महता बलसमुदायेन संग्रामभूमिमवातरत्। सोऽपि चतुरङ्गबलोद्रिक्तः सविग्रहो दर्प इव तमभिजगाम। तयोश्च प्रशान्तश्चि हस्त्यश्वरथपत्ति परस्पराभिहतसैन्यं महत् जन्यमजनि।

जितश्च मालवनाथो मगधनाथेन। अथ कृपाक्रान्तचेता मगधेश्वरो मालवेन्द्रं प्रक्षीणसकलसैन्यं पुनः स्वराज्ये स्थापयामास। ततः स राजा राजहंसो विजयप्रफुल्लमनाः स्वराजधानीं प्रत्येत्य अनन्यशासनां धरां शासदपि केवलमनपत्यतया जातदैन्यः सकललोकैकशरण्यं नारायणमजस्रमाराधयामास।

अथ तदग्रमहिषी वसुमती प्रत्युषसि दैवानुग्रहेण दयितमनोरथपुष्पभूतं गर्भमाधत्त। राजापि तद्विदित्वा सानन्दः समाहूतनिखिलबन्धुवर्गः निजोत्साहसम्पदनुरूपं सीमन्तोन्नयनादिकं महोत्सवमन्वतिष्ठत्। कदाचित् सभासीनो नृपः सन्यासिनमेकमागतमभाषत "ननु तापस! देशं सापदेशं भ्रमन् किमपि क्वचिदवगतश्चेत् कथयतु भवान्" इति। तेन कृताञ्जलिना अभाषि "देव! देवस्याज्ञां शिरसि धृत्वा अनेन अनाशङ्कनीयेन वेशेन महीं चरन् मालवदेशमनुप्रविश्य तत्र सुगूढं तिष्ठन् तस्य राज्ञः समस्तमुदन्तमुपलभ्य प्रत्यागमम्। मानी मानसारः संग्रामे भवतः पराजयमवाप्य नितरामवमानितः सुदीनमना महाकालनिवासिनं महाकालमाराध्य तपःसन्तुष्टात् तस्मात् एकवीरारातिघातिनीं महागदां प्राप्य कृतार्थम्मन्यः साम्प्रतं भवन्तमभियोक्तुमुद्यच्छतीति श्रुत्वा देवः प्रमाणम्" इति। तदाकर्ण्य अमात्या ऊचुः "देव! यदयमरातिरप्रतिविधेयेन दैवबलेन योद्धुमायाति तदस्माकमनेन योद्धुमसाम्प्रतम्"। एवं बहु विज्ञापितोऽपि तैः नरपतिः महता गर्वेण परीतः तेषां वचनमनादृत्य प्रतियोद्धुमना आसीत्। महेश्वरदत्तबलो मानसारः समस्तसाधनसमेतो मगधदेशं प्राविशत्। अथान्तरे मन्त्रिणो राजानं राजहंसं कथञ्चिदनुनीय तदीयावरोधान् रिपुदुर्गमे विन्ध्याटवीमध्ये मूलबलरक्षितान् न्यवेशयन्।

अथ राजा महाबलसामग्रीसमेतः संग्राममभूमिमवातरत्, अग्रासयच्च महान्तमरातिं मालवराजम्। महति संप्रहारे चलति मालवराजो महतीं तां गदां मगधेश्वराय प्राहिणोत्। सा तु निशितशरशतेन शकलीकृतापि अन्तरा दैवशक्तेरप्रतिविधेयतया सूतं निहत्य राजानं राजहंसं रथस्थमेव मूर्च्छितमकरोत्। ततो वीतप्रग्रहा अक्षतविग्रहाश्च वाहा दैवगत्या रथमादाय अन्तःपुरशरण्यं महारण्यं प्राविशन्। तत्र अमात्याः कथञ्चिद्दक्षतशरीराः समागत्य राजानमनवलोक्य दैन्यपरीता देवीमवापुः। सा च तेभ्यो निखिलसैन्यक्षतिं राज्ञोऽदृश्यत्वञ्चाकर्ण्य शोकार्णवनिमग्ना राजानं गतजीवितं मन्यमाना तदनुमरणे मतिमकरोत्। अथामात्यपुरोहिताः समेत्य तां, "कल्याणि! देवस्य निधनमनिश्चितम्, अन्यच्च दैवज्ञेन कथितं भवत्या उदरे सार्वभौमः कुमारो वसतीति तदिदानीं तव मरणाय समुद्योगो न युक्तः" इति प्रबोध्य कथञ्चित् समसान्त्वयन्।

अथ अर्द्धरात्रे निसुप्तनिखिलपरिजने सा महिषी शोकार्णवमपारमुत्तर्तुमशक्नुवती सेनानिवेशं शनैरतिक्रम्य यस्मिन् रथस्य संसक्ततया तदानयनपलायनपरिश्रान्ता गन्तुमक्षमाः समापतितरथ्याः समाकुलाः समतिष्ठन् तस्य निकटे वटतरुशाखायाम् उत्तरीयार्द्धेन बन्धनं विरच्य मर्त्तुकामा साश्रुकण्ठा व्यलपत्। तदाकर्ण्य तत्रस्थो मगधपतिरवशेन्द्रियः कथञ्चिदनुत्क्रान्तजीवितः लब्धचैतन्यः तत् विलपितं देवीवाक्यमेव निश्चिन्वानः शनकैस्तामाह्वयत। सा तु तद्वचनं स्वरेण भर्त्तृवाक्यमेव मन्यमाना ससम्भ्रममागत्य प्रफुल्लवदना तं नेत्राभ्यां पिबन्तीव विकस्वरेण स्वरेण पुरोहितामात्यादिकं समाहूय तेभ्यस्तमदर्शयत्। ते ऊचुः "देव! वाहाः सार-

व्यपगमे रथं रभसादरण्यमनयन्निति दृष्टमस्माभिः"। ततो राजा अब्रवीत् "तत्र निहतसैनिकग्रामे संग्रामे मालवराजेन प्रहितया गदया ताड़ितोऽहं मूर्च्छामेत्य अत्र वने वाहैरानीतो निशीथपवनेन लब्धसंज्ञोऽस्मि" इति। ततो मन्त्रिपुरोहिता-दयः तं शिविरमानीय अपनीताशेषशल्यं विरोपितव्रणमकार्षुः। प्रियभाषिण्या राज्ञ्या वसुमत्या असौ सुदीनान्तरात्मा महीपतिर्विविधप्रबोधवचनैः समाश्वासि।

अथ कियता कालेन समाश्वस्तचित्तो राजा सकलसैन्य-सामन्तसमवेतः महातापसं वामदेवं समाजगाम। तेन च कृतातिथ्यो राजा तदाश्रमे कियन्तं कालमुषित्वा तं समाराधयन् समवोचत "भगवन्! मानसारः प्रबलेन दैवसहायेन मां निर्जित्य मद्राज्यं भुनक्ति। अहमपि उग्रं तपो विरचय्य तद्बलेन तमरातिमुन्मूलयितुमिच्छन् भवन्तं शरणं गतः" इति। ततो मुनिरभाषत "राजन्! तपसा अतिक्लेशकारिणा अलम्। तवाग्रमहिषीगर्भस्थितो राजकुमार एव तव मनोरथं सम्पादयिष्यति। कञ्चन कालमपेक्षस्व" इति। तदानीञ्च गगनचारिण्या वाचा तदेवानुमोदितम्। राजा तदेव वचनमनुसरन् तत्र कालं प्रतीक्षाञ्चक्रे।

अथ कालेन प्राप्तप्रसवकाला वसुमती शुभे मुहूर्त्ते सर्व-लक्षणलक्षितं सुतमसूत। कृत्यवित् राजा महानन्दपरीतः तेन मुनिना जातसंस्कारं कुमारं राजवाहननामानमकरोत्। एतस्मिन्नेव काले सुमतिसुमन्त्रसुमित्रसुश्रुतानां मन्त्रिणां प्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुताख्याश्चत्वारः सूनवः समजायन्त। राजवाहनस्तैर्मन्त्रिपुत्रैरात्मविम्बैरिव सह बालकेलिमनु-भवन्नवर्द्धत।

उपहारवर्मोत्पत्तिकथा।

कदाचित् कश्चित्तापसः कमपि सुलक्षणं कुमारं राज्ञे राजहंसाय समर्प्य अवोचत् "नृपते! कुशसमिदाहरणार्थिना मया वनमध्ये काचिदनाथा रुदती नारी अवलोकिता। निर्जनेऽस्मिन्नरण्ये किमिति रुद्यत इति पृष्टा सा अश्रूणि प्रमृज्य सगद्गदमवादीत् "भगवन्! मिथिलेश्वरे प्रहारवर्मणि निजसुहृदो मगधनाथस्य सीमन्तिनीसीमन्तमहोत्सवाय सपुत्त्रदारे पुष्पपुरीमेत्य कञ्चन कालमधिवसति मालवाधीश्वरो मानसारो मगधमाचक्राम। तत्र महति सम्पराये सुहृदो राजहंसस्य साहाय्याय रणभूमिमवतीर्णो मिथिलेश्वरो रिपुणा मालवराजेन निर्जित्य कारुण्येन विसृष्टो हतावशिष्टेन सैन्येन सह स्वपुरं गच्छन् वनभूमौ अधिकबलेन शबरसैन्येन रभसादाक्रम्यमाणो मूलबलरक्षितान्तःपुरः पलायिष्ट। यमजयोस्तदीयार्भकयोर्धात्रीभावेन परिकल्पिताहं मद्दुहिता च। द्रुतगतिं नृपतिमनुगन्तुमक्षमे अभूव। तत्र व्यात्ताननः कोऽपि व्याघ्रः शीघ्रं मामन्वधावत्। भयस्खलिताहं पाषाणोपरि पर्य्यपतम्। मत्पाणिस्थितः शिशुः प्रभ्रष्टः कस्यापि गोशवस्य क्रोडमभ्यलीयत। तच्छवमाकर्षतस्तस्य शार्दूलस्य प्राणान् कोऽपि शबरः शरेणापाहरत्। स च बालः शबरैः क्वापि अनीयत। अपरं राजकुमारमुद्वहन्ती मम सुता क्व गतेति न जानामि। साहं मोहं गता केनापि कृपालुना गोपालेन स्वकुटीरं नीत्वा विरोपितव्रणाभवम्। ततः स्वस्थीभूय भूयः स्वामिभर्त्तुरन्तिकमुपजिगमिषुरसहायतया दुहितुरनभिज्ञतया च व्याकुलीभवामि" इत्यभिदधाना एकाकिन्यपि स्वामिनं

गमिष्यामीति कृतमतिरगात्। अहमपि भवन्मित्रस्य मिथिलेश्वरस्य दुरवस्थामनुस्मरन् तदीयं कुमारमन्विष्यन् एकं चण्डिकामन्दिरमगच्छम्। तत्र गत्वा एनं कुमारं शबरैः अनेकधा हन्यमानमालोक्य जातदयस्तानभ्यधाम् "ननु भद्राः! अस्मिन् घोरे कान्तारे भ्रष्टपथः स्थविरोऽहं ब्राह्मणः, मम पुत्रकं क्वचित् तरुच्छायायां रक्षित्वा मार्गान्वेषणाय कञ्चिदन्तरमगमम्। प्रत्यागत्य स कुत्र गतः केन वा गृहीतः इति नावधारयन् युष्मदन्तिकमायातोऽस्मि यदि युष्माकं दर्शनपथं गतोऽसौ" इति। एवमुक्ते ते, ब्रह्मन्! अयमेकः शिशुरस्माभिरधिगतः यदि सत्यमेव तवात्मजो भवेत् तदा गृहाण इत्युक्त्वा मह्यमदुः। अथाहं तेभ्यो दत्ताशीर्बालकमेनमादाय शिशिरोपचारादिना समाश्वास्य निःशङ्कं भवदन्तिकमानीतवानस्मि। भवानिदानीमस्य पितृस्थानीयः परिपालयतु तावदायुष्मन्तम्"। राजा सुहृदापन्निमित्तं शोकं तदीयकुमारमुखावलोकनसुखेन किञ्चित् सङ्कोच्य तमुपहारवर्मनाम्ना आहूय स्वपुत्रनिर्विशेषमपुषत्।

अपहारवर्मोत्पत्तिः।

एकदा राजा तीर्थस्नानाय गच्छन् किरातपल्लीमार्गेण कयाचित् उपलालितमेकं सुकुमारं कुमारमवलोक्य तामवादीत् "भद्रे! कोऽयं बालः, कस्य वा नयनानन्दः? केन वा निमित्तेन दीन इव लक्ष्यते"। तया सप्रणाममभिहितम् "महात्मन्! अस्मिन् मार्गे गच्छतः शक्रतेजसो मिथिलेश्वरस्य सर्वस्वमपहरति शबरसैन्ये मत्पतिना अपहृत्य बालोऽयं मह्यमर्पितः। मया च सयत्नं लाल्यते"। राजा तदाकर्ण्य

मुनिकथितं द्वितीयं राजकुमारमेनं निश्चित्य सामदानाभ्यां तां शबरीं सन्तोष्य अपहारवर्मनामकं कृत्वा देव्यै समर्पयामास।

पुष्पोद्भवोत्पत्तिः।

कदाचित् वामदेवान्तेवासी सोमदेवशर्मा नाम कमपि बालं राज्ञः पुरतो नीत्वाब्रवीत् "देव! रामतीर्थे स्नात्वा समागच्छता मया वनभूमौ कयापि वनितया लाल्यमानमेनं समुज्ज्वलरूपं कुमारमवलोक्य सा अभाणि "भद्रे! का त्वम्? को वाऽसौ शिशुस्त्वया आयासेन लाल्यते" इति। सा अब्रवीत् "भगवन्! कालयवनद्वीपे कालगुप्तो नाम कश्चिन्महाधनो वैश्यवरोऽस्ति। एतस्माद् द्वीपाद् गतो मगधराजमन्त्रिसुतो रत्नोद्भवो नाम तदीयां कन्यां सुवृत्तां नामोपयम्य श्वशुरेण समाहूतस्तत्रैव तस्थौ। कालेन सा सुवृत्ता गर्भिणी जाता। ततः सहोदरदर्शनार्थी रत्नोद्भवः श्वशुरमनुनीय अनया भार्य्यया सुवृत्तया सह प्रवहणमारुह्य पुष्पपुराभिमुखः प्रतस्थे। दुर्दैव-गत्या तत्प्रवहणं समुद्राम्भसि न्यमज्जत्। अहन्तु अस्या धात्री-भावेन परिकल्पिता तस्मिन्नेव प्रवहणे स्थिता कराभ्यां तां सुवृत्तामुद्वहन्ती फलकमेकमवलम्ब्य कथमपि तीरभूमिमासा-दयम्। रत्नोद्भवस्य गतिर्न मया विदिता। क्लेशस्य परां काष्ठां गता सुवृत्ता अस्मिन् अटवीमध्ये सुतमसूत। मार्ग-मन्वेष्टुकामाहं प्रसववेदनया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमयुक्तमिति तं शिशुमनयम्" इति। अत्रान्तरे कश्चिद् वन्यो वारणः प्रत्यदृश्यत। तमालोक्य सा भीता तं बालकं निपात्य प्राद्रवत्। अहमपि सन्निहितलतागुल्ममासाद्य परीक्षमाणः स्थितः। अथ निपतितं बालकं पल्लवकवल-

ऽमिवाददति गजराजे कश्चित् सिंहः समभ्यधावत्। तदवलोक्य भयाकुलेन गजेन झटिति वियति समुत्पात्यमानो बालको ऽपतत्। दीर्घायुष्यतया असौ केनचिद् वानरेण पक्वफलबुद्धा परिगृहीतः पुनः फलेतरदृष्ट्या विततत्तरुस्कन्धमूले निक्षिप्तो- ऽभूत्। स च केशरी गजपतिं निहत्य प्रतस्थे। वानरोऽपि क्वापि गतः। अहन्तु तस्मात् लतागुल्माभ्यन्तरात् निर्गत्य बालकमिनमवनिरुहस्कन्धादवतार्य्य वनान्तरे तां वनिताम- प्राप्य गुरवे निवेद्य तदादेशेन भवदन्तिकमनयम्"। राजा तु तदाकर्ण्य रत्नोद्भवः कथमभवदिति चिन्तयन् तन्नन्दनं पुष्पोद्भवनामानं कृत्वा तद्वृत्तान्तं सुश्रुताय व्याख्याय विषाद- सन्तोषौ अनुभावयन् तदनुजतनयं समर्पितवान्।

अर्थपालोत्पत्तिः।

एकदा कमपि बालकमुत्सङ्गे धृतं वसुमत्या दृष्ट्वा राजा अब्रवीत् "देवि! कुतोऽसौ कथं लब्धः" इति। सा प्रोवाच "नाथ! अतीतायां रजन्यां काचन दिव्याङ्गना मत्पुरतः कुमारमिनं समर्प्य निद्रितां मां विबोध्य सविनयमब्रवीत् "देवि! त्वन्मन्त्रिणो धर्मपालनन्दनस्य कामपालस्य वल्लभाहं यक्षकन्या तारावली नाम नन्दिनी मणिभद्रस्य। धनपते- रादेशेन मदात्मजमिनं तव तनयस्य भाविचक्रवर्त्तिनः राज- वाहनस्य परिचर्य्याकरणार्थमानीतवत्यस्मि। त्वमिनं संवर्द्धय" इति। मया च विस्मितया सत्कृता असौ यक्षी तदैवान्त- र्हितासीत्" इति। राजा तदाकर्ण्य सविस्मयं सुमित्रं मन्त्रिण- माहूय तदीयभ्रातृपुत्रमर्थपालं नाम कृत्वा सर्वं वृत्तान्तं तस्मै समाख्याय प्रादात्।

सोमदत्तोत्पत्तिः ।

अन्येद्युः वामदेवशिष्यः कमपि शिशुमानीय राजानमब्रवीत् "देव ! तीर्थयात्राप्रसङ्गेन कावेरीतीरं गतोऽहं बालकमेनमुत्सङ्गे कृत्वा रुदतीं कामपि स्थविरामालोक्य अवोचम् 'स्थविरे ! का त्वं, कथं वा रोदिषि ? बालकश्च कस्य नेत्रानन्दकरः' इति । सा करयुगेन वाष्पं प्रमृज्याब्रवीत् ब्रह्मन् ! राजहंसामात्यस्य सितवर्मणः कनीयान् सुतः सत्यवर्मा तीर्थयात्राप्रसङ्गेन देशमिममागतः । स कुत्रचित् ग्रामे कालीं नाम कामपि विप्रतनयामुपयम्य तस्या अनपत्यतया तत्कनीयसीं भगिनीं गौरीं नाम परिणीय तस्यामेनं तनयमलभत । काली तु सासूयं धात्र्या मया सह बालकं केनचित् मिषेणानीय अस्यामेव तटिन्यामक्षिपत् । अहन्तु करेणैकेन बालकमुद्धृत्य अपरेण अम्भसि प्लवमाना नदीवेगागतस्य कस्यचित् तरोः शाखामालम्ब्य तत्र शिशुं निधाय नदीवेगेन उह्यमाना तत्तरुस्थितेन कालसर्पेण दष्टास्मि । मदाश्रयभूतोऽयं तरुर्दैवगत्या अस्मिन् देशे तीरमलगत् । विषस्य सुतीव्रतया मयि मृतायाम् अरण्ये कश्चन शरण्यो नास्तीति मया रुद्यते' इति ।

ततो विषमविषज्वालया सा वराकी धरणीतले न्यपतत् । सञ्जातदयोऽहं मन्त्रबलेन विषज्वालामपनेतुमक्षमतया सन्निहितकानने औषधिविशेषमन्विष्य प्रत्यागच्छन् मृतां ताम् आलोकयम् । तदनु अग्निसंस्कारं विधाय व्याकुलचेता बालमेनमगतिमादाय भवदमात्यनन्दनस्य भवानेव रक्षितेति भवदन्तिकमानीतवानस्मि" ।

तदाकर्ण्य राजा सत्यवर्मचिन्तया खिन्नमनाः सुमतये

मन्त्रिणे सोमदत्तं नाम तदनुजतनयं समर्पितवान्। सोऽपि सोदरमिव तं मन्यमानो विशेषेणापुषत्।

इत्थं मिलितेन कुमारवर्गेण सह बालकेलिमनुभवन् राजवाहनः क्रमेण चूड़ोपनयनादिकं संस्कारमवाप। ततः सकललिपिषु सकलदेशभाषासु षड़ङ्गसहितवेदेषु काव्यनाटकाख्यानादिषु धर्मशास्त्रज्योतिषतर्कमीमांसादिषु शस्त्रविद्यासु नीतिशास्त्रेषु कलासु मणिमन्त्रौषधादिप्रयोगेषु हस्तितुरगादिविद्यासु अन्येषु च विविधेषु वैषयिकव्यापारेषु तत्तदाचार्य्येभ्यः सम्यक् वैचक्षण्यं समासाद्य यौवनेन विलसन्तम् अनलसं कुमारनिचयं वीक्ष्य राजा साम्प्रतं शत्रुदुर्धर्षोऽहं जात इति मन्यमानः परमानन्दमविन्दत।

इति प्रथमोच्छ्वासः।

अथ द्वितीयोच्छ्वासः

एकदा वामदेवः राजानं कुमारनिचयञ्च प्रणतशिरसं गाढ़मालिङ्ग्य विहिताशीर्मधुरया वाचा प्रावोचत् "राजन्! राजपुत्रो राजवाहनः साम्प्रतं समुद्भलावण्यं तारुण्यमनुभवति। ससहचरस्यास्य दिग्विजयाय अयं कालः। तदस्य विजयप्रस्थानमङ्गलमाचरतु भवान्" इति। कुमाराश्च सर्वे तद्वाक्यमभिननन्दुः। ततः स राजा तत्साचिव्यमितरेषां विधाय समुचितमुपदिश्य शुभे मुहूर्त्ते सपरिजनं कुमारं विससर्ज। राजवाहनः पित्रा कृताशीः शुभशकुनं विलोकयन् कांश्चित् देशानतिक्रम्य विन्ध्याटवीमविशत्। अपश्यत् च

तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतमात्रानुमितविप्रभावं प्रकटितकिरातप्रभावं दृष्टवान् कमपि पुरुषम्। तेन च कृतातिथ्यः स राजतनयः समभ्यधात् "ननु निर्जने घोरेऽस्मिन् कान्तारे किमिति एकाकी भवान् निवसति? भवत्कण्ठस्थितमेतत् यज्ञोपवीतं विप्रभावमगमयति, हेतिहतिभिश्च किरातभावम्। तत् कथय को भवान्, कथमिदम्" इति। स पुमान् राजवाहनं महानुभावप्रकृतिं महापुरुषं मन्यमानः तद्वयस्येभ्यस्तन्नामजन्मने च विदित्वा सविनयमवादीत् "राजकुमार! अत्राटव्यां केचित् स्वाचारं हित्वा पुलिन्दानुचरास्तदन्नभोजिनो बहवो ब्राह्मणब्रुवाः प्रतिवसन्ति। तेषां कस्यापि पुत्रो दुश्चरितमात्रपरः मातङ्गो नामास्मि। स च किरातबलेन विचरन् ग्रामं नगरञ्च प्रविश्य तत्रत्यान् धनिनः सदारपुत्रान् बधबन्धनादिना निर्जित्य तेषां सर्वस्वानि अपहरन् निर्दयं व्यचरम्।

कदाचित् क्वचित् विपिने मत्सहचरगणैर्जिघांस्यमानं कञ्चित् द्विजमालोक्य सहसा सञ्जातदयोऽहमब्रवम् 'ननु पापाः! न हन्तव्यो ब्राह्मणः' इति। ते मां सक्रोधा निरभर्त्सयन्। अहं तेषां निर्भर्त्सनमसहमानस्तस्य ब्राह्मणस्य रक्षणार्थं चिरं प्रयुध्य तैर्निहतोऽभवम्। ततश्च यमपुरीमेत्य सभामण्डपे रत्नसिंहासनस्थं प्रेतपतिं दृष्ट्वा प्राणमम्। सोऽपि मामवेक्ष्य चित्रगुप्तमब्रवीत् "मन्त्रिन्! पश्य अयमस्य न मृत्युसमयः। अयञ्च निन्दितचरित्रोऽपि द्विजरक्षार्थं मृतः इतः परमस्य निष्पापस्य पुण्यार्जने मतिरुदेष्यति। तदयं पापिभिः अनुभूयमानां यातनां विलोक्य पुनः पूर्वशरीरं लभतामिति"। चित्रगुप्तोऽपि तत्र तत्र निरयवासिनां दुर्गतीर्दर्शयित्वा सुबुद्धिमुपदिश्य मामसृजत्। ततस्तदेव पूर्वशरीरमवाप्य तेनैव

विप्रेण परिरक्ष्यमाणः क्षणमतिष्ठम्। अथासौ द्विजः क्रमशः मह्यं विविधविद्यां शिक्षयित्वा सदाचारमुपदिश्य शिवपूजायां मां निवेश्य प्रायात्। ततः प्रभृति किरातसम्बन्धमुत्सृज्य देवं शङ्करं मनसि स्मरन् अत्रैव निवसामि।

राजपुत्र! भवते किञ्चित् विज्ञापनीयं रहस्यमस्ति तदागम्यतामित्युक्त्वा स मातङ्गः वयस्यगणादपेतं तं रहसि समभाषत नृपनन्दन! अतीते निशान्ते गौरीपतिः स्वप्नसन्निहितः निद्रालीढलोचनं मां विबोध्याब्रवीत्। "मातङ्ग! दण्डकारण्यमध्यवर्त्तिन्यास्तटिन्यास्तीरदेशे सिद्धसाध्याराध्यस्य स्फटिकलिङ्गस्य पश्चात् पार्वतीपदपङ्क्तिचिह्नितस्य अश्मनः सविधे विधेराननमिव किमपि विलं वर्त्तते। तत् प्रविश्य तत्र निक्षिप्तं ताम्रशासनं शासनमिव विधातुः समादाय तदुपदिष्टं विधिं विधाय त्वया पातालाधीश्वरेण भाव्यम्। भवत्साहाय्यकरो राजकुमारः अद्य श्वो वा समागमिष्यतीति"। तदादेशानुगुणमेव भवदागमनं तत् साहाय्यार्थिनो मम कुरु साहाय्यमिति।

अथ राजवाहनस्तथेति प्रतिज्ञाय तान् सहचरान् प्रसुप्तान् निशीथे विहाय तेन मातङ्गेन चचाल। ते च कुमाराः प्रातः समुत्थाय राजपुत्रमनवलोकयन्तः विषण्णचेतसः अन्विष्यन्तः समन्तात् यदा न प्रापुस्तदा निश्चितपुनःसङ्गमसङ्केताः परस्परं वियुज्य ययुः। मातङ्गोऽपि तेन लोकवीरेण वक्ष्यमाणः महेश्वरनिर्दिष्टं विलं निर्भयं प्रविश्य गृहीतताम्रशासनः रसातलं गत्वा शासनविधिना होमं विरच्य तस्मिन्नेव ज्वलदग्नौ समन्त्रं स्वदेहमाहुतीकृत्य दिव्यां तनुमवाप।

अथ काचन सर्वावयवसम्पन्ना सर्वाभरणालङ्कृता कन्यका समागत्य मणिमेकं समुज्ज्वलमुपायनीकृत्य चन्द्रलिखितम-

आचष्ट विप्रवर्य्य ! अहमसुरराजनन्दिनी कालिन्दी नाम मम पिता अस्य लोकस्य शासिता भगवता विष्णुना समरे निहतः । मान्तु पितृशोकसागरपतितामालोक्य कश्चित् सिद्धतापसः सदयमवादीत् वत्से ! कश्चिन्मानवो दिव्यदेहधारी तव वल्लभो भूत्वा पातालं पालयिष्यतीति । तदादेशात् चातकीव घनागमनं तवागमनं प्रतीक्षमाणा अतिष्ठम् । अद्य मम सुप्रभातं येन त्वं मयाद्य प्राप्तः तदिदानीं मां परिगृह्य रसातललक्ष्मीमनुभवेति । मातङ्गोऽपि राजपुत्रानुमत्या तां तरुणीं परिणीय रसातलसिंहासनमध्यास्य परमानन्दमलभत ।

राजपुत्रस्तु वयस्यगणान् प्रति समुत्सुकः कालिन्दीदत्तं क्षुत्पिपासादिक्लेशहरं मणिं साहाय्यकरणतोषितात् मातङ्गात् समवाप्य कञ्चन पन्थानम् अनुवर्त्तमानं तं विसृज्य तेनैव बिलपथेन निर्ययौ । तत्र च मित्रगणमप्राप्य भुवं क्रमेण भ्रमन् कस्यचित् महतो ग्रामस्य उपशल्ये आक्रीडमेकमासाद्य विश्रामाय तत्र प्रविश्य आन्दोलिकारूढं रमणीसहितम् आप्तजनपरिवृतं कमपि पुरुषमपश्यत् । सोऽपि राजपुत्रं दृष्ट्वा आनन्दविह्वलः ममैषः स्वामी सोमकुलावतंसो राजवाहनः महाभाग्यतया सहसा मे दर्शनपथं गत इत्यभिधाय आन्दोलिकाया अवतीर्य्य सत्वरमुपेत्य प्रणनाम । राजवाहनश्च प्रत्यभिज्ञाय कथं स एष मे वयस्यः सोमदत्त इति व्याहरन् गाढ़मालिलिङ्ग । ततः कस्यचित् पुन्नागतरोः प्रच्छायशीतले तले समुपविश्य सप्रणयमभाषत सखे ! कालमेतावन्तं कथं तिष्ठसि ? तरुणी चेयं का ? कश्चायं परिजन इति । सोऽपि आनन्दमुकुलिताक्षः सविनयं स्ववृत्तान्तमाख्यातुमुपचक्रमे ।

इति द्वितीयोच्छ्वासः ।

अथ तृतीयोल्लासः ।

सोमदत्तचरितम् ।

देव ! भवच्चरणदर्शनार्थी अहं भ्रमन् कस्यामपि वनभूमौ पिपासाकुलः लतावेष्टितं शीतलं नदसलिलं पिबन् समुज्ज्वलं रत्नमेकमासादयम् । आदाय च तत् कियन्तमध्वानं गत्वा प्रखरसूर्य्यकिरणासहिष्णुतया गन्तुमक्षमः किमपि देवतायतनं प्राविशम् । अपश्यञ्च तत्र बहुतनयसमेतं वृद्धं भूसुरमेकम् । स तु दैन्यकारणं पृष्टो मया साग्रहमवोचत् महाभाग ! सुतान् एतान् मातृहीनान् अनेकैः उपायैः रक्षन् इह कथञ्चित् भैक्ष्यम् आचर्य्य अस्मिन् शिवमन्दिरे वसामीति । ब्रह्मन् ! एतत् कटकाधिपतिः कस्य देशस्य राजा, किं नामधेयः, कथं वा अत्र आगमनमस्येति कच्चित् विदितमस्तीति पुनः पृष्टोऽब्रवीत् । "सौम्य ! मत्तकालो नाम लाटेश्वरो देशस्य अस्य पालयितुर्वीरकेतोस्तनयां वामलोचनां नाम तरुणीललामभूतां आवं आवम् अवधूततत्प्रार्थनस्य पाटलीं नाम नगरीमरौत्सीत् । वीरकेतुस्तु भीतो महदुपायनमिव तां कन्यां तस्मै प्रादात् । स च तरुणीलाभसन्तुष्टः परिणेया निजपुरे एवेति निश्चित्य गच्छन् निजदेशं मृगयादरेण वनेऽस्मिन् शिविरमकल्पयत् । कन्यापसारणार्थं नियुक्तो मानपालो नाम वीरकेतुमन्त्री चतुरङ्गबलसमन्वितः स्वप्रभोरवमानखिन्नमानसोऽन्यत्र रचितशिविरस्तमन्तर्विभेद" इति ।

तदाकर्ण्य विप्रोऽसौ बहुतनयः विद्वान् दरिद्रः स्थविरश्च दानयोग्य इति तस्मै सकरुणं तत् रत्नं दत्त्वा अध्वश्रमात् तत्र एकदेशे निद्राम् अलभे । आक्षणयाली कुत्रचित् जगाम ।

क्षणेन च पश्चात् निगड़ितबाहुयुगलः स विप्रः कशाहतगात्रः बहुभिस्त्रिंशधारिपुरुषैरनुगम्यमानोऽभ्येत्य मां दस्युः इति अद-र्शयत्। ते च तं परित्यज्य मदुक्तं रत्नावाप्तिप्रकारमनाकर्ण्य मां गाढ़ं नियम्य रज्जुभिः आनीय कारावासम् एते तव सखायः इति निगड़ितान् कांश्चित् निर्दिशन्तो मामपि निगड़ितचरण-मकार्षुः। तान् कारावासिनः उद्दिश्य मयोक्तं "ननु पुरुषाः वीर्य्यवन्तः! कथं निर्विशथ कारावासदुःखम्? यूयं वयस्या इति निर्दिष्टमेतैः किम्?" इति। ते च मामवेक्ष्य चौरवीराः अवोचन् "महाभाग! वीरकेतुमन्त्रिणो मानपालस्य किङ्करा वयं तदाज्ञया लाटेश्वरनिधनाय रात्रौ सुरङ्गद्वारेण तदागारं प्रविश्य तत्र राजाभावेन विषण्णाः बहुधनमपहृत्य महाटवीं प्राविशाम। अपरेद्युश्च अन्वेषिणो राजानुचरा बहवोऽभ्येत्य हृतधनचयान् अस्मान् परितः परिवृत्य दृढ़ं बद्ध्वा निकटमानीय समस्तवस्तुप्रत्यर्पणेऽपि एकस्य अमूल्यरत्नस्याभावेन अस्मद्-वधाय दृत्यमशृङ्खलयन्" इति।

अथ अहं रत्नलाभवृत्तान्तं ब्राह्मणाय तद्दानं तेन च आत्मनो दुरवस्थां नाम धाम भ्रमणकारणञ्च सर्वं तेभ्यः संभाष्य तैः मैत्रीमकार्षम्। ततोऽर्द्धरात्रे तेषां मम च शृङ्खलबन्धनं निर्भिद्य तैः अनुगम्यमानो निद्रितस्य द्वाःस्थगणस्य अस्त्रजालमादाय पुररक्षकान् पुरतोऽभिमुखागतान् पराक्रमेणाभिद्राव्य मान-पालशिबिरं प्राविशम्। मानपालो निजकिङ्करेभ्यः मम वृत्तान्तं तात्कालिकविक्रमञ्च निशम्य मामार्चयत्।

अन्येद्युः मत्तकालेन प्रेषिताः कतिपये मानपालमुपेत्य अवोचन् मन्त्रिन्! मदीयराजमन्दिरे सुरङ्गया बहुधनमपहृत्य चौरा भवत्कटकं प्राविशन्। तान् अर्पय नो चेत् महान् अनर्थः सम्भविष्यतीति। तदाकर्ण्य कोपारुणनयनो मान-

पालो लाटपतिः कः ? इति तान् निरभर्त्सयन्। तदनु ते प्रत्येत्य मत्तकालाय सर्वमकथयन्। स च कुपितो भुजवीर्य्य-दर्पेण अल्पसैन्यसमेत एव योद्धुमभ्यगात्। पूर्वमेव कृतरण-निश्चयो मानी मानपालः सन्नद्धयोधो निःशङ्कं निरगात्। अहमपि सबहुमानं मन्त्रिदत्तातिबहुलतुरङ्गमोपेतं चतुर-सारथिं रथं दृढतरं कवचम् अनुरूपं चापं विविधबाणपूर्णं तूणद्वयम् अन्यानि च विविधानि आयुधानि गृहीत्वा युद्ध-सन्नद्धो मन्त्रिणमन्वगाम्। इत्थं प्रवृत्ते शस्त्रसम्पाते अरातीन् अवलीलया प्रहरन् मत्तकालमभ्येत्य निशितशरेण तत् शिरः-कर्त्तनमकार्षम्। तस्मिंश्च निपतिते पलायितेषु शेषसैनिकेषु मन्त्री मम अनेकसंविधां सम्भावनामकार्षीत्।

अथ मानपालप्रेषितात् तदनुचरात् सर्वमुदन्तजातमाकर्ण्य राजा परमप्रीतमनाः समभ्यागतो मत्पराक्रमेण विस्मयमानः समहोत्सवम् अमात्यबान्धवानुमत्या शुभेऽहनि निजतनयां मह्यमदात्। ततो यौवराज्याभिषिक्तोऽहमनुदिनं राजान-मनुरञ्जयन् भवद्विरहवेदनाकुलमानसः सिद्धादेशेन सुहृज्जना-वलोकनफलप्रदेशं महाकालनिवासिनः शङ्करस्य आराधनाय अद्य कान्तासमेतः समागतोऽस्मि। भक्तवत्सलस्य अस्य देवस्य प्रसादेन भवच्चरणारविन्दसन्दर्शनसुखमद्य लब्धम्" इति।

तदाकर्ण्य अभिनन्दिततत्पराक्रमः राजवाहनस्तस्य निरप-राधक्लेशप्रदं दैवमुपालभ्य तस्मै क्रमेण आत्मवृत्तान्तमकथयत्। अस्मिन्नेव अवसरे सहसा पुरतः समुपस्थितं पुष्पोद्भवं विलोक्य तं कृताञ्जलिं गाढमालिङ्ग्य सोमदत्त! अयं स मे पुष्पोद्भव इति सानन्दं तं दर्शयामास। तौ च चिरविरहदुःखं विहाय अन्योऽन्यालिङ्गनसुखमन्वभूताम्। ततस्तस्यैव तरोश्छायाया-मुपविश्य राजपुत्रोऽब्रवीत् वयस्य! भूसुरकार्य्यं चिकीर्षुरहं

मित्रगणो विदितार्थः सर्वथा अन्तरायं करिष्यति इति निद्रितान् भवतः परित्यज्य निरगाम्। तदनु प्रबुद्धो वयस्यवर्गः किमिति निश्चित्य मदन्वेषणाय कुत्र गतवान्? भवांश्च एकाकी क्व गत इति। सोऽपि कृताञ्जलिः सविनयमवादीत्।

इति तृतीयोच्छ्वासः।

अथ चतुर्थोच्छ्वासः।

पुष्पोद्भवचरितम्।

देव! देवेन गन्तव्यं देशं निर्णेतुमशक्नुवाने मित्रगणे देवान्वेषणाय इतस्ततः प्रद्रुते अहमपि तदेककर्मा महीमटन् कदाचित् प्रखरसौरकिरणोत्तापितशिराः कस्यचित् गिरितटरूढस्य तरोः प्रच्छायशीतले तले क्षणम् उपाविशम्। सहसा मध्याह्नसमये मत्पुरतः मानुषच्छायां निरीक्ष्य उन्मुखः पतन्तं कमपि पुरुषमम्बरतलात् अन्तराल एव सञ्जातदयोऽवलम्ब्य शनैः अवनीतले स्थापयित्वा दूरापातवीतसंज्ञं तं शिशिरोपचारेण विबोध्य शोकावेगविगलद्वाष्पं कारणमपृच्छम्। सोऽपि कराभ्यामश्रूणि प्रमृज्य अभाषत "सौम्य! मगधेश्वरामात्यस्य पद्मोद्भवस्य आत्मजो रत्नोद्भवो नामाहं वाणिज्येन कालयवनद्वीपमुपेत्य तत्र कामपि वणिक्तनयां परिणीय तया सह प्रत्यागच्छन् अम्बुधौ तीरस्य अनतिदूर एव प्रवहणस्य मग्नतया सर्वेषु निमग्नेषु कथमपि दैवानुकूल्येन तीरमवाप्य कान्ताविरहदुःखार्णवे प्लवमानः कस्यापि सिद्धतापसस्यादेशात् षोड़शवत्सरान् कथञ्चित् नीत्वा दुरवस्थापारमनवेक्षमाणो गिरिपतनमकार्षम्" इति।

अस्मिन्नेव अवसरे किमपि नारीकूजितमश्रावि। "न खलु समुचितमिदं यत् सिद्धादिष्टे पतितनयमिलने विरहासहिष्णुतया अग्निप्रवेशः" इति। तदाकर्ण्य मनोविदितजनकभावं तमवादिषं तात! भवते विज्ञापनीयानि बहूनि सन्ति। भवतु पश्चात् तत् सम्भवति, अधुना नारीकूजितमनुपेक्षणीयं तत् क्षणमात्रमत्र भवता स्थीयतामिति। तदनु सोऽहं त्वरया किञ्चित् अन्तरं गत्वा पुरतो ज्वलदग्निप्रवेशोद्यतां कामपि वनितामवलोक्य ससम्भ्रमम् अनलात् अपनीय कूजन्त्या वृद्धया सह मत्पितुरन्तिकमभिगमय्य स्थविरामब्रवं वृद्धे! भवत्यौ कुतस्त्ये? कथमत्र कान्तारे केन निमित्तेन दुरवस्था अनभूयते इति। सा सगद्गदम् अवादीत्। "पुत्र! कालयवनद्वीपे कालगुप्तनाम्नो वणिजः कन्येषा सुवृत्ता नाम रत्नोद्भवेन निजकान्तेन आगच्छन्ती जलधौ मग्ने प्रवहणे निजधात्र्या मया सह फलकमेकमवलम्ब्य दैवयोगेन कूलमुत्तीर्णा आसन्नप्रसववेदना कस्याञ्चिदटव्यां सुतमसूत। मम तु मन्दभाग्यतया बाले वनमातङ्गेन गृहीते मदेकाश्रया परिभ्रमन्ती षोड़शवर्षानन्तरं भर्त्तृपुत्रसङ्गमो भविता इति सिद्धवाक्यप्रत्ययात् एकस्मिन् पुण्याश्रमे तावन्तं समयं नीत्वा शोकमपारं सोढुमक्षमा साम्प्रतं समुज्ज्वलिते हुताशने शरीरमाहुतीकर्त्तुमुद्यता" इति। तदाकर्ण्य स्वां जननीं ज्ञात्वा दण्डवत् प्रणम्य तस्यै महत्तान्तमखिलमाख्याय धात्रीभाषणफुल्लवदनं विस्मयविकसिताक्षं जनकमदर्शयम्। पितरौ तु साभिज्ञानम् अन्योन्यं विदित्वा मुदितान्तरात्मानौ विनीतं माम् आनन्दवाष्पेण अभिषिच्य गाढ़मालिङ्ग्य शिरसि उपाघ्राय कस्याश्चित् महीरुहच्छायायामुपाविशताम्। कथं वर्त्तते मत्स्वापतिः राजहंस इति पित्रा पृष्टोऽहं तस्य राज्यच्युतिं त्वदीयजननं सकलकुमार-

वासिं तव दिग्विजयारम्भं मातङ्गानुसरणम् अस्माकं युष्मदन्वेषणकारणं सर्वमानुपूर्व्येण अभ्यधाम्। ततस्तौ कस्यचित् मुनेराश्रमे संरक्ष्य देवान्वेषणपरः वित्तमेव अखिलकार्य्यनिमित्तं निश्चित्य कस्यचित् सिद्धस्य अनुकम्पया लब्धसिद्धाञ्जनः विन्ध्याटवीमध्ये पुरातनपत्तनस्थानानि उपेत्य विविधनिधिसूचकानां महीरुहाणाम् अधोनिक्षिप्तान् बहुसुवर्णान् कलशान् ज्ञात्वा खनित्रेणोत्खाय दीनारान् असंख्यान् संगृह्य तत्कालागतं अनतिदूरस्थितं वणिक्कटकं गत्वा ततो बलिनो बलीवर्द्दान् गोणीश्च क्रीत्वा द्रव्यान्तरमिषेण सर्वं वसु तद्गोणीसंस्थितं कृत्वा तैश्च बलीवर्द्दैरुह्यमानं कृत्वा तत्कटकाधिकारिणमगच्छम्। क्रमेण च तेन चन्द्रपालनाम्ना वणिक्तनयेन सञ्जातसौहृदः साकम् अमुनैव उज्जयिनीमगाम्। पितरौ तदनु तां पुरीं नीत्वा सकलगुणनिलयेन बन्धुपालनाम्ना चन्द्रपालपित्रा नीयमानो मालवनाथदर्शनं विधाय तदनुमत्या गूढ़वसतिमकार्षम्। ततः काननेषु भवदन्वेषणोद्युक्तं मां परममित्रं बन्धुपालो निशम्य अवदत् "मित्र! अखिलां धरित्रीमन्वेष्टुमक्षमो भवान् साम्प्रतं निरुद्वेगेन अत्र तिष्ठतु भवत्प्रभोरवलोकनाय शुभशकुनं निरीक्ष्य पश्चात् कथयिष्यामि" इति। अहञ्च तद्वचनमनुसरन् तदन्तिक एव अतिष्ठम्।

कदाचित् बालचन्द्रिकां नाम कामपि वणिक्कन्यां नयनचन्द्रिकां निरीक्ष्य तल्लावण्यमुग्धचित्तः मदनशरशरव्यतामयासिषम्। सापि माम् अवलोक्य मदवस्थामेव नीता मकरकेतनेन। अहन्तु तस्याः सुखसङ्गमोपायं चिन्तयन् परेद्युर्बन्धुपालेन शकुनैः भवद्गतिं प्रेक्षिष्यमाणेन सह पुरःप्रान्तविहारवनमुपेत्य शकुनवचनानि शृण्वन् स्थितः। तत्र च तामेव मन्मथाभिसारीं दीनवदनां बालचन्द्रिकामागतां वीक्ष्य

तदीयमुखारविन्दे विषादं मदनावेशजनितं विभाव्य तदन्तिकम् इत्य अवादिषम्। सुन्दरि! कथं ते मुखारविन्दे दैन्यलक्षणम्?। सा रहसि सञ्जातविश्रम्भतया विहाय लज्जाभयं शनैः अवादीत्।

"महाभाग! मानसारो मालवाधीशो वार्द्धक्यात् निजनन्दनं दर्पसारम् उज्जयिन्याम् अभ्यषिञ्चत्। स च सप्तसागरपरिखां महीं पालयिष्यन् निजपैतृष्वस्रेयौ चण्डवर्मदारुवर्माणौ राज्यरक्षणे नियुज्य तपश्चरितुं कैलासगिरिमगमत्। राज्यं सर्वमसपत्नं शासति चण्डवर्म्मणि दारुवर्मा मातुलाग्रजन्मनोः शासनमतिक्रम्य दुर्वृत्तपरो मन्मथसदृशस्य भवतो लावण्यायत्तचित्तां माम् एकदा विलोक्य बलात्कर्त्तुम् उद्यच्छति तच्चिन्तया मे दैन्यम्" इति। अहन्तु तस्या मयि आसक्तिं तदन्तरायञ्च तं निशम्य ताम् अश्रुमुखीम् आश्वास्य प्रावोचम्। "प्रिये! भवदभिलाषिणं दुरात्मानम् एनं निहन्तुं मृदुरयम् उपायश्चिन्त्यते। यथा यक्षः कश्चिदधिष्ठाय बालचन्द्रिकां निवसति। यः कश्चित् साहसिकः सम्बन्धयोग्यः तं यक्षं रतिमन्दिरे निर्जित्य तया एकसखीसमेतया मृगाक्ष्या संलापसुखम् अनुभूय कुशलो निर्गच्छेत् तेन सा विवाह्या इति सिद्धेन एकेन उक्तमिति युष्मद्बान्धवैः पुरजनस्य पुरतः पुनः पुनः कथनीयम्। तदनु दारुवर्मा तं प्रवादम् आकर्ण्य यदि भिया निवर्त्तते तदा भद्रं यदि च भुजवीर्य्यदर्पेण तथा अङ्गीकरिष्यति तदा युष्मत्परिजनैः इत्थं वाच्यं महाभाग! दर्पसारनृपामात्यस्य तव अस्मिन् क्षुद्रे निवासे साहसकरणमनुचितम्। पौरजनसमक्षं स्वमन्दिरं नीतया अनया सह क्रीड़न् यदि कुशली स्याः तदा परिणीय एनां मनोरथान् निर्विश इति। स यदि तथा अङ्गीकुर्य्यात् तदा त्वं सखीवेशधारिणा मया

सह तस्य मन्दिरं गच्छ, ततो मया निर्जने तस्मिन् निकेतने मुष्टिजानुपादाघातैः तं तरसा निहत्य पुनरपि तेनैव वेशेन भवतीं निःशङ्कं स्वगृहं नेष्यामि। त्वञ्च विगतभयलज्जा मातापितृसहोदराणां पुरतः आवयोः प्रेमातिशयम् आख्याय सर्वथा मत्परिणयाय तान् अनुनयेः तेऽपि कुलसम्पन्नावण्य-शालिने यूने मह्यं त्वाम् अवश्यं दास्यन्ति। तदा एवं तेषाम् आख्याय दारुवर्मणो मरणोपायं तेषामुत्तरं मह्यम् आवेद-नीयम्" इति।

सा च किञ्चिदुत्फुल्लवदना "सुभग! त्वयोक्तं सर्वमाचरि-ष्यामि" इति कथयित्वा मामसकृत् विवृत्तवदना विलोकयन्ती मन्दमन्दम् आगारम् अगात्। अहमपि बन्धुपालशकुनज्ञात् त्रिंशद्दिनानन्तरमेव भवत्सङ्गः सम्भाविता इति अशृणवम्। अत्रा-न्तरे दारुवर्मणा रिरंसुना रतिमन्दिरे समाहूता बालचन्द्रिका तं गमिष्यतीति दूतिकां मत्समीपम् अभिप्रेषितवती। अहमपि सखीवेशम् आस्थाय तया वल्लभया सह तदागारम् अगच्छम्। नगरप्रचारितां यक्षकथां परीक्षमाणो नागरजनोऽपि दारु-वर्मणः प्रतीहारभूमिम् अगमत्। विवेकशून्यमतिरसौ रागाति-रेकेण रत्नपर्यङ्के तरुणीं नीत्वा तस्यै मह्यञ्च मनोरमस्त्रीवेशाय सकर्पूरताम्बूलादिकं दत्त्वा मुहूर्त्तद्वयं हास्यकौतुकैः संलपन् अतिष्ठत्। ततो यदा रागान्धः सुमुख्या आलिङ्गने मतिम् अकरोत् तदा अहं रोषारुणाक्षः पर्यङ्कतलात् निःशङ्कः एनं निपात्य मुष्टिजानुपादप्रहारैः न्यहनम्। ततो भयकम्पितां कान्तां समाश्वास्य मन्दिराङ्गणमुपेतः साध्वसकम्पित इव उच्चैः अकूजम्। "हा! बालचन्द्रिकाधिष्ठितेन घोरेण यक्षेण दारुवर्मा सहसा निहन्यते, समागत्य पश्यत" इति तदाकर्ण्य मिलिता जना हा! किमेतत् बालचन्द्रिकामधिष्ठितं यक्षं

जानन्नपि दारुवर्मा रागान्धः कथं तामकामयत तदसौ स्वेनैव कर्मणा निहतः, किं तस्य अनुशोचनेन इति वदन्तः प्राविशन्। तस्मिंश्च तुमुले कोलाहले तया सह नैपुण्येन सहसा निर्गतो निजावासमगाम्। ततो गतेषु कतिपयेषु दिवसेषु पौरजन-समक्षं तां विवाह्य यथाभिलषितं सुखमन्वभवम्। अभूवञ्च बन्धुपालशकुननिर्दिष्टे दिवसेऽस्मिन् पुराद्बहिर्वर्त्तमानो भव-च्चरणारविन्ददर्शनसुखभाजनम्"।

एवं मित्रवृत्तान्तं निशम्य प्रफुल्लवदनो राजसूनुः स्वस्य सोमदत्तस्य च वृत्तमस्मै समाख्याय सोमदत्तं महाकालेश्वरा-राधनानन्तरं भवद्वल्लभां स्वं निकेतनं प्रापय्य आगच्छ इति समादिश्य पुष्पोद्भवेन सह अवन्तिपुरम् अविशत्। तत्र अयं मम स्वामिकुमार इति बन्धुपालप्रमुखाय बन्धुजनाय कथ-यित्वा तेन सादरं बहुविधां सपर्य्यां कारयन् सकलकलाकुशलो द्विजवर एष इति प्रख्यापयन् पुष्पोद्भवः स्वमन्दिरे एनं पर्य्यचरत्।

इति चतुर्थोच्छ्वासः।

अथ पञ्चमोच्छ्वासः।

राजवाहनचरितम्।

एकदा वसन्तोदाररमणीये काले अवन्तिसुन्दरी नाम मानसारनन्दिनी वयस्यया बालचन्द्रिकया सह नगरोपान्ते रम्योद्याने पौरविलासिनीजनपरिवृता मनोभवम् अर्चयितु-मगात्। तत्र रतिमिव अवन्तिसुन्दरीं दिदृक्षुः काम इव वसन्तसहायः पुष्पोद्भवानुचरो राजवाहनः समाजगाम। सा तु

अवन्तिसुन्दरी तं क्रमेण अन्तिकम् आयान्तं स्नेनैव आराध्यमानं वाञ्छितप्रदानार्थम् आविर्भूतं मूर्त्तिमन्तम् अनङ्गमिव समालोक्य मन्दमारुतान्दोलिता लतेव मदनावेशवती चकम्पे। तस्थौ च तत्समक्षं लज्जमाना सखीजनान्तरिता अपाङ्गवीक्षणेन तमवलोकयन्ती। बालचन्द्रिका तु तयोः अन्योन्यरागवृत्तिम् अनुभवन्ती कान्तासमाजसन्निधौ राजनन्दनोदन्तं सम्यक् आख्यातुमयुक्तमिति लोकसाधारणैर्वचनैः अभाषत "भर्तृ-दारिके! अयं सकलकलानिगुणो देवतासान्निध्यकरण आहव-निपुणो द्विजकुमारो मणिमन्त्रौषधचतुरः परिचरणीयो भवत्या" इति। तद्वाकर्ण्य सा अभिनन्दिततद्वचना जितमारं समुचितासनासीनं कृत्वा सखीहस्तेन गन्धमाल्यादिना समु-पाचरत्।

राजवाहनोऽचिन्तयत् नूनमेषा पूर्वजन्मनि मे जाया यज्ञ-वती, नोचेत् कथमेतस्याम् एवंविधोऽनुरागो मे वर्त्तते। शापा-वसानसमये तपोनिधिदत्तं जातिस्मरत्वम् आवयोः समानं, तद् यावत् विशेषसूचकैर्वाक्यैः अस्याः स्मरणमुत्पादयामि। तस्मिन्नेव समये कोऽपि राजहंसः केलिविधित्सया तदुपकण्ठ-मगमत्। समुत्सुकया राजनन्दिन्या मरालग्रहणे नियुक्तां बालचन्द्रिकामालोक्य समुचितो वचनावसर एष इति राज-वाहनः सविलासमालपत् "सखि! पुरा शाम्बो नाम कश्चित् नृपतिः कान्तया सह विहारार्थं सरोवरमेत्य तत्र निद्राधीनं राजहंसं शनैर्गृहीत्वा बिसगुणेन तस्य चरणयुगलं निगडयित्वा कान्तामुखं विलोकयन् सस्मितमवादीत् 'प्रिये! मया बद्धो मरालः शान्तो मुनिरिव वर्त्तते। तत् स्वेच्छया अनेन गम्यताम्' इति। तथोक्तो स राजहंसः शाम्बम् अशपत् 'राजन्! अदस्मिन् पङ्के अनुष्ठानपरायणतया परमानन्देन तिष्ठन्तं नैष्ठिकं माम-

कारणं राजगर्वेण अवमानितवानसि, तदेतेन पातकेन रमणी-विरहसन्तापमनुभव' इति। शाम्बस्तु घोरमशनिपातमिव जीवितेश्वरीविरहमसहिष्णुर्भूतलनिहितशिरास्तं सविनयम् अभाषत 'भगवन्! अज्ञानतया मया कृतमेतत् क्षमस्व' इति। स तु करुणार्द्रचेताः प्रावोचत् 'राजन्! जन्मनि अस्मिन् मा ते शापफलभोगोऽस्तु मद्वचनस्य अमोघतया भाविनि जनने देहान्तरं गताया अस्या हंसेन रमणो भूत्वा मुहूर्त्तद्वयं मञ्जरण-युगलबन्धनेन मासद्वयं शृङ्खलनिगड़ितचरणो रमणीवियोग-विषादम् अनुभूय तदनु दीर्घकालं कान्तयानया सह राज्य-सुखमवाप्स्यसि' इति। ततश्च स भृशमनुनीतस्तयोर्जाति-स्मरत्वमपि अन्वग्रहीत्। तस्मात् मरालबन्धनं त्वया न करणीयम्' इति।

सापि राजबाला तद्वचनाकर्णनाभिज्ञातस्वपुरातनजनन-वृत्तान्ता ननमयं मत्प्राणनाथ इति मनसा जानती रागफुल्ल-मानसा समन्दहासमभाषत "सौम्य! पुरा शाम्बो यज्ञवती-सन्देशपरिपालनाय तथाविधं हंसं बबन्ध। तथाहि लोके विद्वांसोऽपि दाक्षिण्येन अकार्य्यं कुर्वन्ति" इति।

कन्याकुमारौ इत्थम् अन्योऽन्यपुरातनजनननामधेये पर-स्परज्ञानाय साभिज्ञानमुक्ता मनोऽनुरागाविष्टचेतसौ भृशमा-नन्दमन्वभूताम्। तस्मिन्नेवावसरे मालवेन्द्रमहिषी सपरिजना दुहितुः केलिदिदृक्षया तमुद्देशमाजगाम। बालचन्द्रिका तामवलोक्य रहस्यनिर्भेदभिया हस्तसंज्ञया पुष्पोद्भवसेव्यमानं राजवाहनं वृक्षवाटिकान्तरितमकार्षीत्। सा तु राजमहिषी क्षणं दुहितुः क्रीड़ाकौतुकमालोक्य निजागारगमनाय समुद्यता अभवत्। राजकुमारी कथमपि मातरमनुगच्छन्ती "राज-हंसकुलतिलक! केलिवाञ्छया मदन्तिकमागतं भवन्तम-

काण्ड एव समुत्सृज्य नोचितमपि जनन्यनुगमनं क्रियते, तदनेन भवन्मनो मा अन्यथा भूत्'' इति मरालमिव कुमारम् उद्दिश्य समुचितमालपन्ती पुनः पुनः परिवृत्ताननना दीन-नयना स्वमन्दिरमयासीत्। तत्र हृदयवल्लभकथाप्रसङ्गे बाल-चन्द्रिकया कथिततदन्वयनामधेया मन्मथशरविद्धमानसा विरहवेदनया दिने दिने बहुलपक्षशशिकला इव क्षामक्षामा आहारादिसर्वव्यापारवर्जिता रहस्यमन्दिरे मलयजरसक्षालित-पल्लवकुसुमकल्पिततल्पमात्रायत्तदेहा तस्थौ। वयस्यागणास्तां तदवस्थाम् आलोक्य नितान्तविषण्णाः काञ्चनकलशसञ्चितानि हरिचन्दनोशीरघनसारमिलितानि सलिलानि बिसतन्तुमयानि वासांसि नलिनीदलतालवृन्तानि च सन्तापहराणि सर्वाणि समाहृत्य ताम् असेवत। तच्च शीतलोपचरणं सलिलमिव तप्त-तैले तदङ्गे दहनमिव समन्तात् आविश्चकार। किंकर्त्तव्यता-विमूढां विवशां बालचन्द्रिकाम् ईषदुन्मिलितेन कटाक्षवीक्षितेन वाष्पाकुलेन विलोक्य नताङ्गी सगद्गदमभाषि "सखि! पञ्च-शरः कुसुमायुध इत्यलीकमुच्यते, अहन्तु अनेन अयोमयैः असङ्ख्यैः इषुभिर्हन्ये। चन्द्रमसं वड़वानलादधिकसन्तापकरं मन्ये, यदस्मिन् चन्द्रमसि अन्तः प्रविशति शुष्यति समुद्रः सति निर्गते एव वर्द्धते, नास्य दुष्कार्य्यं किमपि, यदनेन सहोदरायाः पद्मालयायाः आश्रयभूतमपि कमलं ताड्यते। विरहानल-सन्तप्तहृदयस्पर्शेन नूनमुल्मुकेन: स्वल्पायते मलयपवनः। नवपल्लवकल्पितं तल्पमिदम् अनङ्गाग्निशिखापटलमिव सन्तापं तनोति तनोः हरिचन्दनमपि पुरा निजयष्टिसंश्लेषव-दुरगरदनलिप्तोल्वणगरलसङ्कलितमिव तापयति शरीरम्। तदलमायासेन वः, अत्र तावत् राजकुमार एव भिषक्, सोऽपि अलभ्य एव, किं करोमि" इति। बालचन्द्रिका तादृशीं

तामवलोक्य समचिन्तयत् अत्र तावत् कुमारः सत्वरमानेतव्यो मया, नोचेत् एनां स्मरणीयां गतिं नेष्यति मदनः। कुमारयोश्च तस्मिन् उद्याने अन्योन्यावलोकनवेलायामसमसायकः समं मुक्तसायक एव, तस्मात् कुमारानयनं सुकरमेव।

इत्यवधार्य्य सा सखीगणं राजबालाया रक्षणे नियुज्य राजसूनोरन्तिकमगमत्। सोऽपि प्राणवल्लभामुद्दिश्य पुष्पो-:वेन सह तत्सङ्गमोपायं तर्कयन् आगतां तां सखीमा-लोक्य सन्तुष्टमनाः इतो निषीद इति निर्दिष्टासनोपवेशितान् अवन्तिसुन्दरीप्रेषितं सकर्पूरं ताम्बूलादिकं विनयेन ददतीं कान्तोदन्तमपृच्छत्। सा सविनयमवादीत् "देव! विहा-रोद्याने भवदवलोकनादारभ्य मन्मथमथ्यमाना सा पुष्पत-ल्पादिष्वपि सन्तापशमनमलब्धवती वामनेव उन्नततरुफलवत् अलभ्यत्वदुरःस्थलालिङ्गनसुखं लिप्सुः स्वयमेव पत्रिकामालिख्य वल्लभाय एनाम् अर्पय इति मां विसृष्टवती, तदत्र देवः प्रमा-णम्" इति। राजकुमारः पत्रिकां पपाठ।

'सुभग! कुसुमसुकुमारं जगदनवद्यं निरीक्ष्य ते रूपम्।
मम मानसमभिलषति त्वं चित्तं कुरु तथा मृदुलम्॥'

इति पठित्वा सादरमवादीत् "सखि! छायावन्मामनु-वर्त्तमानस्य पुष्पोद्भवस्य वल्लभा त्वमेव, तस्या मृगाक्ष्या वहिश्चराः प्राणा इव वर्त्तसे, त्वच्चातुर्य्यमस्यां क्रियायां लताया-मालवालमिव वर्त्तते। यत् तवाभीष्टं, येन मनोरथः सेत्स्यति, तत् सर्वं करिष्यामि। तया मन्मनसः काठिन्यमाख्यातं परन्तु यदा अहं तद्दर्शनयथं गतः तदैव सा अपहृतमन्मानसा स्वं मन्दिरमगात्, तत् कस्य चेतसः काठिन्यं कस्य वा माधुर्य्यं तत् स्वयमेव सा वेत्ति। दुष्करः कन्यान्तःपुरप्रवेशः, तदनुरूप-मुपायमुद्भाव्य श्वः परश्वो वा प्रियां सङ्गमिष्यामि" इति। एव-

मुक्ता सा दूती यथा शिरीषमृदङ्गाः शरीरबाधा न जायेत तथा अविलम्बम् उपायमाचरेति पुनः पुनरभिधाय प्रीता कन्यापुरमयासीत्।

राजपुत्रोऽपि पुष्पोद्भवेन सह यत्र हृदयवल्लभावलोकनं जातं तत्रैव विरहवेदनाविनोदनाय प्रतस्थे। तत्र समन्तात् विचरन् क्वचिदपि अवस्थातुमशक्नुवन् कमपि चतुरवेषं मुण्डितशिरसं द्विजमवालोकयत्। अपृच्छच्च आशिषा संवर्द्धयन्तं "को भवान्, कस्यां विद्यायां निपुणः" इति। स विद्येश्वरनामाहम् ऐन्द्रजालिकविद्याकोविदो नानादेशेषु राजन्यान् तोषयन् उज्जयिनीमद्यागत इत्यभिधाय राजपुत्रं सम्यगालोक्य अस्मिन् लीलोद्याने किमिति भवतः पाण्डुरतानिमित्तम् इति पप्रच्छ। पुष्पोद्भवस्तस्य चातुर्य्यं स्वकार्य्योपयोगि तर्कयन् सादरं तमुवाच "ननु ब्रह्मन्! सख्यस्याभाषणपूर्वतया भवानस्माकं वयस्यो जातः, वयस्यसन्निधौ न खलु किमपि अवाच्यम्। अस्मिन् केलीवने वसन्तमहोत्सवागताया मालवेन्द्रनन्दिन्या अस्य राजपुत्रस्य च आकस्मिकदर्शनेन अन्योन्यानुरागातिशयः सञ्जातः तस्याश्च सङ्गमोपायविरहेण असौ ईदृशीमवस्थामनुभवति" इति।

विद्येश्वरो लज्जावनतवदनं राजवाहनमालोक्य सस्मितम् अभाषत "राजनन्दन! अनुचरे मयि विद्यमाने भवतः किम् असाध्यमस्ति? अहम् इन्द्रजालविद्यया मालवेन्द्रं मोहयन् पौरजनसमक्षमेव तत् तनयापरिणयं सम्पाद्य कन्यान्तःपुरं प्रवेशयिष्यामि, वृत्तान्तश्चैषः राजबालायै सखीमुखेन पूर्वमेव सन्देष्टव्यः" इति। राजपुत्रः प्रीतात्मा तमकारणमित्रं विद्येश्वरं सबहुमानं विसृज्य फलितमिव आत्मनो मनोरथं मन्यमानः स्वमन्दिरं सख्या सह उपेत्य बालचन्द्रिकामुखेन

प्रियायै विद्येश्वरकरिष्यमाणं सङ्गमोपायं वेदयित्वा कौतुकाकृष्टचेताः कथञ्चिदपि चपां चपयितवान्।

परेद्युः प्रभाते विद्येश्वरो गीतिनीतिचतुरः महता परिजनेन सह राजभवनद्वारमुपेत्य दौवारिकेण स्ववृत्तान्तं निवेद्य तद्दर्शनकुतूहलाविष्टेन सावरोधेन मालवनाथेन समाहूतः कक्षान्तरं प्रविश्य सविनयम् आशिषं प्रयुज्य राजानुमत्या परिजनवाद्यमानेषु वादित्रेषु गायिकासु सुस्वरं गायन्तीषु पिच्छिकां भ्रामयन् मुकुलितनयनः क्षणमस्थात्। अनन्तरं विषमं विषमुद्वमन्तः फणावन्तः शिरोरत्नराजिभिस्तमुद्देशम् उद्भासयन्तो विचरन्ति स्म। गृध्राश्च बहवः तुण्डैस्तान् क्षणेन अहीन्द्रान् आदाय अन्तरीक्षमलञ्चक्रुः। ततो द्विजवरः नरसिंहस्य हिरण्यकशिपोर्विदारणमभिनीय राजानं महदाश्चर्यान्वितं कृत्वा अभाषत "राजन्! उपसंहारे भवता किञ्चित् शुभशकुनं द्रष्टव्यं, तत् कल्याणावाप्तये भवदात्मजाकृतेः कस्या अपि तरुण्याः सर्वगुणालङ्कृतेन केनचित् राजकुमारेण परिणयः सम्पादनीयः, तद् यदि अभ्यनुज्ञा स्यात् तदा दर्शयामि" इति। अथ तथेति अनुमोदितः सः सर्वजनमोहनमञ्जनं चक्षुषोर्निक्षिप्य समन्तात् व्यलोकयन् सर्वेषु तदैन्द्रजालिकमेव पश्यत्सु साद्भुतं रागफुल्लहृदयेन राजवाहनेन पूर्वसङ्केतसमागतामनेकभूषणभूषिताङ्गीमवन्तिसुन्दरीं वैवाहिकमन्त्रतन्त्रनैपुण्येनाग्निं प्रज्वाल्य साक्षीकृत्य च समयोजयत्। तदनु "सर्वे ऐन्द्रजालिकाः स्वस्थानं व्रजन्तु" इति द्विजेनाभिहिते सर्वे ते मायापुरुषा यथायथमन्तर्हिताः। राजवाहनश्च यथासुखं कन्यान्तःपुरमविशत्। मालवपतिस्तु तदद्भुतं मन्यमानस्तस्मै द्विजन्मने प्रभूतं धनं दत्त्वा विसृज्य स्वं मन्दिरमाविवेश। एवं दैवमानुषबलेन मनोरथसाफल्यम्

उपेतो रहसि कान्तया सुरतसुखमुपभुञ्जन् दिने दिने चतुर्दशभुवनवृत्तान्तवर्णनेन प्रियां रञ्जयामास ।

इति पञ्चमोच्छ्वासः ।

उत्तरखण्डे

अथ प्रथमोच्छ्वासः ।

कदाचित् सुरतखेदसुप्तयोस्तयोः स्वप्ने विसगुणनिगडितपादो हंसः कश्चिददृश्यत अबुध्येताञ्चोभौ । अथ तस्य राजपुत्रस्य रजतशृङ्खलानिगडितं चरणयुगलमालोक्य किमेतदिति परित्रासाकुला राजबाला उच्चैश्चक्रन्द, येन तत् सकलमेव कन्यान्तःपुरमग्निपरीतमिव पिशाचोपहतमिव वेपमानं किंकर्त्तव्यविमूढम् अगण्यमानरहस्यरक्षासमयमवनितलाहन्यमानगात्रम् आक्रन्दविदीर्य्यमाणकण्ठमश्रुप्लुतकपोलमाकुली बभूव । तुमुले च अस्मिन् समये अवाधितप्रवेशाः किं किमिति सहसा उपसृत्य विविशुः अन्तःपुरचारिणः पुरुषाः । ददृशुश्च तदवस्थं राजकुमारम् । तत्प्रभावनिरुद्धनिग्रहसामर्थ्यास्तु ते सद्य एव तमर्थं चण्डवर्मणे निवेदयामासुः । सोऽपि कोपादागत्य निर्दहन्निव दहनगर्भया दृशा निशम्य जातप्रत्यभिज्ञः कथं स एवैषः मदनुजमरणनिमित्तभूतायाः पापाया बालचन्द्रिकायाः पत्युर्धनगर्वितस्य वैदेशिकवणिक्पुत्रस्य पुष्पोद्भवस्य मित्रं रूपाभिमानी कलाकोविदः न एकविधविप्रलम्भोपायपाठवावर्जितमूढपौरजनाध्यारोपितवितथदेवतानुभवः कपटधार्मिकः निगूढपापशीलश्चपलो ब्राह्मणब्रुवः । कथमिव एनम्

अनुरक्ता मादृशेष्वपि पुरुषसिंहेषु सावमाना पापेयमवन्तिसुन्दरी। पश्यतु पतिमद्यैव शूलाधिरूढमनार्यशीला कुलपांसनीति निर्भर्त्सयन् भीषणभ्रुकुटिदूषितललाटः काल इव काललोहदण्डकर्कशेन बाहुदण्डेन अवलम्ब्य हस्ताम्बुजे रेखाम्बुजरथाङ्कलाञ्छने राजपुत्रं सरभसमाचकर्ष। स तु स्वभावधीरः सहिष्णुतैकप्रतिक्रियां दैवीमेव ताम् आपदमवधार्य स्मर तस्या हंसगामिनि! हंसकथायाः, सहस्व वासु! मासद्वयम् इति प्राणत्यागरागिणीं प्राणसमां समाश्वास्य रिपुवश्यतामगात्।

अथ विदितवार्त्तावार्त्तौ महादेवीमालवेन्द्रौ जामातरमाकारपक्षपातिनौ प्राणत्यागोपन्यासेन शत्रुणा जिघांस्यमानं ररक्षतुः। न तु शेकतुः तमप्रभुत्वादुत्तारयितुमापदः। स किल चण्डशीलश्चण्डवर्मा सर्वमुदन्तजातं राजराजगिरौ तपस्यते दर्पसाराय सन्दिश्य सर्वमेव पुष्पोद्भवपरिजनं सर्वस्वहरणपूर्वकं सद्य एव बन्धने निक्षिप्य कृत्वा च राजपुत्रं मृगराजशावकमिव दारुपञ्जरनिबद्धं अवधूतदुहितृप्रार्थनस्य अङ्गराजस्य उन्मूलनाय अङ्गानभियास्यन् अनन्यविश्वासाभिनाय रुरोध च बलभरदत्तकम्पश्चम्पाम्। चम्पेश्वरोऽपि सिंहवर्मा सिंह इव असह्यविक्रमः प्राकारं भित्त्वा महता बलसमुदायेन निर्गत्य स्वप्रहितदूतगणाहूतानां साहाय्यदानाय अतिसत्वरमापततां राज्ञामचिरभाविन्यपि सन्निधौ अदत्तापेक्षः साक्षादिवावलेपो वपुष्मान् प्रतिबलमाचक्राम। जगृहे च महति सम्प्रहारे अतिमानुषप्राणबलेन चण्डवर्मणा। स च तद्दुहितरि अम्बालिकायामतिमात्राभिलाषः प्राणैरेनं न व्ययूयुजत् परमनीनयत् बन्धनगृहम्। अजीगणच्च गणकैः अद्यैव निशान्ते राजबाला विवाह्या इति।

इत्थं गते च तस्मिन् कुवेराचलात् प्रतिनिवृत्य एणजङ्घो नाम कश्चिद् दूतः प्रभोर्दर्पसारस्य प्रतिसन्देशमावेदयत् "रे मूढ़ ! किमस्ति कन्यान्तःपुरदूषकेऽपि कश्चित् कृपावसरः ? स्थविरः स राजा जराविमूढ़चित्तो दुहितृपक्षपाती यदेव किञ्चित् प्रलपति, त्वयापि किं तदनुमत्या स्थातव्यम् ? अविलम्बितमेव तस्य कामोन्मत्तस्य चित्रवधवार्त्ताप्रेषणेन अस्माकं श्रोत्रोत्सवो विधेयः, सा च दुष्टकन्या मदनुजेन कीर्त्तिसारेण निगड़ितचरणा कारायां निरोद्धव्या" इति। तदाकर्ण्य प्रातरेव राजभवनद्वारे तं कुमारीपुरदूषकम् अत्र कृतविवाहश्च समुत्थाय चण्डपोतेन मातङ्गपतिना विनाश्य तदधिरूढ़ एव शत्रुसाहाय्याय प्रत्यासीदतो राजन्यान् प्रतिग्रहीष्यामि इति समादिदेश पार्श्वचरान्।

अथ प्रत्यूष एव राजद्वारानीतस्य राजवाहनस्य अङ्घ्रियुगलममुच्यत रजतशृङ्खलया। सा च काचित् अप्सरोरूपिणी भूत्वा प्राञ्जलिर्व्यजिज्ञपत् "देव ! कुरु कृपां मयि, अहमस्मि सोमरश्मिसम्भवा सुरतमञ्जरी नाम सुरसुन्दरी। एकदा मे नभसि नलिनलुब्धमुग्धकलहंसानुबद्धवक्त्रायाः तन्निवारणक्षोभविच्छिन्नविगलिता हारयष्टिर्हैमवते सरसि मन्दोदके मग्नोन्मग्नस्य महर्षेर्मार्कण्डेयस्य मस्तके समपतत्। पातितश्च कोऽपि तेन कोपितेन मयि शापः, 'पापे ! भजस्व लोहजातिमजातचैतन्या सती' इति। स पुनः प्रसाद्यमानस्तत्पादपद्मद्वयस्य मासद्वयमात्रं सन्दानतामेत्य निस्तरणीयामिमाम् आपदमपरिक्षीणशक्तित्वञ्च इन्द्रियाणामकल्पयत्। तथाभूताञ्च मां कदाचित् ऐक्ष्वाकस्य राज्ञो वेगवतः पौत्रः पुत्रो मानसवेगस्य वीरशेखरो नाम विद्याधरः शङ्करगिरौ समभ्यगमत्। अथासौ पितृप्रयुक्ते वैरे वर्त्तमाने विद्याधरचक्र-

वर्त्तिनि नरवाहनदत्ते निराशः तदपकारक्षमोऽयमिति तप-
स्यता दर्पसारेण समसृज्यत। प्रतिश्रुतश्च तेन अस्मै स्वसुः
अवन्तिसुन्दर्य्या दानम्।

एकदा मनोरथप्रियाम् अवन्तिसुन्दरीं दिदृक्षुरसौ काम-
परवशः तत्कुमारीपुरमुपेत्य अन्तरितस्तिरस्करिण्या विद्यया
तां त्वदङ्कोपाश्रयां सुरतखेदखिन्नगात्रीं ददर्श। स तु
कुपितोऽपि त्वदनुभावप्रतिबद्धनिग्रहाध्यवसायः पाण्डुलोह-
शृङ्खलमय्या मया तव पादपद्मयुगलं निगडयित्वा सकोपमपा-
सरत्। अवसितश्च ममाद्य शापः, प्रसीद, किमिदानीं तव
करणीयमिति प्रणिपतन्तीं तां स राजपुत्र· वार्त्तया अनया
मत्प्राणसमां समाश्वासय इति व्यादिश्य व्यसर्जयत्।

अस्मिन्नेव क्षणे हतो हतश्चण्डवर्मा केनचित् दुष्करकर्म-
कारिणा तस्करेण एकनखरप्रहारेण राजमन्दिरोद्देशश्च शव-
शतमयमापादयन् अचकितगतिः असौ विहरतीति वाचः समु-
दचरन्। तदाकर्ण्य राजवाहनस्तमेव मत्तहस्तिनमधिरुह्य
सवेगं राजभवनमुपेत्य गम्भीरेण स्वरेण समभ्यधात्। "कः
स महापुरुषः येनैतत् मानुषमात्रदुष्करं महत् कर्म अनु-
ष्ठितम्। आगच्छतु स मया सह इमं मत्तहस्तिनमारोहतु।
अभयमेव मदुपकण्ठवर्त्तिनो देवदानवैरपि विगृह्यमाणस्य"
इति। निशम्य एतत् सञ्जातहर्षं तं पुमांसं कृताञ्जलिमारो-
हन्तं कुञ्जराधिपं, निवर्ण्य हर्षोत्फुल्लदृष्टिः अहो! प्रिय-
वयस्यो मे अपहारवर्मेति पश्चात् निषीदतोऽस्य बाहुदण्ड-
युगलमुभयभुजमूलप्रवेशितमग्रेऽवलम्ब्य स्वमङ्कमालिङ्गयामास
पर्य्यवेष्टयच्च स्वयं पृष्ठतो चालिताभ्यां बाहुभ्याम्।

अनन्तरञ्च अपहारवर्मा विविधप्रहरणजातमुपयुञ्जानः
प्रतिबलवीरान् बहुप्रकारयोधिनः क्षितौ विचिक्षेप ददर्श च

क्षणेन तदपि सैन्यमन्येन समन्ततोऽभिमुखमभिधावता सैन्यनिचयेन परिच्छिन्नम्। ततश्च कश्चित् परमसौम्याकृतिः इषुवर्षेण रिपुकुलमभिवर्षन् प्रजविना गजेन सन्निकृष्य पूर्वपरिचयदानप्रत्ययादयमेव स देवो राजवाहन इति प्रणम्य अपहारवर्मणि निविष्टदृष्टिः आचष्ट वयस्य! त्वदादिष्टेन मार्गेण उपस्थापितमेतत् अङ्गराजसाहाय्यदानाय उपस्थितं राजन्यकम्, अखिलञ्च विहतविध्वस्तं स्त्रीबालहार्य्यशस्त्रं वर्त्तते, किमन्यत् करणीयम् इति। हृष्टस्तु व्याजहार अपहारवर्मा देव! दृष्टिदानेन अनुगृह्यतामयमाज्ञाकरः। सोऽयमपि अहमेवामुना रूपेण धनमित्राख्यया च अन्तरितो मन्तव्यः। स एव अद्य निर्गमय्य बन्धनात् अङ्गराजम् अस्मत्पक्षीयेण अमुना च राजन्यकेन सह एकान्ते सुखोपविष्टं देवमुपतिष्ठतु यदि न दोष इति। देवोऽपि यथा ते रोचते इति तथा आभाष्य क्वचित् गङ्गातरङ्गपवनशीतले महीरुहतले द्विरदादवतीर्य्य प्रथमसमवतीर्णेन अपहारवर्मणा स्वहस्तसत्वरसमीकृते भागीरथीपुलिनदेशे सुखं निषसाद। तथा निषण्णञ्च तम् उपहारवर्मार्थपालप्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुतैः मैथिलेन च प्रहारवर्मणा काशीभर्त्रा च कामपालेन चम्पेश्वरेण सिंहवर्मणा च सह समुपेत्य धनमित्रः प्रणिपपात। सोऽपि सहर्षमभ्युत्थितः कथं समस्त एवैषः मित्रगणः समागतः को नाम अयमभ्युदय इति कृतयथोचितोपचारान् गाढं परिरेभे काशीपतिमैथिलाङ्गराजांश्च सुहृन्निवेदितान् पितृवत् अपश्यत्। तैश्च हर्षकम्पितपलितं सवेगमुपगूढः परमभ्यनन्दत्। ततः प्रवृत्तासु प्रीतिसंकथासु प्रियवयस्यगणानुयुक्तः स्वस्य सोमदत्तपुष्पोद्भवयोश्च चरितमनुवर्ण्य सुहृदां वृत्तान्तं क्रमेण

श्रोतुं कृतप्रसङ्गः तान् क्रमेण अपृच्छत्। तेषु प्रथममाह स्म किल अपहारवर्मा।

इति उत्तरखण्डे प्रथमोच्छ्वासः।

अथ द्वितीयोच्छ्वासः।

अपहारवर्मचरितम्।

देव! त्वयि पातालमवतीर्णे त्वदन्वेषणार्थं सुहृत्सु भूतस्ततः प्रस्थितेषु अहमपि प्रस्थितः कदाचित् अङ्गेषु बहिः चम्पायाः कश्चित् महामुनिरस्तीति लोकवादादवगम्य तस्मात् भवदुद्देशं जिज्ञासुः तत्समीपमगमम्। अद्राक्षं च कमपि मलिनकान्तिं तापसम्। अप्राक्षं च तं क्वासौ महर्षिरिति।

असौ निःश्वस्य अवादीत् भद्र! आसीदत्र महाप्रभावो मुनिः। एकदा काममञ्जरी नाम अत्रत्या काचिद् वाराङ्गना सनिर्वेदमुपेत्य चरणयोस्तस्य अपतत्। क्षणे च तस्मिन् तस्या मातृप्रभृतय आप्तवर्गाः समुपस्थिताः। स तु मुनिस्तां समाश्वास्य कारणमपृच्छत्। सा सलज्जविषादगौरवम् अब्रवीत् भगवन्! अहं श्रेयःसाधनाय भवत्पादमूलं प्रपन्ना इति। तस्यास्तु जननी कृताञ्जलिरभाषत भगवन्! वयं जात्या वेश्याः अस्याश्च वेश्याया मातुर्मे वेश्योचिताचरणानुशासनम् एनां प्रतीपयति अयञ्चेदृगाचारः आजन्मपरिमितेन धातुसाम्यकृता वर्णरूपमेधाजननेन आहारेण प्रतिपालनं पञ्चमात् वर्षादारभ्य क्रमेण कामशास्त्रशिक्षणं नृत्यगीतवाद्यनाट्यादिनानाविधासु विलासकलासु उपदेशः निखिलव्यापारेषु

सामान्यज्ञानं द्यूतादिक्रीड़ासु नैपुण्यविधानं विश्वस्तजनात् प्रथमसुरताभ्यासः उत्सवादिषु सुसज्जितायाः प्रेषणं सुलक्षण-ख्यापनं नागरिकपुरुषेषु रूपशीलचातुर्य्यादिप्रस्तावनं क्रमेण तरुणजनलक्ष्यीभूतायाः समधिकशुल्केन अवस्थापनं भाव-विलासदर्शनेन मत्तात् जनात् छलेन बहुर्थग्रहणं निःस्वीकृ-तानां बहिष्करणम् अर्थदानाक्षमात् धर्माधिकरणे अभियोगेन अर्थादानम् इत्यं बहुधा युवजनवञ्चनम्। अस्माभ्य युवजनानां विविधेन बाह्यव्यापारेण मनस्तोषणं न तु सङ्गेन, सत्यामपि प्रीतौ मातुःशासनेन तथाचरणमिति।

एवं स्थिते एषा हतभाग्या स्वधर्ममुल्लङ्घ्य क्वचित् आग-न्तुके रूपमात्रधने विप्रकुमारे स्वेनैव धनेन समासक्ता मास-मतिवाहितवती अर्थवन्तं कमपि न आहृतवती अस्माभिः अर्थागमविरहेण अवसद्यते एषा कुमतिर्न कल्याणीति निवा-रयन्त्यां मयि वनवासाय कोपात् प्रस्थिता इयं यदि न प्रत्यानीयते तदा सर्व एव स्वकुटुम्बवर्गः अनशनेन अत्रैव संस्थास्यत इत्यरोदीत्।

अथ तां वाराङ्गनां मुनिरब्रवीत् "भद्रे! वनवासोऽति-दुःखाकरः फलमस्य मोक्षः स्वर्गो वा आद्यस्तु प्रकृष्टज्ञानेन साध्यत्वात् प्रायेण दुःसम्पादनीयः द्वितीयस्तु सर्वस्यैव स्वध-र्मानुष्ठायिनः सुलभः। तदशक्यादारम्भात् विरम्य स्वधर्ममनु-सर इति। यदि भगवता मे प्रसादो न क्रियते तदा अहमग्निं प्रवेक्ष्यामि इति वादिनीं तां दृष्ट्वा तन्मातरमवदत् सम्प्रति गच्छ गृहं प्रतीक्षस्व कानिचित् दिनानि इयं सुकुमाराङ्गी अत्र स्थिता तपःक्लेशमशक्नुवती सोढुम्, अचिरेण एव पुन-र्गृहाय यथा प्रतिगमिष्यति तथा प्रबोधप्रदानादिना करि-ष्यामि" इति।

ततस्तथेति तस्याः प्रतियाते स्वजने सा युवतिः तमृषि-मलघुभक्तिर्नीत्याहृतशरीरसंस्कारा तत्पोतकालबालपूरणैः देवार्चनकुसुमावचयनैः स्थानसम्मार्जनादिभिश्च शिवपूजार्थं गन्धमाल्यधूपदीपनृत्यगीतादिभिः एकान्ते धर्मार्थकामसम्ब-न्धिभिः आलापैरल्पेनैव कालेन तमृषिमन्वरञ्जयत्।

एकदा तं मुनिं रक्तं विलोक्य सा सस्मितम् अवादीत् मूढोऽयं लोकः यः सह धर्मेण अर्थकामौ गणयतीति। मुनिः अवोचत् वत्से! कथय केनांशेन अर्थकामातिशायी धर्मस्तव विदित इति। सा सलज्जम् अभाषत ब्रह्मन्! अस्मात् किल जनात् भगवतस्त्रिवर्गबलाबलज्ञानं नैव सम्भवति अथवा एष: अनुग्रहप्रकारो दास्याः तत् श्रूयतां धर्मो हि अर्थकामयोः प्रभवः, स तु तदनपेक्ष एव, अर्थः कामश्च धर्मेण बाध्यते, स तु तत्त्वदर्शनोपबृंहितः कथञ्चित् सेविताभ्यामाभ्यां न बाध्यते, बाधितोऽपि अल्पायासेनैव प्रतिसमाधीयते। तथाहि भवानी-पतेः मुनिपत्नीसहस्रसंदूषणेन, पितामहस्य तिलोत्तमाभिलाषेण, विष्णोः व्रजाङ्गनाविहारेण, प्रजापतेः स्वदुहितरि प्रणयेन, देवराजस्य गुरुदाराभिगमनेन, चन्द्रमसो गुरुपत्नीहरणेन, सूर्य्यस्य वडवालङ्घनेन, अनिलस्य अञ्जनागमनेन, बृहस्पते-र्ज्येष्ठभार्य्याभिसरणेन, पराशरस्य योजनगन्धागमनेन, व्यासस्य भ्रातृदारसङ्गत्या, अत्रेः मृगीसमागमेन च समुत्पन्नं धर्म-पीडनमचिरेणैव अग्निपातितम् इन्धनमिव दह्यते। देवा-नाञ्च तेषु तेषु कार्य्येषु असुरविप्रलम्भनानि ज्ञानप्रभावात् न धर्मं पीडयन्ति तत् मन्ये धर्मो न अर्थकामयोः समानः प्रत्युत तदतिशायीति।

श्रुत्वैतदृषिः उद्दीप्तरागोऽब्रवीत् अयि विलासिनि! साधु उक्तं त्वया तत्त्वदर्शिषु अधर्मो न स्थानमाप्नोतीति, परम् आज-

अनः अर्थकामयोः अनभिज्ञा वयं तदाचक्ष्व किं स्वरूपावेतौ किं फलौ किं परिवारौ कथं वा ज्ञेयौ इति। सा अवोचत् ब्रह्मन्! अर्थः तावत् अर्जनवर्द्धनरक्षणात्मकः कृषिपाशुपाल्य-वाणिज्यसन्धिविग्रहादिपरिवारः तीर्थप्रतिपादनफलश्च। कामश्च विषयातिसक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुखस्पर्शविशेषः परि-वारस्त्वस्य यावदिह रम्यमुज्ज्वलञ्च, फलं पुनः परमाह्लादनं परस्परविमर्दजन्म। एतदर्थमेव जनाः कष्टानि तपांसि महान्ति दानानि युद्धानि समुद्रलङ्घनादीनि समाचरन्ति इति।

निशम्यैतत् स मुनिः स्वनियममनादृत्य तस्यां प्रासजत्। सा तु अतिप्रमत्तं तं प्रवहणेन आरोप्य राजमार्गेण स्वभवन-मनैषीत्। अघोषयच्च श्वः कामोत्सव इति। परेद्युश्च तं मुनिं कामिजनवत् सुसज्जितं नितान्तरक्तं उत्सवसमाजं नीत्वा युवतिशतवृतस्य राज्ञः पुरतः समुपतस्थे। तेन च हसता भगवता सह निषीद इति समादिष्टा सविभ्रमकृत-प्रणामा निषसाद। तत्र काचित् युवतिरुत्थाय कृताञ्जलि-रभाषत "देव! जिताहमनया, अद्य प्रभृति अस्या दासी संवृत्तास्मि" इति राजानं प्रणनाम। अभूच्च सविस्मयं महान् कोलाहलः। ततश्च हृष्टेन राज्ञा सत्कृता सा वाराङ्गनाभिः पौरैश्च प्रशस्यमाना तमृषिमभाषत। "भगवन्! अयमञ्जलिः चिरमनुगृहीतोऽयं दासजनः, स्वार्थे इदानीमनुष्ठेयः" इति। स तु नितरामनुरक्तोऽशनिहत इव उद्भ्राम्य अब्रवीत् "प्रिये! किमेतत्? कुतस्ते एतादृशीदासीन्यं क्व गतस्ते मय्यनुराग इति। सा सस्मितम् अवोचत्। ब्रह्मन्! यया अद्य राजसमीपे मत्तः पराजयोऽभ्युपेतः, तस्या मम च क्वचित् सङ्घर्षे "मरीचिमावर्जित-वतीव श्लाघसे" इति तया साधिक्षेपमुक्तास्मि, दास्यपणबन्धनेन अस्मिन् अर्थे प्रावर्त्तिषि, सिद्धार्था च अस्मि भवत्प्रसादात्" इति।

इत्थमवधूत: तया स मुनि: कृतानुशय: शून्यवत् न्यवत्तिष्ट। यस्तयैवं कृत:, तमिव मां मन्यस्व, तद् यावत् अचिरादेव त्वदर्थ-साधनक्षमो भवितु यते, अस्यामेव पुर्य्यां तावद् वस इति।

अस्मिन्नेवान्तरे रवि: अस्तमगात्। कृतसन्ध्योपासनश्च तं मुनिमनुमान्य तत्रैव कथञ्चित् नीतरात्रि: प्रभाते नगराय प्रातिष्ठे। अपश्यच्च नगरसविधे रक्ताशोकतरुतले निषण्णम् अतिविरूपं विषादपूर्णं कमपि क्षपणकम्। अप्राक्षञ्च तमन्तिकोपविष्ट: तस्य आधिकारणम्। सोऽब्रवीत् "सौम्य! अहमस्यां चम्पायां निधिपालितनामकस्य श्रेष्ठिनो ज्येष्ठसूनु-र्वसुपालितो नाम वैरूप्यात् तु "विरूपक:" इति प्रसिद्ध:। अन्यश्च अत्र सुन्दरक इति यथार्थनामा कलागुणै: सकृज्ज्ञो वसुना नातिपुष्टोऽभूत्। रूपधनाभ्यां निमित्ताभ्यां तस्य मम च वैरं धूर्त्तैरुदपाद्यत। ते निरधारयन् रूपं धनं वा न पुंस्त्व-मूलम् अपि तु परमसुन्दरी नारी यं कामयते स एव पुमान् अतोयुवतिललामभूतया काममञ्जर्य्या य: प्रार्थ्यते स एव सुभग-पताकां लभतामिति। आवाञ्च तथा इति तस्यै दूतं प्राहिणुव, आगतायाश्च तस्या: स्मरोन्मादहेतुरहमेवासम्। सुभगेन च मया सा स्वधनजीवनयोरीश्वरीकृता, तया च अहं कृत: कौपीनशेष:। ततश्च लोकोपहास्यतामेत्य इह जैनायतने केनचित् जैनेन समुपदिष्टमोक्षवर्त्मा सुकर एष वेशो वेश-विनिर्गतानामिति जातवैराग्य: तदपि कौपीनमत्यजम्। मम एतत् निन्द्यवेशं निरयफलं विप्रलम्भप्रायमधर्मवर्त्म धर्मवत् समाचरणीयमिति प्रत्याकलयन् विविक्तमेतदासाद्य दु:खेन रोदिमि इति।

श्रुत्वा चैतत् तिष्ठ कञ्चित् कालं यथा असौ वेश्या त्वां निज-धनेन योजयिष्यति तथा यतिष्ये इति तमाभाष्य प्रस्थितोऽहं

नगरमाविशन्नेव लोकवादात् धूर्त्तसङ्कुलपूर्णं पुरमिति विदित्वा अर्थानां नश्वरत्वं प्रदर्श्य प्रकृतिस्थान् अमून् विधास्यन् तस्कर-वृत्तौ मतिमाधाय द्यूतसमाजमगमम्। तेषु सङ्गत्य तेषां द्यूतक्रीड़ासु नानाविधं कौशलं विदित्वा क्वचित् अनभिज्ञे कितवे प्राहसम्। प्रतिकितवस्तु सकोपं रक्तचक्षुर्मामभि-वीक्ष्य "शिक्षयसि रे! द्यूतकर्म हास्यव्याजेन, आस्तामयम-शिक्षितो वराकस्त्वयैव तावत् विचक्षणेन देविष्यामि" इति अभिधाय द्यूताध्यक्षानुमत्या मया सह देवितुमासजत्। मया च षोड़शसहस्राणि दीनाराणां तस्मात् जित्वा अर्द्धं द्यूता-ध्यक्षाय सभ्येभ्यश्च दत्त्वा उदतिष्ठम्। सर्वे च तत्रत्याः सहर्षं मां प्रशशंसुः। द्यूताध्यक्षानुरोधात् च तदहः तदगारे विविध-मभ्यवहरन् स्थितोऽस्मि। यन्मूलश्च मे द्यूतावतारः, स मे विमर्दको नाम विश्वास्यतरं द्वितीयं हृदयमासीत्। तन्मुखेन च सर्वमेव नगरवृत्तान्तमवगम्य तमिस्रायां निर्गत्य तस्करो-चितविविधोपकरणयुक्तः कस्यचित् लुब्धेश्वरस्य गेहे सन्धिं छित्त्वा प्रभूतं धनमादाय निर्गच्छन् घोरान्धकारसमावृतायां राजवीथ्यां झटिति शतह्रदासम्पातमिव क्षणमालोकमल-क्षयम्। अथासौ नगरदेवता इव नगरमोषरोषिता निःस-म्बाधवेलायां निःसृता काचिद् युवतिः सर्वालङ्कारभूषिता सन्निकृष्टा आसीत्। क्वासि वासु! क्व यासीति मया सदयमुक्ता सत्रासगद्गदमगदत् आर्य्य! पुर्य्यस्यां कुबेरदत्तो नाम वसति वैश्यश्रेष्ठः। तस्य अहं कन्या। मां जातमात्रां धनमित्रनाम्ने अवत्याय कस्मैचित् धनिकपुत्राय भार्य्यात्वेन प्रतिज्ञातवान् मे पिता। स तु धनमित्रः पित्रोरन्ते अत्युदारतया स्वधनैः क्रीत्वैवार्थिवर्गात् दारिद्र्यं दरिद्राति सति उदारक इति प्रीतलोकाधिरोपितापरश्लाघ्यनामनि च मां तरुणीभूतां

वरयति एव अधन इति अदत्त्वा अर्थपतिनाम्ने अपरस्मै यथार्थनाम्ने सार्थवाहाय पुनर्दित्सति पिता। तदमङ्गलस्य अद्य प्रभाते भावित्वात् प्रागेव प्रियतमदत्तसङ्केता वञ्चित-स्वजना निर्गत्य बाल्याभ्यस्तेन वर्त्मना तद्गृहमभिसरामि, तन्मां मुञ्च, गृहाण एतदलङ्कारजातमिति उन्मुच्य मह्यम् अर्पितवती सदयमब्रवं ताम् एहि साध्वि! नयेयं त्वां त्वत्-प्रियतमावासमिति त्रिचतुराणि पदानि अगच्छम्।

अत्रान्तरे सहसा नागरिकबलं दीपिकालोकध्वस्ततिमिर-मनल्पं यष्टिकृपाणपाणि समापतत्। कम्पमानां कन्यका-मवदं भद्रे! मा भैषीः अस्ति अयम् असिद्वितीयो बाहुः। परं त्वदर्थे मृदुरयमुपाय उद्भावितः, अहं सर्पदष्ट इव शयी, त्वया अमी वाच्याः भद्राः! निशि वयमिमां पुरीं प्रविष्टाः, ममैष पतिर्भुजङ्गदष्टः, यदि वः कश्चित् मन्त्रवित् कृपालुः एनं जीवयेत् तदाहमनाथा जीवामीति। सापि बाला उपा-यान्तरमपश्यन्ती रुदती तथैवान्वतिष्ठत्। तेषु कश्चित् विषवैद्याभिमानी मां निवर्ण्य मुद्रातन्त्रादिभिरुपायैः उपक्रम्य अकृतार्थः, गत एवायं कालदष्टः, शुचा अलं वासु! श्वोऽग्निसात् करिष्यते कोऽतिवर्त्तते दैवमिति सहेतरैः प्रायात्।

अहञ्च उत्थितः उदारकाय तां नीत्वा अवोचं भद्र! अह-मस्मि कश्चित् तस्करः त्वद्गतेन मनसा त्वामभिसरन्तीमेना-मन्तरे प्राप्य त्वत्समीपमुपानैषम् इदञ्चास्या अलङ्कारजात-मिति तत् सर्वमर्पितवान्। स च तदादाय लज्जाहर्षसम्भ्रम-समन्वितः प्राब्रवीत् आर्य्य! नाहं किमपि वक्तुं जानामि यदद्य त्वया कृतं तस्य निष्क्रयो नास्ति, न एतादृशं केनापि कृतपूर्वं नापि क्रियते न च करिष्यते, तदिदानीम् एताक-

देव वार्त्तं यदद्य प्रभृति भर्त्तव्योऽयं दासजन इति मम पादयोः अपतत्।

अहञ्चोत्थाप्य तं गाढ़माश्लिष्य अब्रवं भद्र! काद्य ते प्रतिपत्तिरिति। सोऽभ्यधत्त "सौम्य! न शक्नोमि चैनामत्र नगरे पित्रोः अनुज्ञया विना उपयम्य जीवितुम् अतोऽस्यामेव रजन्यां, देशमिमं त्यजामि अथवा कोवा अहं यथा तुभ्यं रोचते इति मयोक्तं स्वदेशो विदेशो वेति नेयं गणना विदग्धस्य, किन्तु बाला अनल्पसौकुमार्य्या इयं कष्टाः विघ्नबहुलाश्च कान्तारपथाः, ईदृशेन देशत्यागेन अनर्थकरेण प्रज्ञासत्त्वयोः शैथिल्यमिव प्रतिभाति। तत् सहैव अनया अत्र नगरे सुखं वस्तव्यम्। एहि नयावैनां स्वमावासमिति तेन च अविचार्य्यैव अनुमोदमानेन सद्य एव तां स्वगृहं नीत्वा तयैव अपसर्पभूतया तत्पितृगृहे सर्वं द्रव्यजातं तदनन्तरमर्थपतिभवनं गत्वा तत्रत्यं सर्वस्वं चोरयित्वा स्वगृहं गत्वा शयनमाश्रितश्च।

ततश्च उदिते भगवति गभस्तिमालिनि मिहिरे उत्थाय आवां धौतवस्त्रौ प्रातःकृत्यमनुष्ठाय अस्मत्कर्मतुमुलं नगरमनुविचरन्तौ वरवधूगृहेषु कोलाहलमशृणवम्। अथ अर्थः कुवेरदत्तमाघ्राय तत् कन्याविवाहं मासावधिकमकल्पयत्। अत्रान्तरे धनमित्रमहमशिक्षयं सखे! चर्मरत्नभस्त्रिकां कल्पयित्वा एकान्ते राजानम् अङ्गराजमाचक्ष्व जानात्येव देवो महाधनस्य वसुमित्रस्य पुत्रं धनमित्रं मां मत्यर्थनाशात् दरिद्रे मदर्थमेव संवर्द्धितां कुलपालिकां नाम कन्यां तत्पिता कुवेरदत्तः अर्थपतये दित्सतीति ज्ञात्वा वैराग्यात् प्राणान् विहातुं अरण्यं गत्वा कण्ठन्यस्तपाशः केनापि कृपालुना जटाधरेण निवार्य्य एवमुक्तः किमिति अकार्य्यं क्रियते इति मयोक्तं लोकावमानसोदर्य्यात् दारिद्र्यात्। स पुनरब्रवीत्

मूढोऽसि, नान्यत् पापतमम् आत्मघातात् आत्मानमात्मनैव अनवसाद्योद्धरन्ति सन्तः सन्ति उपाया बहवो धनार्जनस्य न एकोऽपि छिन्नकण्ठप्रतिसन्धानस्य। मया मन्त्रबलेन एका चर्मरत्नभस्त्रिका लक्षग्राहिणी अधिगता, तामिमां दयमानस्तुभ्यं ददामि, प्रतिगृहाण, मदन्यत्र चेयं वणिग्भ्यो वाराङ्गनाभ्यश्च दुग्धे। किन्तु यत्सकाशात् अन्यायापहृतं तत् तस्मै प्रत्यर्पणीयं न्यायार्जितन्तु देवब्राह्मणेभ्यो देयम्। ततश्चेयं देवता इव शुचौ देशे निवेश्य अर्च्यमाना प्रातः प्रातःसुवर्णपूर्णैव दृश्यते इति अस्याः कल्प इत्यभिधाय कृताञ्जलये मह्यम् एनां दत्त्वा अन्तर्दधे। इयञ्च रत्नभूता चर्मभस्त्रिका देवाय अनिवेद्य नोपजीव्या इति आनीता, तदत्र देवः प्रमाणमिति। राजा च नियतमेवं वक्ष्यति भद्र! प्रीतोऽस्मि, गच्छ यथेच्छमेनामुपभुङ्क्ष्वेति। भूयश्च ब्रूहि यथा न कश्चिदेनां न मुष्णाति तथानुगृह्यतामिति। सोऽवश्यं तदपि अभ्युपैष्यति। ततः स्वगृहमेत्य यथोक्तमर्थत्यागं कृत्वा दिने दिने पूज्यमानांस्तेयलब्धैरर्थैर्नक्तमापूर्य्य एनां प्रातः लोकाय दर्शयिष्यसि, ततः कुबेरदत्तस्तृष्णाय मत्वा अर्थपतिं कन्यकां स्वयमेव तुभ्यं प्रदास्यति। यदि कुपितोऽर्थपतिः अर्थगर्वात् अभियोक्ष्यते तमपि विविधैः उपायैः कौपीनावशेषं करिष्यावः। स्तेयञ्च चौर्य्यमनेनैव प्रच्छन्नं भविष्यतीति।

धनमित्रस्तथैव प्रहृष्टश्चान्वतिष्ठत्। तदहरेव मदादेशात् विमर्दकोऽर्थपतिसेवानियुक्तः तस्य उदारके वैरमवर्द्धयत्। अर्थलुब्धश्च कुबेरदत्तः धनमित्राय एव तनयां प्रादिक्षत् प्रत्यबध्नात् च अर्थपतिः।

अत्रान्तरे काममञ्जर्य्याः कनीयसी स्वसा रागमञ्जरी मां कथमपि चकमे। अहञ्च तद्गुणाकृष्टः नितरां तदनुरक्तः

सञ्जातः। सा च गुणानुरागिणी नार्थाकाङ्क्षिण्येव मयि अनुरागमकरोत् परं तद्भगिनी काममञ्जरी माता च माधवसेना विना शुल्कं मत्प्रवेशं न्यवारयत्। अहन्तु काम-मञ्जर्या दासीं धर्मरक्षितां नाम अर्थेनावर्ज्य तन्मुखेन तया सम्बन्धा पणबन्धमकरवं यथा चर्मरत्नं धनमित्रात् मुषित्वा मया तुभ्यं देयमिति ततस्तस्यां तथेति प्रतिपन्नायां तथा तमर्थं सम्पाद्य रागमञ्जरीमग्रहीषम्। यस्याञ्च निशि चर्म-रत्नस्तेयवादः, तस्याः प्रारम्भे मत्प्रणिधिर्विमर्दकोऽर्थपतिगृह्यो नाम भूत्वा धनमित्रं बहु अतर्जयत्। धनमित्रेणोक्तं भद्र! कस्तवार्थः यत् परस्यार्थे माम् आक्रोशसि किन्ते मयापकृत-मिति। स भूयोऽपि तर्जयन्निव अब्रवीत् स एष धनगर्वो नाम यत् परस्य भार्य्यां शुल्कक्रीतां पुनस्तत्पितरौ द्रव्येण विलोभ्य स्वीकर्त्तुमिच्छसि ब्रवीषि च कस्तव अपकारो मत्-कृत इति। ननु प्रतीतमेव एतत् विमर्दकोऽर्थपतेर्वहिश्चराः प्राणा इति अहं तदर्थं प्राणान् अपि न गणयामि ब्रह्महत्यामपि न गणयामि मम एकरात्रजागरप्रतीकारः तव एष चर्मरत्नाह-ङ्कारदाहज्वर इति तथा ब्रुवाणश्च पौरैः सामर्षं निवार्य्य ताड़ितो गतोऽभूत्।

धनमित्रेण च आर्त्तेन इव इयं वार्त्ता पार्थिवाय, प्रागेव निवेदिता। स च अर्थपतिमाहूय एकान्तेऽपृच्छत् अङ्ग! अस्ति कश्चिद् विमर्दको नाम तव?। तेन च मूढ़ात्मना अस्ति देव! परं मित्रमिति। अथ राज्ञोक्तं तेन किञ्चित् प्रयोजनमस्ति तमाह्वय, अथ स स्वगृहमेत्य नानास्थानेषु तमन्वेष्टुमारब्धः, न च कुत्रापि प्राप। कथं न लभ्यते स खलु तदहरेव मदादेशात् त्वदन्वेषणार्थम् उज्जयिनीं गतः। अर्थपतिस्तु तमदृष्ट्वा तत्कृतमपराधं स्वमेव मत्वा मोहान्नयात्

वा प्रत्याख्याय पुनर्धनमित्रविभावितेन राज्ञा निगृह्य निगड़-बन्धनमनीयत ।

तेषु च दिवसेषु कल्पोक्तेन विधिना चर्मरत्नं दोग्धुकामा काममञ्जरी पूर्वदुग्धं क्षपणकीभूतं विरूपकं रहसि गत्वा ततोऽपहृतं सर्वमर्थं तस्मै प्रत्यर्पयामास। सोऽपि कथञ्चित् क्षपणकग्रहमोचितात्मा मया उपदिष्टोऽतिप्रीतः स्वधर्ममेव प्रत्यपद्यत। काममञ्जर्यपि अजिनरत्नदोहेच्छया स्वमभ्युदयं निःशेषम् अकरोत् ।

अथ मदादिष्टो धनमित्रः पार्थिवं मिथो व्यजिज्ञपत् देव ! वारमुख्या काममञ्जरी नितरां धनलुब्धा अद्य सर्वस्वं निर-पेक्षं वितरति, तन्मन्ये मदीयचर्मरत्नलाभोऽस्य हेतुः, अस्याश्च तादृश एव कल्प इति पूर्वमुक्तं तदमुष्यामस्ति मे शङ्का इति । राजा तु सद्य एव तां तज्जननीं च समाजुहाव ।

अहन्तु सविषादमिव रहसि तामकथयं आर्य्ये ! नूनं सर्वस्वत्यागात् अतिप्रकाशात् आशङ्कनीयचर्मरत्नलाभासि, तद्वार्त्ताप्रश्नाय राज्ञा समाहूयसे पुनः पुनश्च आग्रहेण पृष्टया त्वया नियतमेव तदागतित्वेनाहमपदेश्यः ततश्च भावी मम चित्रवधः मृते च मयि न जीविष्यति एव ते भगिनी, त्वञ्च निःस्वीभूता, चर्मरत्नञ्च धनमित्रमेव भजिष्यति। तदियमापम् समन्ततोऽनर्थानुबन्धिनी, तदत्र उपायश्चिन्त्यताम् इति। तया तन्माता च अश्रूणि विमुच्य उक्तम् अस्मद्बालिश्यात् निर्भिन्नं रहस्यं परमर्थपतौ तदयशो रूढं तेन च अस्माभिः सङ्केतेन तदस्माभ्यं दत्तमिति अपदिश्य अलमात्मानं शोधयितुमिति माम् उक्त्वा राजान्तिकमगमताम् ।

राज्ञा निर्बन्धेन पृष्टे च पुनः पुनः कर्णनासाच्छेदभीषिते तमेवार्यपतिं तदागतित्वेन प्रकटितवत्यौ। कुपितं राजानं

तस्य प्राणेषु दण्डयन्तं धनमित्रः प्राञ्जलिर्निपत्य अब्रवीत् देव ! मौर्य्यदत्त एष वरः वणिजां दृष्टशेषु अपराधेषु नास्य-सुभिरभियोगः, वरं हृतसर्वस्वो निर्वासनीय एष इति। तेन च राजा सन्तुतोष धनमित्रञ्च लोकाः प्राशंसन्। अर्थपतिश्च कौपीनावशेषः सर्वजनसमक्षं निरवास्यत। तद्‌द्रव्याणाञ्च केनचिदंशेन निःस्वा काममञ्जरी धनमित्रानुरुद्धेन राज्ञा सानुकम्पमनुगृहीता। धनमित्रश्च शुभे दिने कुलपालिकां परिणीतवान्।

एवं सिद्धकामेन मया लुब्धसमृद्धवर्गस्तथा मुषितः यथा कपालपाणिः स्वैरेव धनैर्महद्भिः समृद्धीकृतस्यार्थिवर्गस्य गृहेषु भिक्षार्थमभ्रमत्।

न हि अतिनिपुणोऽपि जनो नियतिमतिक्रमितुं शक्नोति। एकदा अहं सुरापानमत्तः रागमञ्जरीगृहात् शृगालिकया नाम तद्दास्या अनुगम्यमानो रजन्यां राजवीथ्यामटन् नागरिकबलैः तस्कर इति अभिहन्यमानः पाणिस्थितेन निस्त्रिंशेन द्वित्रान् निहत्य अवघूर्णमाणताम्रदृष्टिरपतम्। आगमञ्च ममाभ्यासं शृगालिका आर्त्तरवान् विसृजन्ती। आपदा तु मत्ततापहारिण्या सद्य एव बोधितो व्यचिन्तयम् अहो! मोहोऽयं मम, प्रख्याततरञ्च सख्यं मया सह धनमित्रस्य, मत्परिग्रहत्वञ्च रागमञ्जर्य्याः, मत्पापेन च तौ ध्रुवं निग्राह्यि-ष्येते तदत्र तादृक् उपायः कर्त्तव्यः यथा तौ न आपदमाप्नुतः, अहञ्चानर्थात् मोक्ष्ये इति विविच्य शृगालिकामब्रवम् अपेहि जरतिके! या तामर्थलुब्धां दग्धगणिकां रागमञ्जरीम् अजिनरत्नमत्तेन मत्सुषा मे मित्रच्छद्मना धनमित्रेण सङ्गमितवती, सा हतासि, तस्य पापस्य चर्मरत्नमोषात् दुहितुश्च ते साराभरणापहारात् अहमद्य एनिर्धृतो जिघांसामि प्राणा-

निति सा तु परमधूर्त्ता साश्रुगद्गदं तान् रक्षिकपुरुषान् मम पुरतः सविनयमब्रवीत् भद्राः प्रतीक्षन्तां कञ्चित् कालं यावत् अस्मात् अस्मदीयं सर्वं मुषितमवगच्छेयमिति तथेति तैः प्रतिपन्ने मामासाद्य अवादीत् सौम्य! क्षमस्व अस्य दासीजनस्य एकमपराधम् अस्तु स त्वत्कलत्राभिमर्षी वैरास्पदं धनमित्रः, स्मरंस्तु चिरकृतां परिचर्य्यामनुग्रहीतुमर्हसि दासीं रागमञ्जरीम्। तद् ब्रूहि क्व निहितमस्या भूषणजातमिति ततोऽहं दयमान इवाब्रवं भवतु मृत्युहस्तपतितस्य किं ममामुष्यां वैरानुबन्धेनेति कर्ण एव एनाम् अशिक्षयम् एवमेवं प्रतिपत्तव्यमिति। सा तु प्रतिपन्नार्था जीव वत्स! चिरमिति अभिधाय क्षणात् प्रासरत्। रक्षिभिश्चाहमनीये बन्धनगृहम्।

उत्तरेद्युः आगत्य हृष्टतरः सुभगमानी सुन्दरम्मन्यः युवा कान्तको नाम काराध्यक्षः किञ्चित् इव भर्त्सयित्वा मामभ्यधात् चेद्धनमित्रस्य अजिनरत्नं रागमञ्जरीभूषणजातञ्च प्रयच्छसि, द्रक्ष्यसि पारमष्टादशानां कारणानाम् अन्ते च मृत्युमुखमिति। मया तु ईषत् हसता अभिहितं यद्यपि दद्यामाजन्मनो मुषितमर्थजातं, न तु अर्थपतिदारापहारिणः शत्रोर्मे मित्रमुखस्य धनमित्रस्य चर्म्मरत्नप्रत्याशां पूरयेयमिति मे द्रढीयसी सन्धेति।

अथ कदाचित् दिनावसाने शृगालिका समेत्य सहर्षं माम् अब्रवीत् सौम्य! फलिता ते सुनीतिः। यथा त्वयादिष्टास्मि, तथा धनमित्रमित्यावम् आर्य्य! तव एवमापन्नः सुहृत् इत्युवाच अहमद्य पानदोषात् बद्धः, त्वया तु निःशङ्कम् अद्यैव राजा विज्ञापनीयः, देव! देवप्रसादात् एव पुनरपि तत् अजिनरत्नमर्थपतिमुषितम् आसादितम्, अथ तु भर्त्ता रागमञ्जर्य्याः कश्चिदन्यधूर्त्तः कथञ्चित् मया सख्यमबध्नात्।

तत्सम्बन्धात् वस्त्राभरणादिना सन्तोष्य तद्भार्य्या रहसि मया प्रतिदिनमन्ववर्त्ति, तदसौ अग्रक्लिष्ट, कुपितश्च मम तत् अजिनरत्नं तस्याश्च आभरणजातममुष्णात्। साम्प्रतं भूयस्तेयाय भ्रमन्नग्टह्यत नागरिकबलैः। आपन्नेन च तेन रदत्यै रागमञ्जरीपरिचारिकायै पूर्वप्रणयानुवर्त्तिना तद्भूषणनिधानोद्देशः कथितः, ममापि चर्मरत्नं यथा प्रयच्छेत् तथा देवपादैरनुग्रहः कार्य्य इति तथा निवेदितश्च राजा मामसुभिरवियोज्य सान्त्वनेनैव स्वं ते दापयितुं यतिष्यते तन्नः पथ्यमिति। श्रुत्वैव त्वदनुभावप्रत्ययादत्वस्तेन तेन तत्तथैव सम्पादितम्। अथाहं रागमञ्जर्य्याः सकाशात् यथेप्सितानि वस्तूनि आदाय त्वदादिष्टेन मार्गेण राजदुहितुरम्बालिकाया धात्रीं माङ्गलिकीमनुरञ्जयन्ती तामिव संक्रमीकृत्य रागमञ्जर्य्याश्चाम्बालिकायाश्च सख्यमवर्द्धयम्। क्रमेण तत्समीपगतागतेन अहं तस्याः परं प्रसादपात्रमासम्। एकदा च तस्याः स्थानस्थितमपि कर्णकुवलयं स्रस्तमिति प्रतिसमादधती प्रमत्तेव भ्रंशयित्वा पुनरुत्क्षिप्य भूमेः तेन, केनापि कारणेन कन्यकान्तःपुरं प्रविष्टस्य कान्तकस्य उपरि पारावतत्रासनापदेशात् प्रहसन्ती प्राहतवती। सोऽपि किञ्चिदुन्मुखः स्मयमानो मत्कर्मप्रहासितायाः राजदुहितुर्विलासप्रायमाकारमात्माभिलाषमूलमिव यथा तर्कयेत् तथा मयापि संज्ञयैव किमपि चतुरमाचेष्टितम्। स तु कामपरवश इव कथं कथमपि कन्यकागारादपासरत्।

अथाहं सायं राजकन्याङ्गुरीयकमुद्रितां वासताम्बूलादिगर्भां पेटिकां रागमञ्जर्य्यै प्रेषितां नीत्वा कान्तकागारमगाम्। स च अगाधे प्रेमसागरे मग्नो नावमिव मामासाद्य परमहृष्यत्। अवस्थान्तराणि च राजकन्यायाः सुदारुणानि

वर्णयन्त्या मया स दुर्मतिः सुदूरम् उदमाद्यत। इत्थञ्च सम्भुचितकामाग्निरेकान्ते स मयोक्तः आर्य्य! मम प्रतिवेशी कश्चित् सामुद्रिकः तव सुलक्षणानि दृष्ट्वा मामेकान्तेऽवदत् यथा राज्यमिदं कान्तकस्य हस्ते पतिष्यतीति। तदनुरूपञ्च राजकन्या त्वां कामयते तदेकापत्यश्च राजा तया सङ्गतञ्च त्वामुपलभ्य कुपितोऽपि नोच्छेत्स्यति प्रत्युत ग्राहयिष्यत्येव तुभ्यं राज्यं तदेवमर्थोऽर्थान्तरानुबन्धी कथं न अनुष्ठीयते, यदि कुमारीपुरप्रवेशाभ्युपायं नावबुध्यसे, ननु काराभित्तेः व्यामत्रयमन्तरालमारामप्राकारस्य केनचित् निपुणेन तस्करेण तावतीं सुरङ्गां कारयित्वा प्रविष्टस्य उपवनं तवोपरि अस्मदायत्तैव रक्षा। रक्ततरश्च तस्याः परिजनो रहस्यं न भेत्स्यतीति।

सोऽब्रवीत् भद्रे! साधूक्तम् अस्ति कश्चित् तस्करः खननकर्मणि सुनिपुणः, स चेत् लब्धः क्षणेन एतत् कर्म साधयिष्यतीति, कोऽसौ कथं न लभ्यते इति मयोक्ते स येन तद्धनमित्रस्य चर्मरत्नं मुषितं स इति त्वामेव निरदिक्षत्। यदि एवम् एहि त्वया अस्मिन् कर्मणि साधिते चित्रैरुपायैस्त्वामहं मोचयिष्यामीति शपथम् कृत्वा तेन सह सन्धाय सिद्धेऽर्थे भूयोऽपि निगड़यित्वा चौरोऽयं सर्वथा उपक्रान्तोऽपि न तत् अजिनरत्नं दर्शयिष्यति, इति राज्ञे विज्ञाप्य चित्रमेनं घातयिष्यसि, तथा सति अर्थः सिद्ध्यति रहस्यञ्च न भेत्स्यतीति मया उक्ते सोऽतिहृष्टः तथा इति प्रतिपद्य मामेव त्वत्प्रलोभने नियुज्य वहिरवस्थितः, किमतःपरं विधेयं चिन्त्यतामिति।

प्रीतेन मया उक्तं मदुक्तमल्पं तवय एव अत्र महान् आनय एनमिति। अथानीतोऽयं मन्मोचनाय शपथं कृतवान् अहञ्च रहस्यानिर्भेदाय। ततोऽहं छिन्नबन्धनः काराभित्तिकोणा-

दारभ्य उरमास्येन सुरङ्गां कृत्वा अचिन्तयं जिघांसुना एव अमुना मन्मोचनाय शपथः कृतः, तदमुं हत्वापि न दोषेण लिप्ये इति निष्पतत एव मे निगडनाय प्रसार्य्यमाणपाणेस्तस्य पादेन उरसि प्रहृत्य पतितस्य तस्यैव छुरिकया शिरो न्यकृन्तम्। ततश्च शृगालिकामुखेन कन्यान्तःपुरसन्निवेशं ज्ञात्वा अमुतः किञ्चित् चोरयित्वा निर्वर्त्तिष्ये इति मनसि कृत्वा तदुपदर्शितक्रमेण प्रविश्य कन्यान्तःपुरं दुग्धफेननिभे पर्य्यङ्कतले विश्रब्धप्रसुप्तां शरदम्भोधरोत्सङ्गशायिनीमिव सौदामिनीं राजकन्याम् अपश्यम्।

दृष्ट्वैव कामवशश्चोरयितव्यनिस्पृहः तया एव तावत् चौर्य्यमाणहृदयः किंकर्त्तव्यविमूढः क्षणं स्थित्वा व्यचिन्तयं चेदिमां नाप्नुयां न सृक्ष्यति मां मदनः, तदत्र प्राप्तरूपमिति विविच्य तत्रत्यं फलकमेकमादाय मणिसमुद्गकात् वर्णवर्त्तिकामुद्धृत्य तथा शयानां तस्याश्च चरणलग्नम् आबद्धाञ्जलिं मामालिखमार्य्याञ्चेमाम्।

त्वामयमाबद्धाञ्जलि दासजनस्तमिममर्थमर्थयते।
स्वपिहि मया सह सुरतव्यतिकरखिन्नैव, मा मैवम्॥

ततश्च अङ्गुलीयकविनिमयं कृत्वा कथं कथमपि तस्मात् निर्गत्य सुरङ्गया पुनर्बन्धनागारमेत्य च तत्र बद्धस्य नागरिकवरस्य सिंहघोषनाम्नः तेषु तेषु दिनेषु मित्रत्वेनोपचरितस्य एवं मया हतः कान्तक इति रहस्यं निर्भिद्य लब्धव्यो मोक्ष इत्युपदिश्य शृगालिकया सह निरगाम्। राजपथे च नागरिकपुरुषान् वञ्चयित्वा रागमञ्जरीगृहमेत्य चिरवियोगखिन्नां तामाश्वास्य नीत्वा च तां निशां प्रभाते पुनरुदारकेण सह समागच्छे।

अथ भगवन्तं मरीचिं पुनःप्राप्तप्रभावमुपगम्य तत्सकाशात्

त्वद्गतिमुपलेभे। सिंहघोषश्च कान्तकापचारं निर्भिद्य तत्-पदे प्रसन्नेन राज्ञा प्रतिष्ठापितः तेनैव सुरङ्गापथेन कन्यान्तःपुरं मां पुनरनयत्। समगंसि चाहं शृगालिकामुखविहृतवार्त्ता-नुरक्तया राजदुहित्रा। अत्रान्तरे चण्डवर्मा सिंहवर्मणावधू-तदुहितृप्रार्थनः कुपितः चम्पामवारुणत्। अजयच्च सिंहव-र्माणं बलेन। अम्बालिकाञ्च बलात् स्वशिबिरं नीत्वा तत्पाणौ विवाह इति कौतुकमबध्नाच्च। अहञ्च धनमित्रमवोचं सखे! समापतितमङ्गनाथसहायं राजन्यबलं सुगूढं सम्भूय पौरवृन्दैः तदुपावर्त्तय ततश्च कर्त्तव्यमेव ग्रहणं द्रक्ष्यसीति तथाच तेनाभ्युपगते अहमस्य भवनमलक्ष्यस्सन् प्रविश्य अम्बालिका-पाणिम् अग्नौ साक्षिणि आदित्समानस्य बाहुदण्डमाकृष्य क्षुरिकया उरसि प्रहृत्य अन्यांश्च कतिपयान् तत्सहायान् निहत्य हतविध्वस्तं तद्गृहमनुविचरन् वेपमानमधुरगात्रीं प्रिया-माश्वास्य तदालिङ्गनसुखमनुबुभूषुस्तामादाय गर्भगृहमविशम् अभवञ्च तव नवाम्बुवाहगम्भीरस्वरेण अनुगृहीत इति।

श्रुत्वा स्मित्वा च राजपुत्रः कथं कार्कश्येन कर्णीसुत-मपि अतिक्रान्त इत्यभिधाय उपहारवर्माणं प्रति तद्वृत्तान्त-वर्णने समादिदेश।

इति द्वितीयोच्छ्वासः।

अथ तृतीयोच्छ्वासः।

उपहारवर्मचरितम्।

स प्रणम्य अभ्यधत्त देव! अहमेकदा पर्य्यटन् विदेहेषु कचिन्मठिकायां विश्रमितुमेत्य कामपि वृद्धतापसीमपश्यम्। तान्तु मद्दर्शनेनाश्रुमुखीमालोक्य किमेतदिति मया उक्ता सकरुणमब्रवीत् आयुष्मन्! मिथिलाधिपतिः प्रहारवर्मा नाम मगधराजस्य राजहंसस्य परं मित्रमासीत् तयोश्च महादेव्यौ वसुमती प्रियंवदे परस्परमप्रतिमं सख्यमादधाताम्। कदाचित् प्रथमगर्भाभिलाङ्कितां प्रियसखीं दिदृक्षुः प्रियंवदा वसुमतीं सह भर्त्रा पुष्पपुरमगमत्।

तस्मिन्नेव समये मालवेन मगधराजस्य महाजन्ये प्रवृत्ते मगधराजं दुर्लक्ष्यां गतिमापन्नमवगम्य मैथिलः कथञ्चित् प्राणितः स्वविषयं गच्छन् पथि ज्येष्ठस्य पुत्रैर्विकटवर्मप्रभृतिभिराक्रान्तं राज्यमुपलभ्य स्वस्रीयात् सुह्मपतेर्बलमादित्सुः अटवीपथमवगाहमानः लुब्धकलुप्तसर्वस्वोऽभूत्। अहञ्च कनीयसा तत्सुतेन हस्तवर्त्तिना वनचरशरपतनत्रस्ता वनमवगाह्य केनचित् शार्दूलेन आक्रान्ता निपतिता। मत्पाणिभ्रष्टश्च स बालः कस्यापि गोशवस्य क्रोड़मभ्यलीयत। सहसा तस्मिन् व्याघ्रे शबरशरेण निहते स बालकः शबरदारकैरपहृतः। अहञ्च मोहविह्वलः केनचित् पशुपालेन स्वकुटीरं नीत्वा सुस्थीकृता स्वभर्त्तुरन्तिकगमनाय यावत् यते तावत् मद्दुहिता केनापि यूना सह तमुद्देशमागता।

सा रुदती स्वहस्तगतस्य राजपुत्रस्य किरातहस्तगमनम् आत्मनश्च केनापि आरोग्यविधानं स्वस्यायाश्च पुनस्तेन उपयन्तु-

मिष्टाया निकृष्टजातिसंसर्गवैक्लव्यात् प्रत्याख्यानं तद्धर्मेण च अमुना निर्जने वने खशिरःकर्त्तनोद्यमं तेन यूना सहसा उपनीतेन तस्य दुरात्मनो हननम् आत्मनश्च उपयमनम् अकथयत्। स च पृष्टः मिथिलेन्द्रस्यैव कोऽपि सेवकः कारणविलम्बी तन्मार्गानुसारी विदितः। ततस्तेन सह आवां भर्त्तुरन्तिकमुपेत्य पुत्रयोर्वृत्तान्तेन तं राजानं प्रियंवदाञ्च नितरां व्यथयामासिव। स च राजा दुर्दैवात् ज्येष्ठभ्रातृपुत्रैश्चिरं विगृह्य बद्धः देवी च बन्धनं नीता। हतभाग्या अहं जीवितमपारयन्ती हातुं प्रव्रज्यामाश्रयम्। दुहिता तु मम अगत्या विकटवर्ममहिषीं कल्पसुन्दरीमशिश्रियत्। तौ चेत् राजसुतौ निर्बाधमजीविताम् इयता कालेन तव इमां वयोऽवस्थामाप्स्यताम्। तयोश्च सतोः दायादा नरेन्द्रस्य न ईदृशीं दशां घटयेयुः इत्युक्त्वा प्रवृत्तबाष्पम् अरोदीत्।

तदाकर्ण्य अहमपि बाष्पमुत्सृजन् अभ्यधां मातः! समाश्वसिहि, यस्ते हस्तात् प्रच्युतो बालः, स केनापि मुनिना लब्धः संवर्द्धितश्च वार्त्तेयं महती, किमनया सोऽहम्। मया च असौ विकटवर्मा कथमपि निहन्तुं शक्यः। माम् इतस्त्यः कश्चिदपि ईदृक्तया नो जानाति, पितरौ अपि न संविदाते, किमुत अन्ये तदेनमर्थमुपायेन साधयिष्यामि इति।

सा तु हृष्टा सरुदितं परिष्वज्य प्रस्नुतस्तनी सगद्गदमगदत् वत्स! चिरं जीव, अद्य सुप्रसन्नो विधिः अद्यैव प्रहारवर्मणि अधि विटङ्का जाताः। अहो! महत् भाग्यं देव्याः प्रियंवदायाः इति अभिधाय सहर्षं स्नानभोजनादिना मामुपाचरत्। रात्रौ कटशय्यामधिश्रितो विना उपधिम् अयमर्थो न साध्यः स्त्रियश्चोपधीनां महत् क्षेत्रम्। अतोऽन्तःपुरवृत्तान्तमस्या अवगम्य तद्द्वारेण किञ्चिदाचरयिष्यामि इति चिन्तयतः

एवं मे सा त्रियामा व्ययासीत् उदगाच्च भगवान् सहस्र-दीधितिः।

उत्थाय च मयि अवसितदिनमुखविधौ तां तापसीं मातः! विकटवर्मणः कश्चिदन्तःपुरवृत्तान्तमवगच्छसि? इति वदति एव काचिदङ्गना प्रत्यदृश्यत। ताम् आलोक्य सहर्षास्रं पुत्रि! पुष्करिके! पश्य भर्तृदारकम् अयमसौ अकृपया मया वने परित्यक्तः पुनरपि एवमधिगत इति वदन्तीं तां मे धात्रीं सा हर्षनिर्भरनिपीड़िता चिरं प्ररुद्य विलप्य सान्त्विता मया राजान्तःपुरवृत्तान्तमाचख्यौ। कुमार! कामरूपेश्वरस्य कलिन्दवर्मणः कन्या कल्पसुन्दरी नाम कलासु रूपे च अप्सरसोऽपि अतिक्रान्ता पतिमभिभूय वर्त्तते, पतिस्तु बह्ववरोधोऽपि तदेकवल्लभ इति।

तदाकर्ण्य अहं तया एव अपसर्पभूतया राजमहिष्या भर्त्तरि द्वेषं क्रमेण कौशलेन सम्पाद्य आत्मनः प्रतिकृतिमभिलिख्य मन्मात्रा तस्यै मत्तकाशिन्यै प्रहितवान्। सा तु चिरमीयमाणा तदवलोक्य ईदृशं सौन्दर्य्यं देवेऽपि कुसुमसायके न सन्निधत्ते केन इदमालिखितमिति समादृतवती दृष्ट्वा सा मम धात्री सस्मितम् अवादीत् "देवि! सदृशमाज्ञापयसि, भगवान् मकरकेतुः एव सुन्दर इति न शक्यते वक्तुं तद् यदि ईदृशः पुमान् स्यात् स किं लप्स्यते" इति। तयोक्तम् "अम्ब! किमुच्यते शरीरं जीवितं हृदयमिति सर्वमेतदमल्पम् अनर्हञ्च ततो न किञ्चित् लप्स्यते, न चेत् अयं विप्रलम्भः तदमुष्य दर्शनानुग्रहेण चक्षुश्चरितार्थं स्यात् तथा कार्य्यम्" इति। अन्यच्चातिगोप्यं कथयामि मम तातस्य राज्ञा प्रहारवर्मणा परं सख्यमासीत् मातुश्च मे मानवत्या देवी प्रियंवदा सखी आसीत् ताभ्यां पुनरजातापत्याभ्यां समयः कृतः,

आवयोः पुत्राय दुहितृमत्या दुहिता देया इति तातस्तु मां जातां प्रनष्टपुत्रा प्रियंवदा इति विकटवर्मणे दत्तवान्। अयन्तु निष्ठुरः कामोपचारेषु अविचक्षणः मृषावादी न रोचते मे भर्त्ता। परलोकभयञ्च ऐहिकेन अन्तरितम् अतोऽमुना यूना मामद्य श्वो वा समागमय इति। तदाकर्ण्य सा मदन्तिकमेत्य तत्सर्वं निवेद्य अतःपरं भर्त्तृदारकः प्रमाणमित्युक्त्वा विरराम।

ततोऽहं तन्मुखात् राजमन्दिरसंविभागं सम्यग्ज्ञात्वा तां पुष्करिकां कृतसङ्केतां राजमहिष्याः सन्निधौ संप्रेष्य निशायां शयनगतो व्यचिन्तयं सिद्धप्राय एवायमर्थः, किन्तु परदारपरामर्शात् धर्मव्यतिक्रमः स्यात् स च अर्थकामयोर्द्वयोरधिगमे नीतिं न बाधते, प्रत्युत पित्रोः उद्धारसम्पादनेन महान्तं धर्ममावहति, एतदाकर्ण्य देवो राजवाहनः सुहृदो वा किं वक्ष्यन्तीति चिन्तापर एव निद्रामभजे, दृष्टश्च स्वप्ने भगवान् भर्गः प्राह "सौम्य उपहारवर्मन्! मा अत्र संशयः कार्य्यः, त्वं मदंशः, असौ च मत्तकाशिनी सुरसरित्, अमूं कदाचित् गणपतिः जलक्रीड़ां कुर्वन् अवातरत्। सा तु सपत्नीतनयविहितां विलोडनामसहमाना तमशपत्। एहि मर्त्त्यत्वमिति सोऽपि अहेतुकशापप्रदानात् कुपितः तां शशाप यथा इह बहुभोग्या तथा प्राप्यापि मानुष्यकमनेकसाधारणी भव इति। इत्थं प्रतिशप्ता सा सुदुःखिता मामेत्य सगद्गदमगदत् नाथ! भवच्चरणनिरताहं गजाननेन इत्थं शप्ता, तदाकर्ण्य सकृपेण मया उक्तं प्रिये! न अस्य शापोऽन्यथा भवेत्, परमहं त्वदनुग्रहार्थं द्विधा भूत्वा विकटवर्मोपहारवर्मरूपाभ्यां मर्त्त्यलोकेऽवतरिष्यामि। त्वं कामरूपेश्वरस्य कन्या कल्पसुन्दरी नाम भूत्वा ज्यायसा मदंशेन विकटवर्मणा किञ्चित्-

कालं सङ्गता ततस्तस्मिन् स्वमूर्त्तौ एव लयमुपगते उपहार-वर्मणा मत्कनिष्ठेन अंशेन साकं चिरं विविधसुखमनुभविष्यसि, तदयमर्थो भव्यो मा अत्र शङ्का कार्य्या" इति ।

अहञ्च तत्क्षणं प्रतिबुद्धः कथञ्चित् तदहर्गमयित्वा समागतायां निशायां सञ्चरत्सु तिमिरेषु नीलनिवसनः खड्गपाणिः मातृनिर्दिष्टान्तःपुरसन्निवेशस्मरणेन सोत्साहं पूर्वसङ्केतितं माधवीलतामण्डपं प्रविश्य कान्तया सह समगंसि । कृतालिङ्गनश्च तां विशाललोचनाम् अनर्गलकलप्रलापिनीं यथाकामम् अरीरमम् । ततश्च मां निर्यान्तमालोक्य सा दीनानना सवाष्पमाचष्ट नाथ ! यदि प्रयासि, प्रयातं मे जीवितं गणय, नय मामपि यथा ते रोचते, इति कृताञ्जलिं तामवादिषं प्रिये ! कः पुमान् ईदृशीं कामिनीं न कामयते, यदि मयि अनुरागस्ते निश्चलः, तदाचर अविचारं मदुपदिष्टम् । दर्शय राज्ञे मच्चित्रपटम् आचक्ष्व च किमियमाकृतिः सौन्दर्य्यस्य परां कोटिमारूढ़ा न वा इति । वाढ़मिति स नियतं वक्ष्यति । पुनश्च ब्रूहि यदि एवम् अस्ति कापि तापसी नानादेश-भ्रमणेन लब्धवेदग्धा मन्मातृभूता, तया इदमालेख्यरूपं प्रदर्श्य अहमुक्ता "पुत्रि ! अस्ति तादृङ्मन्त्रो येन त्वमुपोषिता पर्वणि विविक्तायां भूमौ पुरोहितैर्हुतमुक्ते हुताशने नक्तम् एकाकिनी शतं चन्दनसमिधः शतमगुरुकाष्ठानि, कर्पूरमुष्टीः पट्टवस्त्राणि च हुत्वा भविष्यसि एवमाकृतिः । ततः चालयिष्यसि घण्टां घण्टारवाद्गतश्च भर्त्ता तुभ्यं सर्वं रहस्यमाख्याय निमीलिताक्षो यदि त्वामालिङ्गेत् इयमाकृतिस्तमुपसंक्रामेत् त्वन्तु यथापुराकृतिरेव भविष्यसि यदि भवत्यै राज्ञे च एवं रोचेत तदा अविचारमिदमनुष्ठीयतां न अत्र विसंवाद-शङ्का कार्य्या" इति । अतो वपुर्भेदिदं तवाभिमतं सह सुहृद्भि-

मन्त्रिभिः पौरवर्गैश्च संमन्त्र्य तदनुमतेन कर्मणि अस्मिन् अभियुज्यताम् इति ।

स नियतमभ्युपैष्यति । ततश्च त्वं कृतकनर्मस्मिता विकटवर्म्मणः कर्णे एवम् आलपिष्यसि धूर्त्त! त्वमकृतज्ञः, मदनुग्रहलब्धेनापि रूपेण लोकलोचनोत्सवायमानेन मत्सपत्नीः अभिरमयिष्यसि, न अहमात्मविनाशाय वेतालोत्थापनमाचरेयम् इति श्रुत्वा इदं त्वद्वचः स यद् वदिष्यति तन्मह्यं ज्ञापयिष्यसि, साम्प्रतं मत्पदचिह्नानि च उपवने पुष्करिकया प्रमार्जय इति । सा तथा इति शास्त्रोपदेशमिव मदुक्तमादृत्य अहृष्टतरागैव कथमप्यन्तःपुरमगात् । अहमपि यथापूर्वं निर्गत्य स्वमावासं प्रत्ययासिषम् ।

अथ सा तथैव तमर्थमन्वतिष्ठत् । अतिष्ठच्च स दुर्मतिस्तन्मते । अभ्रमच्च पौरजानपदेषु इयमद्भुतायमाना वार्त्ता । बृहस्पतिप्रतिमबुद्धिभिरपि मन्त्रिभिः अनुमोदितं यदि एवं नान्यदतः परमस्ति किमपि अद्भुतम् अचिन्त्यो मणिमन्त्रौषधीनां प्रभाव इति प्रसृततरेषु लोकवादेषु प्राप्ते पर्वदिवसे प्रगाढ़ायां तिमिरनिपीड़ितायां प्रदोषवेलायाम् अन्तःपुरोद्यानात् उदगमत् महान् धूमसञ्चयः। क्षीराज्यदधितिलगौरसर्षपवसामांसरुधिराहुतीनां परिमलः पवनानुसारी दिशि दिशि। अथ प्रशान्ते च तस्मिन् धूमोद्गमे गृहोद्यानमहमगमम् आगमच्च सा गजगामिनी। आलिङ्ग्य मां सस्मितमभाषत धूर्त्त ! सिद्धं ते समीहितम् अवसितश्च पशुरसौ। अमुष्य उपप्रलोभनाय त्वदादिष्टया दिशा मया उक्तं कितव ! न साधयामि सौन्दर्य्यं त्वमेवं सुन्दरो भूत्वा अप्सरसामपि स्पृहणीयो भविष्यसि किमुत मानुषीणां मधुकर इव निसर्गचापलात् यत्र क्वचिदासज्जसि मवादृशो जन इति तेन तु मे पादयोर्निपत्य अभिहितं

प्रिये! क्षमस्व मत्कृतानि दुष्कृतानि मनसा अपि न अतःपरं चिन्तयेयम् अपरनारीः। त्वरस्व प्रकृते कर्मणि इति। एवमालपन्तीं तां समालिङ्ग्य पुनःपुनश्चुम्बित्वा इहैव कुरुवक-गुल्मगर्भे तिष्ठ यावदहं साधयेयं कार्य्यमिति विसृज्य उपसृत्य च होमप्रदेशं घण्टामचालयम्। अकूजश्च सा तं जनं कृतान्तदूतीव प्राह्वयन्ती, आयासीच्च राजा तं देशम्। अगुरुचन्दनानि जुह्वतं मां दृष्ट्वा शङ्कापन्नमिव तं सविस्मयं विचार्य्य तिष्ठन्तमब्रवं ब्रूहि सत्यं भूयोऽपि भगवन्तं चित्रभानुं साक्षीकृत्य न चेदनेन रूपेण मत्सपत्नीः अभिभवियष्यसि, ततस्त्वयि इदं रूपं सङ्क्रामयिष्यामीति। स तदेव दैव्या इव इयं नापधिः इति सञ्जातप्रत्ययः शपथाय प्रावर्त्तत, ततः स्मित्वा पुनरुभयोक्तं कथय कानि ते रहस्यानि, तत्कथनान्ते च त्वत्स्वरूपभ्रंश इति।

साऽब्रवीत् अस्ति वृद्धो मत्पितुः कनीयान् भ्राता प्रहारवर्मा, तं विषान्नेन व्यापाद्य अजीर्णदोषं ख्यापयिष्यामीति मन्त्रिभिः सह अध्यवसितम् अनुजाय विशालवर्म्मणे दण्डचक्रं पुण्ड्राभियोगाय दित्सितं पौरवृद्धः पाञ्चालिकः परिव्रातश्च सार्थवाहः खनतिनाम्ना यवनात् वज्रमेकं वसुन्धरामूल्यं लघीयसा मूल्येन लब्धमिति ममैकान्तेऽसमन्वयेताम्। गृहपतिश्च मम अन्तरङ्गभूतो जनपदमहत्तरः शतहलिः अलीकवादशीलमवलेपवन्तं दुष्टग्रामणीमनन्तसीरं जनपदकोपेन घातयेयम् इति दण्डधरानुद्धारकर्मणि मत्प्रयोगात् नियोक्तुमभ्युपागमत्। इत्थमिदमचिरं प्रवृत्तं रहस्यम्। इत्याकर्ण्य तमहम् इयत् तवायुः उपपद्यस्व स्वकर्मोचितां गतिम् इति छुरिकया द्विधाकृत्य कृत्तमात्रं तस्मिन्नेव समाचिषि अजुहवम् अभूच्चासौ भस्मसात्। अथ स्त्रीस्वभावविह्वलां प्रापयन्नभां समाश्वस्य हस्त-

किसलये गृहीत्वा गत्वा च तद्गृहम् आहूय च तदनुमत्या सर्वाणि अन्तःपुराणि सद्य एव तेषां दत्तवान्। ततो विस्मितान् तान् सर्वान् विसृज्य शय्यागृहे तया कान्तया सह प्रविश्य तामभिरमयन् क्षणमिव तां निशामनैषम्। अध्यगमञ्च तन्मुखात् राजकुलस्य शीलम्।

अथ उषसि स्नात्वा कृतमङ्गलो मन्त्रिभिः समागतः तानवादिषम् आर्य्याः! रूपेणैव परिवृत्तो मम स्वभावः, य एष विषान्नेन हन्तुमिष्टः पिता मे, स मुक्त्वा स्वमेव राज्यं भूयोऽपि ग्राहयितव्यः। पितृवदमुष्मिन् शुश्रूषया एव वर्त्तामहे न हि अस्ति पितृवधात् पातकमिति भ्रातरं विशालवर्म्माणमाहूय उक्तं वत्स! न सुभिक्षाः साम्प्रतं पुण्ड्राः, ते उपद्रुता राष्ट्रं नः सुभिक्षमभिद्रवेयुः अतो न अद्य यात्रा कार्य्या इति नगरवृद्धौ अवादिषम् अल्पीयसा मूल्येन महार्हं वस्तु न क्रेतव्यम्, अनुरूपेणैव मूल्येन क्रीयतामिति। शतहलिं च उक्तवान् योऽसौ अनन्तसीरः प्रहारवर्म्मणः पक्ष इति निनाशयिषितः, सोऽपि पितरि मे प्रकृतिस्थे किमिति नाश्येत तत् त्वयापि न अत्र संरम्भः कार्य्य इति।

तं च सर्वे सर्वमेतदाभिज्ञानिकमुपलभ्य स एवायमिति निश्चिन्वाना विस्मयमाना मां महादेवीञ्च प्रशंसन्तो मन्त्रबलानि च उद्घोषयन्तः बन्धनात् पितरौ मोचयित्वा स्वं राज्यं प्रत्यपादयन्। अहञ्च सर्वमिदं तया मे धात्र्या आचेष्टितं पितरौ अवगमय्य प्रहर्षकाष्ठाधिगतयोस्तयोः पादमूलमभजे। अभज्ये च यौवराज्यलक्ष्म्या तदनुज्ञातया। इत्थं सिद्धकामो देवपादविरहदुःखदुर्भगान् भोगान् उपभुञ्जानः भूयोऽस्य सिंहवर्म्मणः लेख्यात् चण्डवर्म्मणः चम्पाभियोगमवगमय्य शत्रुवधो मित्ररक्षा च उभयमपि करणीयमिति प्रभूतेन सैन्यचक्रेण

भ्यसरम्। अभवच्च भूमिस्तत्पादपद्मसाक्षात्कारानन्दराशेः इति।

श्रुत्वैतद्देवो राजवाहनः सस्मितमवादीत् पश्यत पारदारिकमुपधियुक्तमपि गुरुजनबन्धमोचहेतुतया दुष्टामित्रबधसाधनतया राज्यलाभमूलतया च पुष्कलौ अर्थधर्मौ असाधयत्। किं हि बुद्धिमद्भिः प्रयुक्तं न अभ्युपैति शोभामिति अर्थपालमुखे दृष्टिं निधाय ब्रवीतु भवान् आत्मीयं चरितमित्यादिदेश।

इति तृतीयोच्छ्वासः।

अथ चतुर्थोच्छ्वासः।

अर्थपालचरितम्।

सोऽब्रवीत् "देव! अहमपि भवदन्वेषणैककर्मा पर्यटन् कदाचित् काशीपुरीमेत्य मणिकर्णिकायामुपस्पृश्य भगवन्तमन्धकमथनमभिप्रणम्य प्रदक्षिणं कुर्वन् कमपि पुरुषमायामवन्तमाबध्यमानपरिकरं रुदितोच्छूनताम्रदृष्टिमपश्यम् अतर्कयच्च कर्कशोऽयं पुरुषः कार्पण्यमिव वर्षति स्नानतारेण चक्षुषा। आरम्भश्च साहसमनुवदति नूनमसौ प्राणनिस्पृहः किमपि घोरव्यसनमूलं कृच्छ्रं प्रपित्सते इति अपृच्छमेनं भद्र! समाहोऽयं साहसमवगमयति न चेद् गोप्यं श्रोतुमिच्छामि। स मां सबहुमानं निर्वर्ण्य को दोषः श्रूयतामिति क्वचित् वीरतलौ मया सह कथामकार्षीत्।

सौम्य! अहमस्मि पूर्वं कामचारी पूर्णभद्रो नाम। पिता

प्रयत्नसंवर्द्धितोऽपि दैवगत्या चौर्य्यवृत्तिः आसम्। अथ अस्यां काशीपुर्य्यां वैश्यश्रेष्ठस्य कस्यचित् गेहे चोरयित्वा अपहृतवस्तुना अभिग्राहितो बद्धः। बद्धे च मयि मृत्यु-विजयो नाम हिंसाविहारी मत्तगजः पश्यतः कामपालनाम्नः प्रधानामात्यस्य शासनात् मां प्रति महावेगेन समापतत् मया च निर्भयेण निर्भर्त्सितः भीतवत् न्यवर्त्तत। तदवलोक्य मन्त्री मामाहूय अवादीत् भद्र! मृत्युरेव अयं हिंसाविहारी गजेन्द्रः त्वया एवं निराकृतः, तत्प्रीतोऽस्मि ते, विरम अस्मात् अप-कर्मणः अद्यप्रभृति आर्य्यवृत्त्या मामनुवर्त्तस्व इति। यथा आज्ञापयसि इति मयोक्तः मित्रमिव मामनुगृह्य जातविश्रम्भेण मया एकदा पृष्टः स्वचरितमाचष्ट।

आसीत् कुसुमपुराधिपतेर्मन्त्री धर्मपालो नाम, तस्य पुत्रः सुमित्रो नाम पित्रैव समः प्रज्ञागुणेषु तस्यास्मि वैमात्रेयः कनीयान् भ्राताहम्। शैशवे दुर्वृत्तोऽहं तेनोपदिष्टोऽपि यदृच्छया दिक्षु भ्रमन् अस्यां वाराणस्यां समेत्य अस्याः पतेः चण्डसिंहस्य कन्यां कान्तिमतीं कथञ्चन चकमे सञ्जग्मे च। गूढं विहरता मया सा सञ्जातगर्भा पुत्रमेकमसूत अत्याचोत्र मृतजात इति। परिजनश्च अस्याः तं बालं क्रीड़ाशैलं शवरी च काचित् श्मशानं निनाय। रक्षिक-पुरुषभीतया तया अगत्या रहस्यनिर्भेदे कृते राजाज्ञया अहं श्मशानमुपनीय मातङ्गोद्यतेन खड्गेन प्राजिहार्षे। दैवबलात् लूनबन्धनोऽहं तमसिम् आच्छिद्य तं मातङ्गम् अन्यांश्च कांश्चित् प्रहृत्य पलायमानो निराश्रयश्च भ्रमन् कयापि दिव्ययोषिता उपस्थापितोऽस्मि। सा मया कृताञ्जलिना का त्वं कथं मामनुगृह्णासि इति सादरमभिहिता अब्रवीत् आर्य्य! अहमस्मि तारावली नाम यक्षकन्या, अहमेकदा

वाराणस्याः प्रेतावासे कमपि रुदन्तं बालकं दृष्ट्वा आदाय स्नेहेन पित्रोः सकाशमनैषम्। अनैषीच्च तातो देवस्यालकेश्वरस्य आस्थानीम्। तेन देवेन अहमाहूय अभिहिता वत्से! बालेऽस्मिन् कीदृशः ते भाव इति। औरस इव अस्मिन् वत्सलता इति मयोक्ते स सत्यमाह वराकीति तन्मूलां महतीं कथामकरोत्। तत्र एतत् मया अवगतं त्वं मम जन्मान्तरीणः पतिः, तस्मिंश्च जन्मान्तरे शिशुरयं मद्गर्भजः, मम च विनयवती नाम या सपत्नी आसीत् तया असौ बालः स्नेहेनावर्द्धत। ततश्च तस्यां कान्तिमत्यवस्थायामद्य स बालः समुद्भूत्। एवं मृत्युमुखपरिभ्रष्टं दैवान्मया उपलब्धं तं तस्यैव देवस्य आदेशात् वने तपस्यतो राजहंसस्य देव्यै वसुमत्यै तत्सुतस्य भाविचक्रवर्त्तिनो राजवाहनस्य परिचर्य्यार्थं समर्प्य गुरुभिरनुज्ञाता साम्प्रतं कृतान्तबलात् कृतान्तमुखपरिभ्रष्टस्य भवतः पादपद्मसुश्रूषार्थमागता अस्मि इति।

श्रुत्वा तां जननान्तरप्रियामसकृदाश्लिष्य सहर्षं तत्प्रभावरचिते महति मन्दिरे अहर्निशं भूमिदुर्लभान् भोगान् भुञ्जानः कदाचित् तामवादिषं प्रिये! प्रत्यपकारेण मत्प्राणद्रोहिणश्चण्डसिंहस्य वैरनिर्यातनसुखमनुबुभूषामि इति। तया सस्मितया उक्तम् एहि कान्त! कान्तिमतीदर्शनाय इति निशीथेऽहं राज्ञो वासगृहमनीये। अहन्तु तच्छिरोभागवर्त्तिनीमसियष्टिमादाय तं नृपं प्रबोध्याब्रवम् अहमस्मि तव जामाता त्वदनुमतिमन्तरेण त्वत्कन्याभिमर्षी, तमपराधमनुवृत्त्या प्रमाष्टुंमागत इति।

सोऽतिभीतो बद्धाञ्जलिरवदत् अहमेव मूढोऽपराधी यस्तव दुहितृसंसर्गानुग्राहिणो ग्रहग्रस्त इवोत्क्रान्तसीमा बधमादिशम्। आस्तां तावत् कान्तिमती, राज्यमिदं जीवि-

तच्च मम अद्यप्रभृति त्वदायत्तमिति। परेद्युश्च प्रकृतिमण्डल-माहूय यथाविधि कन्यां मह्यमदात्। तारावली च कान्ति-मत्यै तनयवार्त्तामश्रावयत्। इत्थमहं मन्त्रिपदापदेशं यौवरा-ज्यमनुभवन् सुखं विहरामि।

एवं गते स महाभागः कालेन क्षयरोगेण स्वर्गते श्वशुरे ज्यायसि च श्याले चण्डघोषनाम्नि स्त्रीषु अतिप्रसङ्गात् प्रागेव क्षयं गते पञ्चवर्षदेशीयं सिंहघोषाख्यं कुमारमभ्यषिचयत्। अवर्द्धयच्च यथाविधि तं स साधुः। अथ असौ यौवनोन्मत्तः कतिपयैर्दुर्मन्त्रिभिरित्थमग्राह्यत यथा तव अनेन स्वसा प्रसह्य बलात्कृता लम्पटेन, ततश्च प्रसुप्ते राजनि प्रहर्त्तुमुद्यतासि-रासीत्। तच्च दैवज्येष्ठं विषेण हत्वा बालोऽयमसमर्थ इति लब्धापि प्रकृतिविश्रम्भेण उपेक्षितः। तत् शीघ्रमेवामुमन्त-कपुरं नेतुमर्हति देव इति। स एवं दूषितोऽपि यक्षिणीप्र-भावात् नामुष्मिन् पापमाचरितुमशकत्।

अथ केनापि कारणेन यक्षिण्या विरहमुपलभ्य निर्भयो-ऽसौ यथापूर्वं राजकार्य्याणि कुर्वन्तं तं पूर्वसङ्केतितैः पुरु-षैरभिग्राह्य अबन्धयत् आदिशच्च तस्य मरणफलं नेत्रोत्पा-टनमिति। अतोऽहमेकान्ते यथेष्टमश्रु मुक्त्वा तस्य साधोः पुरः प्राणान् मुमुक्षुर्बध्नामि परिकरमिति।

मया अपि तत्पितृव्यसनमाकर्ण्य सास्रु अभिहितं सौम्य! किं गोपनेन यक्षकन्यया वसुमतीहस्ते यः समर्पितः पोतः, सोऽहमस्मि, तदत्र किं प्रतिपत्तव्यमिति वदति एव मयि, सहसा आशीविषः प्रत्यदृश्यत, तमहं मन्त्रबलेन संगृह्य पूर्ण-भद्रमवादिषं भद्र! सिद्धं नः समीहितम् अनेन पितरं नेत्रो-त्पाटनार्थमानीतं यदृच्छया पातितेन दंशयित्वा तथा विषं स्तम्भयेयं यथा मृत इत्युदाश्येत। ततश्च पूर्णभद्रमुखेन मातरं

प्रबोध्य तया यद् यत् करणीयं, तत्तदुपदिश्य च घोषणास्थाने तिन्तिड़ीवृक्षमारुह्य गूढ़तनुरतिष्ठम्। तावन्मे पितरं तस्करमिव पश्चाद्‌बद्धभुजमनेकजनानुयातमानीय मदभ्यास एव स्थापयित्वा मातङ्गः त्रिवारम् अघोषयत्। एष मन्त्री कामपालः भर्त्तारं चण्डसिंहं युवराजं चण्डघोषञ्च निहत्य पुनर्देवेऽपि सिंहघोषे पापमाचरिष्यन् विश्वासात् रहस्यभूमौ अमात्यं शिवनागादिकमाहूय राजबधायोपजप्य स्वामिभक्त्या तद्विवृतगुह्यः राज्यकामुकस्यास्य ब्राह्मणस्यान्धतमःप्रवेशो न्याय्य इति विचारपतिवाक्यादच्युद्वरणार्थं नीयत इति।

श्रुत्वैतद्धद्धकलकले जनसमूहे पितुरङ्के तमाशीविषं न्यक्षिपम्। अस्तम्भयञ्च क्षणेन विषम्। अपतच्च स भूमौ मृतकल्पः। स च दर्वीकरस्तमपि चण्डालं दष्ट्वा त्रासद्रुतलोकदत्तमार्गः प्राद्रवत्। अथ मे माता प्राक् पूर्णभद्रप्रबोधिता तादृशेऽपि व्यसने नातिविह्वला पद्भ्यामेव आगत्य मत्पितुरुत्तमाङ्गमुत्सङ्गेन दधती राजानं समादिशत् एष मम पतिस्तवापकर्त्ता न वा इति दैवमेव जानाति, न मेऽनया चिन्तयास्ति फलम् अस्य तु गतिमननुप्रपद्यमाना भवत्कुलं कलङ्कयेयम् अतोऽनुमन्तुमर्हसि भर्त्रा सह चितामधिरोढुमिति तदाकर्ण्य प्रीतः स राजा समादिशत् क्रियतां कुलोचितमनुष्ठानम् अनुभूयताञ्च मे भगिनीपतिना उत्सवोत्तरः पश्चिमो विधिरिति। अथानीतः पिता मे विविक्तायां भूमौ स्थापितश्च। अथ मदम्बा सहमरणमण्डनमनुष्ठाय रुदती पितुरन्तिकं मे प्राविक्षत्। तत्र च पूर्वमेव पूर्णभद्रोपस्थापितेन मया मन्त्रबलेन निर्विषीकृतं पितरमैक्षत। ततश्च हृष्टतमा पितुर्मे पादयोरश्रुमुखी पतन्ती मां मुहुर्मुहुः परिष्वज्य सहर्षमङ्कमारोपयन्ती तस्मिन् क्षणे किमपि अन्यादृशीवाजनिष्ट। पितापि

मे पूर्णभद्रमुखेन सविस्तरमावेदितमद्वृत्तान्तः भगवतो मघवतोऽपि भाग्यवन्तमात्मानमजीगणत्। अथाहं पित्रोरकथयम् आज्ञापयतं किमिदानीं करणीयमिति। पिता अब्रवीत् वत्स! गृहमेतदस्मदीयमतिविशालं सन्ति अत्र बहूनि अक्षय्याणि आयुधानि अलङ्घ्या च गुप्तिः, उपकृताश्च मया अतिबहवः सन्ति सामन्ताः, प्रकृतयश्च बहवो न मे व्यसनमनुमोदन्ते सुभटानाञ्च अनेकसहस्रमस्ति। अतोऽत्रैव स्थित्वा कथमपि दुर्दान्तमेनमुच्छेत्स्याम इति अनुमोदितञ्च मया तातस्य तदभिप्रेतम्।

इत्थमवस्थितेषु अस्मासु राजा विज्ञातोदन्तः अस्मदुच्छेदाय बहून् उपायान् प्रायुङ्क्त ते च अस्माभिरहन्यन्त। एतस्मिन्नवसरे पूर्णभद्रमुखात् राज्ञः शयनस्थानमवगम्य स्वगृहकोणात् सुरङ्गामकार्षम्। गता च सा भूमिस्वर्गकल्पमनल्पकन्यकाजनं कमपि उद्देशम्। तत्र च मां दृष्ट्वा प्रव्यथितेषु नारीजनेषु काचित् इन्दुकला इव स्वलावण्येन रसातलान्धकारं निह्नुवाना राजलक्ष्मीरिवानेककुनृपपरिहाराय मह्नीविवरं प्रविष्टा निष्टप्तकनकपुत्त्रिका इवावदातकान्तिः कन्यका चन्दनलता इव मलयमारुतेन मद्दर्शनेन उदकम्पत। काचिच्च तन्मध्यात् स्थविरा पादयोर्मे निपत्य सत्रासम् अब्रवीत् दीयतामभयदानमस्मै अनन्यशरणाय स्त्रीजनाय, किमसि देवकुमारो दनुजयुद्धतृष्णया रसातलं विविक्षुः, आज्ञापय कोऽसि, किमर्थमागतोऽसीति। मया उक्तं मास्म भवत्यः! भैषुः, अहमस्मि कामपालात् विप्रमुख्यात् देव्यां कान्तिमत्यामुत्पन्नोऽर्थपालो नाम, सत्यर्थे निजगृहात् नृपगृहं प्रविशन् युष्माभिर्दृष्टः, कथयत काः स्थ यूयं कथं वा अत्र निवसथ इति।

सा कृताञ्जलिरभ्यधात् भर्त्तृदारक ! भाग्यवत्यो वयं यास्त्वामद्य एभिरेव चक्षुर्भिरद्राक्ष्म । श्रूयतां तव मातामहेन चण्डसिंहेन चण्डघोषः कान्तिमतीत्यपत्यद्वयमुदपादि । चण्डघोषस्तु युवराजः स्त्रीषु अतिप्रसङ्गात् प्रागेव क्षयमगात् भार्य्यायामाचारवत्यामन्तर्वत्न्याम् । असौ च इमां मणिकर्णिकां नाम कन्यां प्रसूय तत्प्रसववेदनया त्यक्तप्राणा पत्युरन्तिकमगात् । ततश्च देवः चण्डसिंहो मां रहसि समाज्ञापयत् ऋद्धिमतिके ! कन्याम् इमां सुलक्षणां वर्द्धयित्वा मालवेन्द्रनन्दनाय दर्पसाराय दित्सामि बिभेमि च कान्तिमतीवृत्तान्तेन कन्यकानां प्रकाशावस्थापनात् । अतोऽत्रैव महति भूमिगृहे प्रभूतपरिवर्हया भवत्या संवर्द्ध्यतामियम् । अस्ति अत्र भोग्यवस्तु वर्षशतेनाप्यक्षय्यमित्यभिधाय निजवासगृहस्याङ्गनभित्तावर्द्धपादं किष्कुविष्कम्भमुद्धृत्य तेनैव द्वारेण स्थानमिदमस्मानवीविशत् । इह वसन्तीनां नो द्वादश समाः समत्ययुः । इयञ्च वत्सा तरुणीभूता, न च अद्यापि स्मरति राजा काममियं पितामहेन दर्पसाराय दित्सिता, परं त्वदम्बया कान्तिमत्या च इयं गर्भस्थैव द्यूतजिता स्वमात्रा तव एव जायात्वेन सङ्कल्पिता, तदत्र प्राप्तरूपं चिन्त्यतां कुमारेणेति । अहन्तु अद्यैव राजगृहे किमपि कार्य्यं साधयित्वा प्रतिनिवृत्तो यथाहं प्रतिपत्स्ये इति तामुक्त्वा तेनैव दीपदर्शितबिलपथेन अर्द्धरात्र एव वासगृहं प्रविश्य विस्रब्धसुप्तं सिंहघोषं जीवग्राहमग्रहीषम् आकृष्य च तमहिमिव अहिमतुः स्फुरन्तममुनैव भित्तिरन्ध्रेण क्षोणसन्निधिं ततः स्वभवनञ्च नीत्वा आयसनिगड़सन्दानितचरणयुगलम् अवनमितमलिनवदनम् अश्रुबहुलरक्तचक्षुषं पित्रोर्ममादर्शयमकथयञ्च विलकथाम् ।

अथ पितरौ तं निकृष्टाशयं सिंहघोषं बन्धने नियम्य

यथाविधि तस्या दारिकायाः मां पाणिमग्राहयेताम्। अराजकञ्च तद्राज्यमस्मदायत्तमेव जातं प्रकृतिकोपभयात् तु मन्मात्रा मुमुक्षितोऽपि न मुक्त एव सिंहघोषः। तथा स्थिता वयं सहसा सिंहवर्म्मणः देवपादभक्तस्य अमित्राभियोगम् आकर्ण्य अभिसरन्तः देवचरणदर्शनसुखमलभेमहि। इति अभिधाय कृताञ्जलिं तिष्ठन्तं तं देवो राजवाहनः सस्मितं प्राह स्म बहु पराक्रान्तं बुद्धिश्च समुपयोगिनी साम्प्रतं मुक्तबन्धस्ते श्वशुरः पश्यतु माम् इत्यभिधाय प्रीतिपूर्णः त्वमपि स्वचरितमाख्याहीति प्रमतिमन्वयुङ्क्त।

इति चतुर्थोच्छ्वासः।

अथ पञ्चमोच्छ्वासः।

अथ प्रमतिचरितम्।

सोऽब्रवीत् देव! भवदन्वेषणाय भ्रमन्नहं विन्ध्याद्रिपार्श्वरूढ़स्य कस्यचित्तरोरधः सन्ध्यायां समुपास्य सन्ध्यां भूतले किसलयशय्यामधिशयानः कृताञ्जलिः या अस्मिन् वनस्पतौ वसति देवता सा एव मेऽद्य शरणमस्तु इति उपधाय वामभुजं निद्रामगच्छम्। क्षणेन च अवनिदुर्लभेन स्पर्शेन किमपि सुखायितगात्रः परिस्फुरितदक्षिणभुजः किमेतदिति मन्दं मन्दमुन्मिषन् वामतः सौधोपरि चित्रास्तरणोपेतशय्यायां प्रसुप्तमङ्गनाजनं दक्षिणतश्च परमसुन्दरीं कामपि तरुणीं निद्रितामालोकयम्। अतर्कयञ्च क्व गतासौ महाटवी, कुत एतत् अभ्रङ्कषं सौधमागतं कश्चासौ सुराङ्गनाजन इव स्वैरसुप्तः

सुन्दरीजनः का च इयं देवीव अरविन्दवासिनी शयनतल-मधिशेते। अस्ति च अनतिक्रान्तशिष्टमर्य्यादचेतसो मम अस्यामासक्तिः, तदत्र यद्भवतु तद्भवतु भाग्यमत्र परीक्षिष्ये इति तां स्पृष्टास्पृष्टमेव किमपि सञ्जातरागसाध्वसं लघुसुप्तः स्थितोऽस्मि। सापि मत्स्पर्शेन किमपि सुखायमानेन मन्द-मन्दमुन्मिषन्ती त्रासविस्मयहर्षरागशङ्काविलासविभ्रमव्यव-हितानि व्रीड़ान्तराणि कानि कानि कामिनावस्थान्तराणि कार्य्यमाणा कथमपि भावविशेषान् निगृह्य सस्पृहेण मधुर-सङ्कुचितत्रिभागेन मन्दमन्दप्रचारितेन चक्षुषा मां निर्वर्ण्य तस्मिन्नेव शयनतले सचकितमशयिष्ट। अहञ्च कथमपि निद्रामभजे। सहसा प्रबुद्धश्चालक्षयं सा एव महाटवी, तदेव तरुतलं स एव पर्णशयनं विभावरी च अत्यगात्। किमिद-मिति विस्मितस्तत्त्वत एतदविदित्वा न त्यक्ष्यामि भूमिशयनं यावदायुरवत्यायै देवतायै प्रतिशयिष्यामि इति कृतमति-रतिष्ठम्।

अथ आविर्भूय कापि वराङ्गना विरहिणी इव लक्ष्यमाणा प्रणिपतन्तं मामुत्थाय पुत्रवत् परिष्वज्य स्नेहगद्गदमगादीत् वत्स! श्रुतमस्त्येतदायुष्मतः मगधराजमहिषीमुखात् यथा बालमर्थपालं मम हस्ते निक्षिप्य मणिभद्रस्य यक्षस्य कन्या तारावली अन्तर्हितेति, साहमस्मि, धर्मपालसूनोः काम-पालस्य गृहिणी, कथमपि भर्त्तृपादमूलात् निष्कारणकलु-षिता प्रोष्य जातानुशया स्वप्ने केनापि रक्षसा शप्तास्मि। चण्डिकायां त्वयि वर्षमात्रं वसामि प्रवासदुःखायेति। इति ब्रुवता एवाहमाविष्टा प्राबुध्ये। गतञ्च तद्वर्षं वर्षसहस्र-दीर्घम्। अतीतायान्तु यामिन्यां श्रावस्त्यां देवदेवस्य उत्सव-समाजमवलोक्य पतिपादमूलं गमिष्यामि इति प्रस्थितायामिव

मयि त्वमत्रागत्य प्रतिपन्नोऽसि शरणमिहत्यां देवतामिति प्रसुप्तोऽसि तदा तु न तत्त्वतः परिच्छिन्नो भवान् परं शरणागतमस्यां महाटव्यां परित्यज्य गन्तुमयुक्तमिति त्वां राज्ञः श्रावस्तीश्वरस्य धर्मवर्द्धनस्य प्रासादे विश्रब्धप्रसुप्तायास्तद्दुहितुर्नवमालिकायाः पार्श्वे शाययित्वा तमुद्देशमगमम्। तत्र च गत्वा उत्सवमनुभूय भगवतीं गौरीमभिवाद्य सद्य एव प्रत्यापन्नमहिमा प्रतिनिवृत्त्य त्वां यथावदभ्यजानं कथं मत्सुत एवायं वत्सस्यार्थपालस्य सखा प्रमतिरिति, दृश्यते च अयमस्यामासक्तभावः कन्याचैनं कामयते युवानम् उभौ चेमौ लज्जसुप्तौ त्रपया साध्वसेन च न किञ्चित् विवृण्वाते। गन्तव्यञ्च मया, साम्प्रतं नयामि तावत् यथास्थानं कुमारम्। परतश्च कथमपि उपायैरर्थमिमं साधयिष्यतीति भवन्तम् एतदेव पत्रशयनमनैषं साम्प्रतं गच्छामि भर्त्तृपादमूलमिति प्राञ्जलिं मामभिधाय प्रायात्।

अहञ्च कामवशः श्रावस्तीं गच्छन् पथि ताम्रचूड़युद्धनैपुण्यप्रदर्शनेन कमपि वृद्धविटं मित्रत्वेनाभिगृह्य तेनातितरां समादृतः स्मर्त्तव्योऽस्मि सत्यर्थे इति तेन विसर्जितः श्रावस्त्यामध्वश्रान्तो वाह्योद्यानलतामण्डपे शयितोऽस्मि। हंसरवप्रबोधितश्चोत्थाय मदन्तिकमायान्तीं कामपि तरुणीमपश्यम्। सा तु हस्तवर्त्तिनि चित्रपटे लिखितं कमपि पुरुषं माञ्च पर्य्यायेणावलोकयन्ती सस्मितं मामवादीत् सौम्य! देशातिथिरसि, दृश्यन्ते च ते अध्वश्रान्तानि इव गात्राणि, तदद्य मद्गृहे आगत्य अतिथिसत्कारोऽनुभूयतामिति। अहञ्च तथेति तद्गृहगतो राजार्हेण स्नानभोजनादिना परिचरितः सुखं निषण्णस्तया रहसि परिपृष्टः महाभाग! किञ्चिदद्भुतमुपलब्धं भवता कुतोऽपीति। अहन्तु लब्धावसरः भद्रे! देहि

चित्रपटमित्युक्तया तया दत्ते चित्रपटे चित्रितयुवकस्य पार्श्वे तामपि तथैव व्याजसुप्तां वल्लभामभिलिख्य काचिदेवंरूपा युवतिरीदृशस्य पुंसः पार्श्वे अरण्यान्यां शयानेन मयोपलब्धा किलैष स्वप्न इत्यालपम्। हृष्टतया तया सविस्तरं पृष्टः सर्वं वृत्तान्तमकथयम्। सा तु सख्या मन्निमित्तानि दशान्तराणि अवर्णयत्। अहन्तु तदाकर्ण्य यदि तव सख्या मय्यनुग्रहः, तदा कानिचित् दिनानि गमय, कमपि उपायं शीघ्रमाचरिष्यामीति तां विसर्ज्य तेन मित्रेण वृद्धविटेन समगंसि। तेनापि पूर्ववत् समादृतः किमर्थमचिरात् प्रत्यागत इति पृष्टस्तमवादिषं मित्र! श्रावस्तीश्वरस्य दुहिता प्रत्यादेश इव श्रियः नवमालिका नाम मया कथमपि दृष्टा कामनाराचपङ्क्तिमिव कटाक्षपङ्क्तिं मां प्रति व्यकिरत्। तच्छल्योद्धरणक्षमश्च त्वदृते नेतरोऽस्ति वैद्य इति प्रत्यागतोऽस्मि तदत्र कमप्युपायं कर्तुं, प्रसीद। मां स्त्रीवेशधारिणीं निजकन्यां कृत्वा त्वं धर्मासनगतं धर्मवर्द्धनं समेत्य वक्ष्यसि, ममेयमेकैव कन्या, जातमात्रायामस्यां जननी अस्याः संस्थिता, कथमप्येनामवर्द्धयम्। एतदर्थमेव विद्यामयं शुल्कमर्जयितुमवन्तीं गतोऽस्मद्वैवाहिकतनयः। तस्मै दित्सिता चेयं तरुणीभूता, स च विलम्बितः, तत्तमानीय पाणिमस्या ग्राहयित्वा सन्न्यसिष्ये। दुरभिरक्षतया च दुहितॄणां विशेषतो मुक्तशैशवानाममातृकाणां इह देवं पितृमातृस्थानीयमागतोऽस्मि। सैषा भवद्भुजतरुच्छायायामखण्डचारित्रा तावदास्तां यावदस्याः पाणिग्राहकमानयेयमिति। स एवमुक्तो नियतमङ्गीकरिष्यति, वासयिष्यति च स्वदुहितृसन्निधौ माम्। ततश्चाहं कियन्तं कालं तया रहसि विहृत्य पुनः कथमपि त्वत्सकाशमागमिष्यामि। ततश्च नृपात्मजां मामितस्ततो-

ऽन्विष्य अनासादयन्तीं तया विना न भोक्ष्ये इति रुदतीमालोक्य परिजनेषु व्याकुलेषु महति कोलाहले किं कर्त्तव्यतामूढ़े च राजनि त्वं मां जामातरं कृत्वा राजसभां गत्वा वक्ष्यसि देव! स एष मे जामाता समागतः, अधीती चतुर्षु आम्नायेषु विविधविद्याविचक्षणः चतुःषष्टिकलानिपुणः गजतुरगरथतन्त्रवित् धनुर्वेदविशारदः महागुणशाली, तदर्थं दुहितरं समर्प्य अन्त्यमाश्रममाश्रयेयमिति। स राजा इदमाकर्ण्य विवर्णवदनः सामात्यः त्वामनुनेतुमतिमात्रं यत्नं करिष्यति। त्वन्तु तेषु अदत्तकर्णश्चिरं रुदित्वा राजमन्दिरद्वारे चिताधिरोहणाय उपक्रमिष्यसे, तदैव स त्वत्पादयोर्निपत्य यथाभिलषितैरर्थैः त्वां परितोष्य दुहितरं मह्यं दत्वा मद्योग्यतासमाराधितः समस्तमेव राज्यभारं मयि समर्पयिष्यति सोऽयमुपायोऽनुष्ठीयतामिति।

सोऽपि विटाग्रणीः असकृदभ्यस्तकपटप्रपञ्चः पाञ्चालशर्मा यथोक्तमभ्यधिकञ्च अन्वतिष्ठत्। आसीच्च मम इष्टसिद्धिः। अन्वभवञ्च मधुकर इव नवमालिकामार्द्रसुमनसम्। ततश्च अस्य राज्ञः सिंहवर्मणः साहाय्यदानं सुहृत्सङ्केतभूमिगमनञ्चापेक्ष्य सर्वबलसमूहेन चम्पामभिगतो दैवात् देवदर्शनसुखमनुभवामि इति।

श्रुत्वैतत् देवो राजवाहनः सस्मितं विलासप्रायमूर्जितं मृदुप्रायं चेष्टितम् इष्ट एष मार्गः प्रज्ञावतामिति प्रमतिमभिनन्दन् मित्रगुप्तं प्रति वक्तुमादिदेश।

इति पञ्चमोच्छ्वासः।

अथ षष्ठोच्छ्वासः।

अथ मित्रगुप्तचरितम्।

सोऽब्रवीत् देव! सोऽहं भवदन्वेषणपरः कदाचित् दामलिप्ताख्यस्य नगरस्य वहिरुद्याने महति उत्सवे वर्त्तमाने कमपि विजने वीणया आत्मानं विनोदयन्तं कोशदासनामानं युवानमपश्यम्। अपृच्छञ्च भद्र! को नामायमुत्सवः किमर्थं वा समारब्धः, कथं वा भवान् उत्सवमनादृत्य एकान्ते विषण्ण इव तिष्ठति इति। सोऽभ्यधात् सौम्य! सुह्मपतिस्तुङ्गधन्वा नाम अनपत्यः अमुष्मिन् आयतने स्थितां विन्ध्यवासिनीम् आराधयन् अपत्यद्वयं प्रार्थयामास, अनया किल स्वप्ने समादिष्टं उत्पत्स्यते तव एकः पुत्रः, कन्या च एका, स तु तस्याः पाणिग्राहकमनुजीविष्यति, सा तु सप्तमाद् वर्षादारभ्य आपरिणयं प्रतिमासं कृत्तिकासु कन्दुकनृत्येन गुणवद्भर्त्तृलाभाय मामाराधयतु, यच्चाभिलषेत् सा अमुष्मै देया, स च उत्सवः कन्दुकोत्सवनाम अस्तु इति। ततोऽल्पेनैव कालेन राजमहिषी मेदिनी नाम एकं पुत्रमसूत कन्याञ्चैकाम्। सा अद्य कन्दुकवती नाम अद्य कन्दुकनृत्येन देवीम् आराधयिष्यति तन्निमित्तोऽयमुत्सवः, तस्यास्तु सखी चन्द्रसेना नाम मम प्रिया आसीत् सा साम्प्रतं राजपुत्रेण भीमधन्वना बलवदाक्रान्ता। तदहमुत्कण्ठितो मन्मथशरविद्धचेताः कलेन वीणारवेण आत्मानं किञ्चिदाश्वासयन् विविक्तमध्यासे इति। अस्मिन्नेव क्षणे काचिदङ्गना तमुद्देशमागमत्। दृष्ट्वैव स ताम् उत्फुल्लदृष्टिरभ्यधात् सा इयं मे प्राणसमा, यद्विरहो दहन इव दहति

माम्। एनामपहरति राजसूनुः, न च शक्नोमि तस्य किमपि प्रतिविधातुम्। अतोऽद्य अनया आत्मानं सुदृष्टं कारयित्वा परित्यक्ष्यामि निरुपायान् प्राणान् इति। सा तु रुदती कथमपि प्रियमाश्वास्य अब्रवीत् नाथ! नय मामभीप्सितं देशम्। सोऽवदत् मां भद्र! भवद्दृष्टेषु राष्ट्रेषु कतमत् सुरम्यं सुसमृद्धञ्च। तमहमीषद् विहस्याब्रवं भद्र! विस्तीर्णेयमर्णवनेमिः, न पर्य्यन्तोऽस्ति, स्थाने स्थाने रम्याणां जनपदानाम् न चेदिह युवयोः सुखनिवासोपायं कर्त्तुं शक्नुयां ततोऽहमेव भवेयमध्वदर्शी। तावतैव किमपि नूपुरक्वणितमाविरभूत्। ततश्च असौ जातसम्भ्रमा प्राप्तैव भर्त्तृदारिका, अनिमिषदर्शना च इयमस्मिन् कन्दुकोत्सवे, सफलमस्तु युष्मच्चक्षुः आगच्छतं द्रष्टुम् अहमस्याः पार्श्ववर्त्तिनी भवेयमित्ययासीत्। तामन्वयाव च आवाम्। अहन्तु तां कन्दुकेन क्रीड़न्तीं साक्षात् लक्ष्मीमिव मनोभुवः समवलोक्य नितान्तविह्वलतामयासिषम्। सापि मामवलोक्य किमपि अवस्थान्तरमापद्यमाना कथञ्चित् कन्दुकेन यथायथं विहृत्य चन्द्रसेनादिभिः सखीभिः सह, भगवतीं विन्ध्यवासिनीं प्रणिपत्य मनसा मे सानुरागेणेव परिजनेन अनुगम्यमाना कुवलयशरमिव कुसुमशरस्य मयि अपाङ्गं विक्षिपन्ती सापदेशमसकृदावर्त्तमानवदनचन्द्रमण्डलतया स्वहृदयमिव मत्समीपे प्रेषितं प्रतिनिवृत्तं न वा इत्यालोकयन्ती कुमारीपुरमगात्।

अहञ्च कामवशः कोशदासेन स्वं गेहं नीत्वा स्नानभोजनादिकं कारितोऽस्मि, सायञ्च चन्द्रसेना समुपेत्य रहसि मां प्रणम्य कोशदासेन सानन्दं परिष्वक्ता समुपविश्य अभाषत नाथ! मा व्यथिष्ठाः, सिद्धं नः समीहितम् अद्य खलु कन्दुकोत्सवे

युवानमेनमवहसितमनोभवाकारमभिलषन्ती रोषादिव हर-हिषा अतिमात्रमायास्यते राजपुत्री। सोऽयमर्थो मया राज-महिष्यै, तया च राज्ञे निवेदयिष्यते। विदितार्थस्तु नृपः स्वां दुहितरमस्मै प्रदास्यति, ततश्च राजपुत्रेण अस्य महा-भागस्य अनुजीविना भाव्यम् एष दैवतादिष्टो विधिः। एतदा-यत्ते च राज्ये नालमेव भीमधन्वा मामेवं रोद्धुम्। तत् सहतां त्रिचतुराणि दिनानि इत्यभिधाय प्रियमालिङ्ग्य प्रायासीत्। तदाकर्ण्य मम कोशदासस्य च बहुविकल्पयतोः कथञ्चिदक्षीयत क्षपा।

अन्येद्युर्भीमधन्वा कथञ्चिद् विदितमद्वृत्तान्तः केनचित् अपदेशेन मां स्वावासं नीत्वा राजवदुपचरितं पर्य्यङ्कोपरि-सुखसुप्तं पूर्वसङ्केतितैः पुरुषैर्बन्धयित्वा आयसनिगडेन सागरा-म्भसि न्यक्षेपयत्। अहन्तु निरवलम्बनः भुजाभ्यामितस्ततः प्लवमानः किमपि दैवदत्तं काष्ठमेकमुपश्लिष्य तावदप्लोषि यावदपासरद् वासरः शर्वरी च। प्रातश्चैकमदृश्यत वहि-त्रम्। तत्र स्थिता यवना मामुद्धृत्य रामेषुनाम्ने नाविक-नायकाय समर्पयन्। क्षणे चास्मिन् नैकनौपरिवृतं कमपि नौदस्युमभिधावन्तं दृष्ट्वा भयमापुर्यवनाः। प्रतिनावश्चातिवे-गेन श्वान इव वराहमस्मत्पोतं पर्य्यरुन्धन्। प्रावर्त्तत सम्प्र-हारः, पराजिता यवनाः। तानहमगतीन् समाश्वास्यावा-दिषम् अपनयत मे निगडबन्धनम् अवसादयामि वः सप-त्नान् इति। श्लथितबन्धनश्च तैरहं तान् सर्वान् प्रतिभटान् भल्लवर्षिणा धनुषा लवलवीकृताङ्गानकार्षम्। अभिपत्य च हतविध्वस्तं तत्पोतम् अमुत्र स्थितं नाविकनायकं जीवग्रा-हमग्रहीषम्। असौ च स एव भीमधन्वा। तस्याहं जात-व्रीडमभाषे तात! दृष्टानि कृतान्तविलसितानि? ते तु

सांयात्रिका मदीयेनैव निगड़ेन तमतिगाढ़ं बद्धा हर्षरव-मकुर्वन् मां च अपूजयन्। दुर्वारा तु सा नौरननुकूलवाततुन्ना कमपि द्वीपमाश्लिष्टवती तत्रासीन्महाशैलः, अहन्तु तस्य रम्यतामवलोकयितुमवतीर्णः इतस्ततो विचरन् परमकमनी-यमेकं सरः समध्यगाम्। स्नातश्च तत्र कांश्चिदमृतस्वादून् बिसभङ्गानास्वादयन् तीरवर्त्तिना केनापि भीमरूपेण ब्रह्म-राक्षसेन अभिपत्य कोऽसि कुतस्त्यो वा इति निर्भर्त्सयताऽभि-हितोऽहं निर्भयः समभ्यधां सौम्य! अहमस्मि द्विजन्मा शत्रु-हस्तादर्णवम् अर्णवाद् यवननावं यवननावश्चित्रमिमं पर्वतं प्राप्तो यदृच्छया अस्मिन् सरसि विश्रमामीति। सोऽब्रूत न चेद् ब्रवीषि, प्रश्नानश्नामि त्वामिति। मया उक्तं पृच्छ तावत्। अथावयोरेकया आर्य्यया आसीत् संलापः।

किं क्रूरं? स्त्रीहृदयं, किं गृहिणः? प्रियहिताय दारगुणाः।
कः कामः? सङ्कल्पः, किं दुष्करसाधनं? प्रज्ञा॥

तत्र धूमिनी गोमिनी निम्बवती नितम्बवत्यः प्रमाणमि-त्युक्ते मया सोऽब्रूत कथय कीदृश्यस्ता इति ततो मया उक्तम्। त्रिगर्त्ताख्ये जनपदे महति दुर्भिक्षे वर्त्तमाने त्रयो भ्रातरः धनकधान्यकधन्यकाख्याः क्रमेण सर्वाणि धनानि अपत्यानि ज्येष्ठमध्यमभार्य्ये अपि भक्षयित्वा कनिष्ठभार्य्या धूमिनी श्वो भक्षणीया इति समकल्पयन्। कनिष्ठस्तु प्रियां स्वामत्तु-मक्षमस्तयामेव यामिन्यां पलाय्य मार्गक्लान्तां कान्तां स्वमांसासृगपनीतक्षुत्पिपासामुद्वहन् वनं प्रविष्टः कमपि विकलेन्द्रियमवनौ लुठन्तमद्राक्षीत्। जातदयश्च तमपि स्कन्धेनोद्वहन् कन्दमूलमृगबहुले वनोद्देशे यत्नरचितपर्ण-शालो वसन् तमपि विकलमिङ्गुदीतैलादिभिः विरोपित-व्रणमामिषादिना स्वनिर्विशेषमपुषत्। एकदा मृगयार्थं

गते पत्यौ सा धूमिनी अनिच्छतापि तेन विकलेन बलात् कारमरीरमत्। न्यचिपच्च पतिमागतं जलार्थिनं कूपे। अथ तं विकलं स्कन्धे गृहीत्वा देशान्तरं गता पतिव्रता अस्मि इति तत्तद्देशीयजनेभ्य: प्रशंसा: पूजाश्च लेभे। अथ कथञ्चित् कूपात् कैश्चित् कृपालुभिरुद्धृतम् अन्तिके चरन्तं पतिं धन्यकमालोक्य सा पापा येन मे पतिर्विकलीकृत: स दुरात्मा अयमिति तस्य साधोश्चित्रवधम् अज्ञेन राज्ञा समादेशयाञ्चकार। स तु वराक: सशेषत्वादायुष: यदि असौ विकल: ममापराधं वदेत् तदा मे युक्तो दण्ड इत्यदीनमाचष्ट। तथा कृते स विकल: पर्य्यश्रु: पादपतितस्तस्य साधोस्तत्सुकृतमसत्यायाश्च तस्यास्तथाभूतं दुश्चरितमाचचक्षे। तत: कुपितो राजा तां पापां विरूपितमुखीं कृत्वा धन्यकं प्रसादयामास। तद् ब्रवीमि क्रूरं स्त्रीहृदयमिति।

अस्ति द्रविड़देशेषु काञ्ची नाम नगरी। तस्यां शक्तिकुमारो नाम कश्चिन्महाधनो वणिक्सुतो गुणवतीं भार्य्यां परिणेतुमितस्ततो ज्योतिषिकच्छद्मना परिभ्रमन् कामपि कन्यकां परीक्ष्य सुलक्षणा इति निश्चित्य तण्डुलप्रस्थमेकं तस्यै दत्त्वाब्रवीत् भद्रे! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुमिति। सा तु सलज्जस्मितं वृद्धदासीहस्तेन तं शालिप्रस्थमादाय तं वणिक्पुत्रम् उपावेश्य विविधकौशलेन सुचारु अन्नं पक्त्वा यथोचितं स्नानाहारादिप्रदानेन पर्य्यतोषयत्। परितुष्टश्च स तां विधिवदुपयम्य गृहमनैषीत्। नीत्वा एतदनपेक्ष: कामपि गणिकामवरोधमकरोत्। तामपि असौ प्रियसखीमिव उपाचरत्। पतिञ्च देवतमिव अनलसा पर्य्यचरत् अन्वतिष्ठच्च गृहकार्य्याणि यथायथम्। अकरोच्च परिजनं दाक्षिण्येन स्ववशम्। ततश्च

तद्गुणवशीकृतो भर्त्ता सर्वमेव कुटुम्बं तदायत्तमेव कृत्वा तदेकाधीनजीवितः त्रिवर्गं निर्विवेश। तद् ब्रवीमि किं गृहिणः प्रियहिताय दारगुणा इति।

अस्ति सौराष्ट्रेषु वलभी नाम नगरी। तस्यां गृहगुप्तनाम्नः महाविभवशालिनः कस्यचिन्नाविकपतेः कन्यां रत्नवतीं नाम मधुमतीनिवासो बलभद्रो नाम कश्चित् सार्थवाहसुतः परिणिनाय। सा तु बालभावसुलभलज्जा पत्युरभिलषितसाधनपराङ्मुखी भर्त्तृद्वेष्यतामयासीत्। तदारभ्य भर्त्ता तां कथमपि द्रष्टुं न इयेष। ततश्च सर्वे तां दुर्भगां नेयं रत्नवती निम्बवतीति समाख्याय आजुहुवुः।

गते च कस्मिंश्चित् काले सा तु नितरां तप्यमाना गत्यन्तरमपश्यन्ती कामपि प्रव्राजिकां शरणमापन्ना रुदती सकरुणं प्राह मातः! किञ्चिदस्मि वक्तुकामा, मत्तो दुर्भगा कापि नास्ति भूतले। दौर्भाग्यं हि जीवन्मरणमङ्गनानां विशेषतः कुलवधूनां मातृप्रमुखो बन्धुवर्गोऽपि मां सावज्ञं पश्यति, तद् यथाहं पत्युरनुग्राह्या भवेयं तथा उपायः क्रियतां भवत्या, नोचेत् त्यजामि निष्प्रयोजनान् प्राणानिति सा तु सकरुणा तामुवाच वत्से! मा साहसम् अवलम्बस्व यदि कश्चिदुपायस्ते मनसि वर्त्तते तद् ब्रूहि, अहं तदनुसारेण यते, बुद्धिमती असीति। अथासौ किञ्चिद् ध्यात्वा अब्रवीत् भगवति! अस्त्यस्मत्प्रतिवेशिनः कस्यचित् धनिनो कनकवती नाम कन्या मत्समानरूपावयवा मम प्रियसखी, तया सह तदीयहर्म्यतले ततोऽपि द्विगुणमण्डिता विहरिष्यामि, त्वया तु तस्मात्प्रार्थनं सकरुणमभिधाय पतिरेतद्दृष्टुं कथञ्चन आनेयः, आनीतश्च तं प्रति अहं तथा अभिलाषं दर्शयिष्यामि यथा असौ कनकवतीमिव

मां मन्यमानो मदासक्तिञ्च जानन् गृहं प्रतियास्यति, ततस्त्वया यथासौ मां कनकवतीमेव विदित्वा देशान्तरं नेष्यति तथा अभ्युपायः करणीय इति।

सा तु धूर्त्ता तथैव सर्वं सम्पादितवती। अथासौ बलभद्रः तां सरत्नाभरणपरिच्छदामादाय निशि पलाय्य प्रावसत्। सा तु प्रव्राजिका वार्त्तामघोषयत् मन्देन मया निर्निमित्तमुपेक्षिता रत्नवती श्वशुरौ च परिभूतौ तदत्रैव पुनः संसर्गं जिह्रेमीति पूर्वेद्युर्मामकथयत् नूनमसौ रत्नवती तेन नीतेति। ततोऽसौ बलभद्रः खेटकपुरं गत्वा तत्र वाणिज्यकौशलेन बहूनि धनान्युपार्ज्य प्राधान्यमगात्। क्रमेण कयाचिद्दास्या कारणेन केनापि रोषितया निर्भिन्नं रहस्यम् अयं बलभद्रः निधिपतिदत्तस्य कन्यां कनकवतीमपहृत्य अत्रैव वसतीति ततो राज्ञा तस्य सर्वस्वहरणे दण्डे आज्ञप्ते भीतं बलभद्रम् एकान्ते प्राह रत्नवती। नाथ! न भेतव्यं ब्रूहि नेयं कनकवती परं मया न्यायोढ़ा रत्नवती, गृहगुप्तदुहिता न चेत् प्रतीथ प्रणिधिं प्रहिणुत अस्या बन्धुपार्श्वमिति। अथ तद्‌बन्धुवर्गः समागतस्तां दुहितरं जामात्रा सह हृष्टः स्वपुरं प्रत्यनैषीत्। ततो रत्नवतीं कनकवतीं भावयतस्तस्य सा अतिप्रिया आसीत् तद् ब्रवीमि कामो नाम सङ्कल्प इति।

तदनन्तरमसौ नितम्बवतीवृत्तान्तमपृच्छत्। अहमब्रवम्। अस्ति मथुरा नाम पुरी, तस्यां कोऽपि कलहकण्टको नाम वणिक्पुत्रः कलासु गणिकासु चातिसक्तः प्रतिवसति स्म। एकदा असौ एकं चित्रपटं कस्यापि हस्ते ददर्श। तत्र काचिदालिखिता युवतिरस्य कामार्त्तं मनश्चकार। तर्कयामास च विडम्बमिवैतद् दृश्यते यतः कुलजादुर्लभं वपुराभिजात्यशंसिनी

च नम्रता, पाण्डुरा मुखच्छविः न चैषा प्रोषितभर्त्तृका, प्रवासचिह्नस्य वेशादेरदर्शनात्। तदियं वृद्धस्य कस्यचित् नातिपुंस्त्वस्य यथार्हसम्भोगालाभपीड़िता गृहिणी भवितुमर्हतीति। चित्रपटधारी प्राह सत्यमुपलक्षितम् एषा अवन्तिपुर्य्यामनन्तकीर्त्तिनाम्नः सार्थवाहस्य वनिता यथार्थनाम्नी नितम्बवती नाम सौन्दर्य्यविस्मितेन मया आलिखिता इति।

स तु कलहकण्टको नाम तदाकर्ण्य एव जगामोज्जयिनीम्। तत्र दैवज्ञो नाम भूत्वा भिक्षामिषेण तद्गृहं गत्वा तामवलोक्य नितरां मन्मथवशंवदः पौरमुख्येभ्यः तत्रत्यश्मशानरक्षामयाचत अलभत च। क्रमेण च कामपि श्रमणिकां वशीकृत्य दूतिकां कृत्वा नितम्बवतीसकाशं शिक्षयित्वा प्राहिणोत्। सा तु धूर्त्ता पुत्रवती भव इति तामाशिषा संवर्द्ध्य विविधालापमकरोत्। ततश्चान्येद्युः पुनरागत्य प्राब्रवीत् वत्से! भर्त्ता तव पाण्डुरोगग्रस्तः श्रूयते भोगे चासमर्थः, मम चाशीर्वादोऽवितथः, न च शक्यं तस्य विघ्नमप्रतिकृत्य अपत्यमस्माल्लब्धुम्। तत् प्रसीद निशि मदुपनीतस्य कस्यचिन्मन्त्रवादिनः करे चरणमर्पयित्वा तदभिमन्त्रितेन चरणेन प्रणयकुपिता नाम भूत्वा भर्त्तारमुरसि प्रहर्त्तुमर्हसि, ततोऽसौ भर्त्ता नीरोगोऽपत्योत्पादनक्षमो भविता मात्र शङ्का कार्य्या इति। सा तु सरला तद्वचसि विश्वस्ता निशायां तया उपनीतस्य तस्य कलहकण्टकस्य हस्ते यावत् स्वचरणं न्यस्यति, तावदेव स धूर्त्तस्तदूरुमूले छुरिकया किमपि आलिख्य नूपुरमेकं चरणादाक्षिप्य द्रुतमपासरत्।

सा तु सत्रासा स्वमेव दुर्नयं गर्हमाणा तद्व्रणं पटबन्धनेनाच्छाद्य आमयापदेशेन त्रिचतुराणि दिनानि शयनपरा

अतिष्ठत्। स तु धूर्त्तः विक्रेष्य इति तेन नूपुरेण तमनन्तकीर्त्तिमाससाद। स दृष्ट्वैव मद्गृहिण्या एष नूपुरः कथं त्वया उपलब्ध इति तमपृच्छत्। स तु निर्बन्धपृच्छयापि यदा न किञ्चित् ब्रवीति तदासौ वणिक् स्वनूपुरयुगलं प्रेषय इति गृहिणीं सन्दिदेश। सा तु सलज्जं सत्रासञ्च अद्य रात्रौ क्वापि स्खलितः अन्विष्टोऽपि नाधिगत एकः, अयं पुनरपर इति द्वितीयं प्राहिणोत्। अथ समवेतेषु वणिक्वर्गेषु स धूर्त्तः पुनः पुनरनुयुक्तः सविनयमवादीत् विदितमेव भवतां यथाहं श्मशानरक्षणे नियुक्तः तदुपजीवो तिष्ठामि, धूर्त्ताश्च कदाचिन्मद्दर्शनभीरवः निशि दहेयुरपि शवानिति निशास्वपि श्मशानमधिशये। पूर्वद्युर्निशि कामपि दग्धादग्धं शवमाकर्षन्तीं चितायाः नारीमालोकयम्। अर्थलोभात् साहसमवलम्ब्य सा मया गृहीत्वा शस्त्रिकया चोरुमूले किञ्चिदालिख्य नूपुरमेकं पदादाक्षिप्य च मुक्ता पलायिष्ट। एष तावदस्यागमः परं भवन्तः प्रमाणमिति।

ततो विमर्शेण तस्याः शाकिनीत्वं पौरैर्निश्चितम्। भर्त्रा च सा परित्यक्ता तस्मिन्नेव श्मशाने बहु विलप्य मर्त्तुकामा तेन धूर्त्तेन नक्तं पादयोर्निपत्य अनुनीता अगत्या तत्प्राणवल्लभा आसीत्। तदुक्तं दुष्करसाधनं प्रज्ञा इति।

एतदाकर्ण्य ब्रह्मराक्षसो मामपूजयत्। तस्मिन्नेव क्षणे सहसा अम्बरतलात् मुक्ताफलस्थूलाः सलिलविन्दवोऽपतन्। अहं तु किमिदमिति उच्चक्षुरालोकयं कमपि राक्षसं काम-प्यङ्गनामाकर्षन्तम्। कथमयमकामामनाचारो हरति इति गगनगमनमन्दशक्तौ अशस्त्रे च मयि तप्यमाने स तु ब्रह्मराक्षसः तिष्ठ पाप! क्वापहरसीति, भर्त्सयन् उत्पत्य तेन राक्षसेन संप्रायुध्यत। तान्तु रोषादनपेक्षापविद्धामन्त-

रीक्षादापतन्तीमहमुन्मुखः प्रसारितोभयकरः अग्रहीषम्। गृहीत्वा च वेपमानां सम्मिलिताक्षीं मदङ्गस्पर्शेन उद्भिन्नरोमाञ्चां तामनवतारयन्नेव निर्वर्ण्य मत्प्राणवल्लभां राजकन्यां कन्दुकवतीमेवालक्षयम्। तावत्तावपि राक्षसब्रह्मराक्षसौ परस्परं सम्प्रहारेणाक्षपयेताम्। अहन्तु तां पुलिने समवरोप्य समाश्वास्य अपृच्छं किमिदमिति सा तु तिर्य्यक्प्रेमभिवीक्ष्य सकरुणमरोदीत् अब्रवीच्च नाथ! त्वद्दर्शनादुपोढ़रागा अहं चन्द्रसेनया त्वत्कथाभिरेव समाश्वासिता अस्मि। अत्रान्तरे पापेन मद्भ्रात्रा त्वां समुद्रे मज्जितं श्रुत्वा सखीजनं परिजनञ्च वञ्चयित्वा जीवितं त्यक्तुकामा एकाकिनी क्रीड़ावनमुपागमं तत्र मामसौ पापः निगृह्य मां स्फुरन्तीं गृहीत्वा गगनमुदपतत् अभवच्च साम्प्रतमवसितः। अहञ्च दैवात् तवैव जीवितेशस्य हस्ते पतिता इति।

एतदाकर्ण्य तया सह नावमध्यारोहम्। मुक्ता च नौः प्रतिवातं नीयमाना तामेव दामलिप्तां प्रत्युपातिष्ठत। अवतीर्णाश्च वयमश्रमेण। तनयस्य तनयायाश्च नाशात् तुङ्गधन्वा सकलत्र एव गङ्गारोधसि अनशनेन उपरन्तुं प्रतिष्ठते सह तेन मर्त्तुमिच्छति अनुरक्तः पौरजन इत्यश्रुमुखीनां प्रजानामाक्रन्दं शृण्वन् अहं सत्वरं समेत्य अस्मै राज्ञे यथावृत्तमाख्याय तत् अपत्यद्वयं समर्पयम्। प्रीतेन तेन जामाता कृतोऽस्मि, तत्पुत्रश्च मदनुजीवी जातः, चन्द्रसेना च निर्वाधं कोशदासमभजत्। ततश्च सिंहवर्मसाहाय्यार्थमागत्य भर्त्तुस्ते दर्शनसुखमनुभवामि इति।

श्रुत्वा राजवाहनः चित्रेयं दैवगतिः पुष्कलः पुरुषकार इति तमभिनन्द्य मन्त्रगुप्ते हर्षोत्फुल्लं चक्षुः पातयामास।

इति षष्ठोच्छ्वासः।

अथ सप्तमोच्छ्वासः।

—oo—

मन्त्रगुप्तचरितम्।

सोऽब्रवीत् देव! नगरन्ध्रगतस्य ते गतिं ज्ञास्यन् कदाचिदहं गतः कलिङ्गनगरम्। तत्र श्मशानसन्निकृष्टस्य कस्यचित् तरोः किसलयसंभृते तले स्थित्वा निद्रामभजे। निशीथे शीतवातस्पर्शात् गतनिद्रः कथं खलेन अनेन दग्धसिद्धेन रिरंसाकाले निदेशं दिशता जन एष रागाविष्ट इत्थं विरक्तीकृतः, अपि क्रियेत केनचित् शक्तिमता अस्य सिद्धेरन्तराय इति किङ्करस्य कातरं विलपितमाकर्ण्य क एष सिद्धः का च सिद्धिः किञ्च किङ्करेण करिष्यते इति दिदृक्षुः तद्गतया दिशा किञ्चित् सविधवर्त्ती नरास्थिशकलरचितालङ्कारं भस्मकृताङ्गरागं जटिलं हिरण्यरेतसि तिलसिद्धार्थादीन् विकिरन्तं कञ्चिददर्शम्। तस्याग्रे कोऽपि किङ्करः तिष्ठति, सोऽनेन निकृष्टाशयेन आदिष्टः गच्छ कलिङ्गराजस्य कर्दनस्य कन्यां कनकलेखां नाम कन्यागृहात् इह आनय इति। तेन च तत्क्षणादानीतां त्रासकम्पितकलेवरां हा तात! हा मातः! इति क्रन्दन्तीं केशेषु गृहीत्वा असिना कर्त्तितुमचेष्टत। अहन्तु झटिति तस्य हस्तात् तमसिमाच्छिद्य तेन तस्य शिरश्छित्वा कस्यचित् सालतरोः स्कन्धे न्यधिषि। तदवलोक्य स किङ्करः प्रहृष्टः प्रोवाच आर्य्य! अनार्य्यस्य अस्य पारतन्त्र्यात् अद्य मोचितोऽस्मि कल्याणिना, साधु कृतम्। दयानिधेर्भवतः काञ्चिदाज्ञां चिकीर्षति अयं जनः, आदिशतु भवानिति प्रार्थयीत्। आदिशञ्च तं सखे! इयमकेशार्हा राजनन्दिनी

अनेन दुराचारेण अत्यर्थं क्लेशिता, तत्रय एनां स्वनिलयं नाम्य-दित: किञ्चिन्मे प्रियमस्ति इति ।

तदाकर्ण्य सा चञ्चलतारकां दृशं तिर्य्यक् सञ्चारयन्ती रागलज्जान्तरवर्त्तिनी किमपि मन्दमधुरम् अभाषत आर्य्य ! किमर्थमिमं जनं कालहस्तादाच्छिद्य रणरणिकावाहिनि अनङ्गरागसागरे निक्षिपसि, यद्यस्ति दया अस्मिन् जने, तदा त्वया अनन्यसाधारणः क्रियतामयं जनश्चरणसेवायाम् । यदि च कन्यापुरे रहस्यभेदादनर्थं आशङ्क्येत, तदपि नास्ति रक्षातरा हि नः सख्यः यथा न कश्चिदेतत् ज्ञास्यति तथा यतिष्यन्ते इति । अहञ्च तद्दर्शनेन नितरां रागपूर्णस्तं किङ्कर-मगादिषम् इयं चार्वङ्गी यथा कथयति तथा चेत् न आचरेयं नयेत मदनः क्षणेन मामन्यां दशां तत् सह्यानया हरिणाक्ष्या जनमिमं कन्यकागारं नय । नीतश्चाहं तेन किङ्करेण राक्ष-सेन कन्यकापुरम् । तत्र एकदेशे प्रियानिदेशात् क्षणमति-ष्ठम् । सा च सर्वाः सखी निद्रिताः हस्तपरामर्शेन प्रबोध्य सर्वं वृत्तान्तं ताभ्यः कथयित्वा ताभिः प्रणताभिरतिगौरवात् पूज्यमानं मां निजनिकेतनमनैषीत् । ततश्च अहं सखीजनेन अतिदक्षिणेन दृढ़तरीकृतस्नेहनिगड़ः तया सङ्गत्य सुखेन कालमगमयम् ।

कदाचित् मधुमासे कलिङ्गनाथः सह्याङ्गनाजनेन तनयया सकलेन च पौरजनेन त्रयोदश दिनानि सागरतीरकानने क्रीड़ारसेन कालं नयन् अन्ध्रनाथेन जयसिंहेन रन्ध्रान्वेषिणा अनेकबलसमेतेन द्राक् आगत्य अगृह्यत सकलत्रः । सा च प्रिया मे सह सखीजनेन आनीयत तं देशम् । अहन्तु तां प्रियां चिन्तयन् किंकर्त्तव्यविमूढ़ोऽतर्कयम् गता सा कलिङ्गराज-कन्या पितृभ्यां सहारिहस्तं निरस्तधैर्य्यः स राजा नियतं तां

सन्निद्ध्येत् तदसह्या च सा सती विषोद्बन्धनादिना सद्यः सन्तिष्ठेत, तस्याञ्च मृतायाम् अयं जनो हन्येत कामेन, कात्र गतिः इति।

अत्रान्तरे अन्ध्रदेशात् कश्चित् अग्रजन्मा समायातः। तन्मु-खात् श्रुतं जयसिंहेन जिघांसितः स कर्दनः कनकलेखादर्शन-जेन रागेणैव अरच्यत। सा च राजदारिका यक्षेण केनचित् आविष्टा न तिष्ठति कस्यापि अग्रे नरस्य। जयसिंहश्च तत् निराकरणार्थं नानाचिकित्सकादिसंग्रहेण आयस्यति। न चास्ति सिद्धिः इति।

अहन्तु तदाकर्ण्य सञ्जातप्रत्याशः जटाचीरकन्याधरः सन्न्यासी भूत्वा कांश्चित् शिष्यानग्रहीषम् अकार्षञ्च तान् नानाश्चर्य्यक्रियाविप्रलब्धाञ्जनादाहृतान्नवस्त्रादिदानेन अत्यन्ता-नुरक्तान्। अयासिषञ्च अन्ध्रनगरम्। तत्र कस्यचित् महा-सरसस्तीरकानने कृताश्रमः शिष्यवर्गैरित्थमकीर्त्त्यं दिशि दिशि य एषः यतिः सरस्तीरे स्थण्डिलशायी तिष्ठति तस्य सर्वाणि सरहस्यानि सषड़ङ्गानि छन्दांसि रसनाग्रवर्त्तीनि अन्यानि च शास्त्राणि, यस्य यत् ज्ञातुमिच्छा स्यात् स तत्-सकाशात् तस्य निर्णयं करोतु, अस्य न अलीकं किञ्चिदपि, मूर्त्तिमान् दयाराशिरयम् अस्य चरणरजसा शिरसि स्पृष्टस्य चिकित्सकैरप्रतिकार्य्यस्य व्याधेरुपशमः स्यात् न तस्य शक्तेः शक्यमियत्ताज्ञानम् इति।

इयञ्च वार्त्ता कर्णपरम्परया तस्य राज्ञो जयसिंहस्य श्रुति-पथमगात्। स च अहरहरागत्य आदरातिशयेन शिष्यान् सन्तोष्य तन्मुखेन काङ्क्षितार्थसाधनाय मामयाचत। अहन्तु ध्यानधीरः सहेलं निरीक्ष्य एनमकथयं तात! स्थाने एष हि यत्नः तस्य कन्यारत्नस्य सर्वलक्षणसमेतस्य अधिगतिः ससागरायाः

पृथिव्याः आसादनाय साधनं न च स यक्षस्तदधिष्ठायी केन-चित् नरेन्द्रेण प्रतिकर्त्तुं शक्यः। तदत्र सहस्व त्रीणि अहानि यैरहं यतिष्येऽस्य अर्थस्य साधनाय इति तथा आदिष्टे च हृष्टे नृपे गते निशि निशि तमिस्रायां निशीथे तदेकतः सरस्तटं तीर्थसन्निकृष्टं खनित्रेण छिद्रीकृतान्तरालमकार्षम्। कृत्वा च घनशिलाच्छन्नच्छिद्राननं तत्तीरदेशं जनैरशङ्कनीयं प्रातः स्वनिकेतनं न्यशिश्रयम्।

गते च दिनत्रये स राजा समागत्य कृतानतिः कृता-ञ्जलिश्च मत्पुरोवर्त्ती मया आदिष्टः अनुद्योगिनं कदाचित् श्रियः न संश्रयन्ते, साधीयसा ते सच्चरितेन आकृष्टचेतसा मया सरस्तथा संस्कृतं यथा तेऽद्य सिद्धिः स्यात्। तदद्य निशीथे गाहयित्वा एतत् सरः सलिलतले सञ्चारिणः वायून् सन्नि-गृह्य शयानेन जलसङ्घातस्य आरटितं क्षणात् जनिष्यमानं श्रोतव्यम्। ततः शान्ते तद्रटिते क्लिन्नगात्रः किञ्चिदारक्त-नयनः येनाकारेण निर्य्यास्यसि, तमवलोक्य सर्वजनानन्द-जननं स यक्षः स शश्यति अग्रतः स्थातुं कन्यकायाश्च तस्या हृदयं सद्य एव त्वयि अतिसक्तं स्यात् करतलगतञ्च भूमण्डलं नात्र संशयः। इच्छसि चेदिमं विधिं नानाशास्त्रवेदिभि-रधिकृतैरन्यैश्च हितैराकलय्य जालिकशतमानाय्य यथेष्ट-दृष्टान्तरालं सरः क्रियेत, सैनिकैश्च यथास्थानस्थितैः रक्षा विधेया। कस्तत् जानाति यत् छिद्रेणारयश्चिकीर्षन्तीति। तत् तस्य हृदयहारि जातं तदधिकृतैश्च तदनुमोदनम्। स पुनर्मया उक्तः राजन्! अत्र तवाधिकारे चिरं स्थितं न चैकत्र नः चिरस्थानं युक्तं तत् कृतकृत्यः पुनर्मां न द्रक्ष्यसि, तव राष्ट्रे यत् अस्मादि आसादितं तस्य किञ्चित् अनुपकृत्य न गन्तव्यं तथाद्य सिद्धं गच्छेदानीं गृहान्, यथासमयमागत्या-

र्थसिद्धये यतेथा इति। स किल कृतज्ञतां दर्शयन् भाविनि मद्विरहे कातर इव गृहानयासीत्। अहञ्च निर्जने निशीथे सरस्तीरस्तम्भनिलीनः ईषच्छिद्रदत्तकर्णोऽतिष्ठम्। स च राजा कृतयथादिष्टक्रियः स्थानेषु कृतरक्षाविधानः निःशङ्कं सरःसलिलमगाहत। यथादेशं शयानश्च तत्र सलिलतले तं कन्धरायां दृढं निगृह्य करचरणैस्तथा प्राहरं यथा स सद्यः प्राणानजहात्। आकृष्य च तच्छरीरं तीरच्छिद्रे निधाय नीरान्निरगच्छम्। सद्यः सङ्घातानाञ्च सैनिकानां तदत्यचि-त्रीयत आकारान्तरग्रहणम्।

अथ गजस्कन्धगतः राजभवनं प्रविश्य कथमपि निशां नीत्वा प्रातः कृतनित्यक्रियः सिंहासनासीनः पार्श्ववर्त्तिनोऽमा-त्यादीन् प्रावोचं दृश्यतां शक्तिरार्षी, अद्य नास्तिकानां जायेत लज्जानतं शिरः। ते च हर्षविस्मयाक्रान्तचेतसः जय प्रभो! स्वतेजसातिशय्य दशदिश इत्याशास्य यथाधिकारमन्वतिष्ठन्। अहञ्च प्रियायाः सखीं शशाङ्कसेनां रहसि समागतामब्रवं कच्चिदयं दृष्टस्त्वया जन इति। सा मां निरीक्ष्य हर्षकाष्ठां गता बद्धाञ्जलिर्नितरां हृष्टः यदि न स्यादैन्द्रजालिकस्य जालं तत् कथयतु देवः किमेतदिति सनिबन्धमकथयत्। अह-ञ्चास्यै सर्वं यथावदाख्याय तन्मुखेन प्रियां प्रीणयित्वा तया एव दयितया निरर्गलीकृतातिसत्कृतकालङ्कनाथन्यायदत्तया सङ्कृत्य अन्ध्रकलिङ्गराज्यं कलिङ्गनाथे न्यस्य अरिणा लिलङ्घ-यितस्याङ्गराजस्य साहाय्यार्थं बहुभिः साधनैः समागतः सखि-जनसमेतस्य देवस्य यादृच्छिककदर्शनसुखमनुभवामीति।

तदाकर्ण्य देवो राजवाहनः चित्रमिदं महामुनेर्वृत्तमिति स्मितविकसिताननः तमभिनन्द्य विश्रुते दृष्टिं चिक्षेप।

इति सप्तमोच्छ्वासः।

अथ अष्टमोच्छ्वासः ।

अथ विश्रुतचरितम् ।

सोऽब्रवीत् देव ! मयापि पर्य्यटता विन्ध्याटव्यां कोऽपि कुमारोऽष्टवर्षीयः क्वचित् कूपाभ्यासे क्लिश्यन् दृष्टः त्रासगद्गदमगदत् महाभाग ! क्लिष्टस्य मे क्रियतां किञ्चित् साहाय्यं मम प्राणापहारिणीं पिपासां प्रतिकर्त्तुमुदकमुत्तोलयन्निह कूपे कोऽपि स्थविरः ममैकशरणभूतः पतितः, तं नाहमुद्धर्त्तुमलमिति । अहं तदाकर्ण्य व्रतत्या कयापि वृद्धमुत्ताय्य तञ्च बालं कथमपि उद्धृताभिरद्भिः फलैश्च पक्वैर्वृक्षात् पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य तरुतलनिषण्णस्तं वृद्धमभाषि तात ! क एष बालः, कश्च भवान् कथमिमं देशमापद्य आपदि पतित इति सोऽश्रुगद्गदमवादीत् महाभाग ! आसीत् विदर्भाधिपतिः परमधार्मिकः राजनीतिकुशलः पुण्यवर्म्मा नाम । तस्मिंश्च कालेनोपरते तत्सुतोऽनन्तवर्म्मा नाम तत्सिंहासनमध्यतिष्ठत् स तु सर्वगुणसम्पन्नोऽपि दण्डनीत्यां नातिकुशल आसीत् । एकदा रहसि वसुरक्षितो नाम महामन्त्री तं दण्डनीत्यनुशीलने सविशेषमनुरुरोध दर्शयामास च तदनुशीलनस्य फलमननुशीलनस्य च दोषम् ।

स तु तदाकर्ण्य स्थान एव गुरुभिरुपदिश्यते तथा क्रियते इत्यन्तःपुरगतः तद्वार्त्तां प्रमदानां सन्निधौ समाचष्ट । तत्र स्थितस्तस्य नर्म्मसचिवश्चित्तानुवृत्तिकुशलः सङ्गीतव्यापारनिपुणः परमर्मान्वेषणपरः सकलदुर्णयोपाध्यायः कामतन्त्रकर्णधारः कुमारसेवको विहारभद्रो नाम सस्मितमभाषत देव ! दैवानुग्रहेण यदि कश्चिद् भाजनं भवति विभूतेः, तं

विविधकौशलैः प्रतार्य्य स्वार्थं साधयन्ति धूर्त्ताः। सम्यक् नीतिशास्त्रपरिशीलनं केवलं क्लेशाय, नात्र अण्वपि सुखमुपकारो वा, यावता च नयेन विना न लोकयात्रा, स लोकत एव सिद्धः न अत्र शास्त्रेणार्थः, स्तनन्धयोऽपि विना उपदेशं जनन्याः स्तन्यं पिबति, तदपास्य अतियन्त्रणाम् अनुभूयतामिन्द्रियसुखानि। येऽप्युपदिशन्ति इन्द्रियाणि जेतव्यानि, अरिषड्वर्गस्त्याज्यः, सामादिरुपायवर्गः स्वेषु परेषु च अजस्रं प्रयोज्यः, सन्धिविग्रहादिचिन्तयैव नेयः कालः, स्वल्पोऽपि सुखावकाशो न देय इति तैरपि धूर्त्तैर्युक्तस्तचौर्य्यार्जितं धनं दासीगृहेषु भुज्यते, ये च नीतिशास्त्रकाराः शुक्राङ्गिरसपराशरप्रभृतयः, तैः किमरिषड्वर्गो जितः? कृतं वा तैः शास्त्रानुष्ठानम्? । तैरपि प्रारब्धेषु कार्य्येषु दृष्टे सिद्ध्यसिद्धी। देवस्य किमनुपपन्नम्? सर्वलोकाराध्या जातिः, नवं वयः, दर्शनीयं वपुः, अपरिमिता विभूतिः, एतत् सर्वं सर्वभोगवर्जितः मा कृथा वृथा, सन्ति ते दन्तिनां दशसहस्राणि, हयानां लक्षत्रयम् अनन्तञ्च पादातं पूर्णान्येव हेमरत्नैः कोशगृहाणि। सर्व एव जीवलोकः युगसहस्रं भुञ्जानः न क्षयं नेष्यति। जीवितं हि नाम क्षणिकं तत्रापि भोगयोग्यं वयः अत्यल्पम् अपण्डिताः पुनरर्जयन्त एव ध्वंसन्ते नार्जितस्य लवमपि नास्वादयितुमीहन्ते। किं बहुना राज्यभारम् अन्तरङ्गेषु समर्प्य अप्सरःप्रतिरूपाभिरन्तःपुरिकाभिः रममाणो गीतपानगोष्ठीसु यथर्त्तु अनुभवन् यथार्थं कुरु शरीरलाभमिति।

तदाकर्ण्य अन्तःपुरिकागणः प्राहसीत् जननाथश्च सम्प्रहृष्टः समुत्तिष्ठन् तं प्रणत मुत्थाप्य ननु हितोपदेशाद् गुरवो भवन्तः किं गुरुत्वविपरीतमनुष्ठितमिति वदन् क्रीड़ानिर्भरमतिष्ठत्।

अथ हृतमन्त्रिणोपदिष्टं वचसा अनुमोदते स्म परं कार्य्यतः न अनुतिष्ठति स्म, क्रमेण नयश्च तस्मिन् विद्वेषमिव अदर्शयत् अभवच्च कामप्रवृत्तो भोगसुखेषु नितरामासक्तः। एवं गते चन्द्रपालितो नामाश्मकेन्द्रस्य वसन्तभानोर्मन्त्रिपुत्रः पितृ-निर्वासितो नाम भूत्वा बहुभिश्चारणैर्बह्वीभिरनल्पकौशलाभिः शिल्पकारिणीभिरनेकैश्च प्रच्छन्नकिङ्करैर्गूढपुरुषैश्च परिवृतो-ऽभ्येत्य विविधकौशलैः विहारभद्रमात्मसादकरोत्। अलभत च अमुनैव द्वारेण राजन्यास्पदम्। स च लब्धरन्ध्रः राजानं व्यसनेषु व्यसनानां गुणव्याख्यानेन नितरां प्रीणयन् तदेका-सक्तमकार्षीत्। असावपि राजा गुरूपदेशमिव तन्मतमन्व-वर्त्तत। प्रकृतयश्च तच्छीलानुवर्त्तिन्यः विशृङ्खलमसेवन्त व्यसनानि। सर्वश्च समानदोषतया न कस्यापि दोषान्वेषणे अयतिष्ट। समानभर्तृप्रकृतयश्च राष्ट्राध्यक्षाः स्वानि स्वानि राजस्वादीनि स्वयमभक्षयन्। क्रमेण आयद्वाराणि व्यशी-र्य्यन्त व्ययाश्च विभोर्विटविधेयतया प्रतिदिनमवर्द्धन्त। सामन्त-पौरजानपदाश्च समानशीलतया उपारूढविस्रम्भेण राज्ञा सजानयः पानगोष्ठीष्वभ्यन्तरीकृताः स्वं स्वमाचारमत्य-क्रामन्। तदङ्गनासु च राजा ते च राजान्तःपुरिकासु निर्भयं विहरन्ति स्म। सर्वश्च कुलाङ्गनाजनः भग्नचारित्रबन्धन-स्तृणाय अपि न गणयित्वा भर्तॄन् जारेषु अरमन्त। तन्मूलाश्च विवादाः सक्रोधानामुदभवन् अहन्यन्त च दुर्बलाः प्रबलैः। अपहृतानि धनवतां धनानि तस्करादिभिः हृतबान्धवा हृतवित्ता वधबन्धातुराश्च मुक्तकण्ठमाक्रोशन् अश्रुकण्ठ्यः प्रजाः। दण्डश्च अयथाप्रयुक्तो भयक्रोधावजनयत्। काम-कुटुम्बेषु लोभः पदमाधत्त विमानिताश्च तेजस्विनो मानेन अदह्यन्त।

अस्मिंश्च समये अश्मकेन्द्रप्रयुक्ताः तीक्ष्णरसदायिनो गूढ़-पुरुषाः नानाविधकौशलैः प्रक्षपितप्रवीरमनन्तवर्म्मकटकं जर्जरमकुर्वन्। अथ वसन्तभानुर्भानुवर्म्माणं नाम वनचराधिपं प्रोत्साह्य अनन्तवर्मणा व्यग्राहयत्। अनन्तवर्मा च तदाक्रान्तराष्ट्रपर्य्यन्तस्तमभियोक्तुं बलसमुत्थानमकरोत्। अश्मकेन्द्रश्च वसन्तभानुः सर्व्वेभ्यः सामन्तेभ्यः प्राक् आगत्य अस्य प्रियतरोऽभूत्। अपरे च सामन्ताः प्रभुसाहाय्यार्थं समागताः नर्म्मदारोधसि शिविरं संन्यविशन्। अस्मिंश्च अवसरे राजा अनन्तवर्म्मा महासामन्तस्य कुन्तलपतेरवन्तिदेवस्य नर्त्तकीं क्ष्मातलोर्व्वशीं नामाहूय चन्द्रपालितादिभिर्नृत्यमद्राक्षीत्। अतिरक्तश्च भुक्तवानिमां मधुमत्ताम्। ततोऽश्मकपतिः कुन्तलेश्वरमेकान्तेऽवदत् प्रमत्त एष राजा, कलत्राणि नः परामृशति, कियत्यवज्ञा सोढव्या, मम शतमस्ति दन्तिनां पञ्च शतानि ते तदावां सम्भूय मुरलेशं वीरसेनमृचीकेशमेकवीरं कोङ्कणपतिं कुमारगुप्तं नासिक्यनाथं नागपालञ्च उपजपाव ते च अवश्यमस्याविनयमसहमाना अस्मन्मतेनैव उपवर्त्तेरन्। अयञ्च वनेचराधिपः भानुवर्म्मा प्रियं मे मित्रम्। अमुना एनं दुर्विनीतमग्रतः अभियुक्तं पृष्ठतः प्राहरेम। कोशवाहनञ्च विभज्य गृह्णीम इति।

हृष्टेन च अमुना तथा अस्तु इति स्वीकृते तानपि सामन्तानसौ वसन्तभानुः स्वमतावस्थापयत्। परेद्युश्च सर्व्वे मिलित्वा अनन्तवर्म्माणं व्यनाशयन्। वसन्तभानुश्च तत्कोशवाहनं शाठ्येन सर्वान् सामन्तान् भ्रंशयित्वा आत्मसात् कृत्वा भानुवर्म्माणं कियतांशेन सन्तोष्य अनन्तवर्म्मराज्यमग्रहीत्।

अस्मिंश्च अवसरे मन्त्रिवृद्धो वसुरक्षितः केचित्मौलैः

सम्भूय बालमेनं भास्करवर्म्माणम् अस्य एव ज्यायसीं भगिनीं त्रयोदशवर्षीयां मञ्जुवादिनीमनयोश्च मातरं महादेवीं वसुन्धरामादाय अपसर्पन् अस्या आपदो भावितया दारुज्वरेण देहमजहात्। किंकर्त्तव्यमूढ़ैश्च अस्माभिः नीत्वा माहिष्मतीं भर्त्तुर्मातुराय भ्रात्रे मित्रवर्म्मणे सापत्या देवी दर्शिता। ताञ्च आर्य्यामसौ अन्यथा अभ्यमन्यत। निर्भर्त्सितश्च तया सुतमिममखण्डचारित्रा राजानं चिकीर्षति इति नैष्टुर्य्यात् बालमिममजिघांसीत्। इदन्तु ज्ञात्वा देव्या अहमाज्ञप्तः तात नालीजङ्घ! जीवता अनेनार्भकेण यत्र क्वचिदवधाय जीव, जीवेयश्चेदहमपि एनमनुसरिष्यामि, ज्ञापय च मां क्षेमवार्त्तामिति। अहन्तु सङ्कुले राजकुले कथञ्चिदपसार्य्य एनं विन्ध्याटवीं व्यगाहिषि। पादचारक्लान्तमेनं क्वचित् घोषे कानिचिदहानि विश्रमय्य तत्रापि राजपुरुषसम्पात-भीतो दूरमपासरम्। तत्र अस्य दारुणपिपासापीड़ितस्य पयो दातुकामः कूपेऽस्मिन् पतितस्त्वया एवमनुगृहीतः त्वमेव अस्य शरणमेधि विशरणस्य राजसूनोरित्यञ्जलिमबध्नात्। का जातिरस्य मातुरिति पृष्टे मया तेनोक्तं पाटलिपुत्रस्य वणिजो वैश्रवणस्य दुहितरि सागरदत्तायां कोशलेन्द्रात् कुसुमधन्वनोऽस्य माता जातेति। यदि एवमेतन्मातुर्भर्त्तुःपितुश्चैको मातामह इति सस्नेहं तमहं सस्वजे। वृद्धेन सिन्धुदत्तपुत्राणां कतमस्ते पितेति अनुयुक्तो सुश्रुत इत्युक्तवन्तं मामसौ श्रुत्वा भृशमनन्दत्। अहन्तु तं नयावलिप्तम् अश्मकं नयेनैवोन्मूल्य बालमेनं पित्र्ये पदे प्रतिष्ठापयेयमिति प्रतिज्ञाय कथमस्य क्षुधं क्षपयेयमिति यावदचिन्तयं तावत् आपतितौ कस्यापि व्याधस्य बाणनिर्भिन्नतौ द्वौ मृगौ, स च व्याधः। अहन्तु तस्य हस्तादिषुद्वयं कोदण्डञ्च आच्छिद्य मृगावबधिषं

तत्रैकः सपत्राकृतः अपरो निष्पत्राकृतः पपात। एकश्च मृगं मृगयवे दत्त्वा अन्येन तयोरात्मनश्च वृत्तिमकार्षम्। तस्मिंश्च कर्मणि तुष्टं किरातमपृच्छम् अपि जानासि माहिष्मतीवृत्तान्तमिति। असौ आचष्ट तत्र व्याघ्रत्वचो विक्रीय अद्य एवागतोऽहं किं न जानामि, प्रचण्डवर्मा नाम चण्डवर्मानुजो मित्रवर्मदुहितरं मञ्जुवादिनीं लिप्सुरभ्येति तेन एवोत्सवोत्तरा पुरीति।

तदाकर्ण्य कर्णे वृद्धमब्रवं धूर्त्तो मित्रवर्मा दुहितरि सम्यक् प्रतिपत्त्या मातरं विश्वास्य तन्मुखेन बालकमाकृष्य जिघांसति, तत्प्रतिगत्य कुशलमस्य मद्वार्त्ताञ्च देव्यै रहो निवेद्य कुमारः शार्दूलभक्षित इति प्रकाशमाक्रोशः कार्य्यः, स दुर्मतिरन्तःप्रीतो बहिर्दुःखं दर्शयन् देवीमनुनेष्यति। पुनस्त्वया त्वन्मुखेन स वाच्यः, यदपेक्षया त्वन्मतमतिक्रमितवती सोऽपि बालः पापेन मे परलोकमगात् अद्य तु त्वदादेशवर्त्तिनी एवाहमिति स तथोक्तः परां प्रीतिमापत्स्यते। अथ विषयुक्तया मालया असौ धर्षयितुमागतः पापः स एवायमसिप्रहारस्ते पापीयसो भवतु यदि अस्मि पतिव्रता इति तथा प्रहर्त्तव्यः, यथा सद्य एव प्राणान् त्यजेत्। ततश्च सा माला गूढमम्भसि क्षालिता स्वदुहित्रे देया, मृते तस्मिन् तस्याञ्च निर्विकारायां सत्यां सती इत्येवैनां प्रकृतयोऽनुवर्त्तिष्यन्ते। प्रचण्डवर्मणे च सन्देष्टव्यम् अनाथकमिदं राज्यमनेनैव सह बालिका इयं स्वीकार्य्या इति। आवाञ्च कापालिकवेषच्छन्नौ देव्या एव दीयमानभिक्षौ पुराद्‌ बहिरुपश्मशानं वत्स्यावः। पुनरार्य्य-प्रायान् पौरवृद्धान् मन्त्रिवृद्धांश्च एकान्ते देवी ब्रूयात् मे देव्या विन्ध्यवासिन्या दत्तः प्रसादः, चतुर्थेऽहनि प्रचण्डवर्मा मरिष्यति, पञ्चमेऽहनि रेवातटवर्त्तिनि मद्भवने परीक्ष्य जनेषु

निर्गतेषु कपाटमुद्घाट्य त्वत्सुतेन सह कोऽपि द्विजकुमारो निर्यास्यति। स राज्यमिदमनुपाल्य बालं ते पितुः पदे प्रतिष्ठापयिष्यति, स खलु बालो मया व्याघ्रीरूपया तिरस्कृत्य रक्षितः, सा च इयं वत्सा मञ्जुवादिनी तस्य द्विजसुतस्य दारत्वेन कल्पितेति। तदेतदतिरहस्यं युष्मासु सुगुप्तं तिष्ठतु यावदेतदुपपत्स्यते इति।

स च स्थविरोऽतिहृष्टः प्रयातः सर्वमर्थं यथादिष्टमसम्पादयत्। प्रतिदिशञ्च लोकवादः प्रासर्पत् अहो माहात्म्यं पतिव्रतायाः, असिप्रहार एव असौ मालाप्रहारस्तस्मिन् जातः, न शक्यमुपधियुक्तमेतद् वक्तुं यतस्तदेव दत्तं दाम दुहितृस्तनमण्डनमिव जातं नास्या मृत्युः योऽस्याः पतिव्रतायाः शासनमतिवर्त्तते स भस्मैव भवेदिति।

अथ महाव्रतिवेशं मां पुत्रञ्च भिक्षार्थं प्रविष्टं दृष्ट्वा सा देवी प्रस्नुतस्तनी सहर्षमब्रवीत्। भगवन्! अनुगृह्यतामयं जनः मम एकः स्वप्नो दृष्टः, स किं सत्यः? मयोक्तं फलमस्याद्य एव द्रक्ष्यसि इति। अथ मद्दर्शनरागबद्धसाध्वसां मञ्जुवादिनीं प्रणमय्य भूयोऽवदत् तच्चेन्मिथ्या, सोऽयं युष्मदीयो बालकपालो स्थो मया निरोद्धव्य इति। अहन्तु तथा इत्युक्त्वा पृष्ठत आयान्तं नालीजङ्घमपृच्छम्। क्व असौ प्रचण्डवर्म्मा? सोऽवदत् राज्यमिदं मम इति कृतमतिरास्थानमण्डप एव तिष्ठति। यदि एवमुद्याने तिष्ठ इति तं वृद्धमादिश्य तस्मात्कारैकपार्श्वे परिच्छदान् अङ्गादपनीय तद्रक्षणे राजपुत्रं नियुज्य कृतकुशीलववेषः प्रचण्डवर्म्माणमेत्य रञ्जयन् प्रमत्तमेनं सहसा छुरिकया वक्षसि प्रहृत्य अन्यांश्च तदनुचरान् निपात्य प्राकारमत्यलङ्घयम्। आगत्य च पुनर्नालीजङ्घसविधे प्रतिमुक्तपूर्ववेषः सह कुमारेण मत्कर्म्मतुमुलराजवर्त्मना श्मशानोद्देश-

मध्यगाम। पूर्वमेव तस्मिन् दुर्गागृहे प्रतिमाधिष्ठान एव मया कृतं स्थूलप्रस्तरस्थगितवाह्यद्वारं विलम्। निशीथे च नालीजङ्घोपनीतमहार्हरत्नभूषणपट्टनिवसनौ तं विलमावां प्रविश्य तूष्णीमतिष्ठाव।

देवी तु पूर्वेद्युः प्रचण्डवर्म्मणे अग्निसंस्कारं दत्त्वा चण्डवर्म्मणे तामवस्थामश्मकेन्द्रोपधिकृतामिव सन्दिश्य उत्तरेद्युः प्रत्यूषसि पौरामात्यपरिवृता अभ्येत्य भगवतीमर्चयित्वा सर्वजनसमक्षं तद्भवनं परीक्ष्य सङ्केतानुरूपं महान्तं पटहनादमकारयत्। तेन च नादेनाहं दत्तसंज्ञः शिरसा एव उत्क्षिप्य सप्रतिमं लोहपादपीठम् एकतो निवेश्य निरगमं निरगमयञ्च कुमारम्। अथ यथापूर्वमर्चयित्वा देवीम् उद्घाटितकवाटः प्रत्यक्षीभूय विस्मिताः सर्वाः प्रकृतीरभ्यधां देवी विन्ध्यवासिनी मन्मुखेन एवं वः समाज्ञापयति मया सकृपया शार्दूलरूपेण तिरस्कृत्य रक्षितोऽयं बालोऽद्य दत्तः अद्यप्रभृति मत्पुत्रतया अयं परिगृह्यताम्। मां च अस्य रक्षितारं मन्यध्वं रक्षणवेतनञ्च अस्य स्वसा मञ्जुवादिनी इति।

श्रुत्वैतत् अहो! भाग्यवान् भोजवंशः यस्य त्वं देवीदत्तो नाथ इति परां प्रीतिमन्वभवन् प्रकृतयः। सा तु मे श्वश्रूस्तदहरेव परमप्रीता यथाविधि दुहितरं मह्यमदात्। आगतायाञ्च यामिन्यां सम्यगेव तद्विलमपूरयम्। सर्वे च मां देवांशं राजपुत्रञ्च देवीपुत्रं मन्यमाना मदाज्ञां नात्यवर्त्तन्त। कुमारञ्चविधिवदुपनाय्य पाठयन् नीतिशास्त्रं राजकार्य्यमन्वतिष्ठम्।

अथ क्रमेण मित्रवर्म्ममन्त्रिणमार्य्यकेतुं नाम कोशलत्वात् कुमारमातृपक्षं मन्त्रिगुणोपेतं नालीजङ्घेन परीक्ष्य सहायं कृत्वा सत्यशौचयुक्तान् अमात्यान् विविधव्यञ्जनांश्च

गूढ़पुरुषान् नियोजयन् स्वपरराष्ट्रेषु विविधेन कौशलेन उपायान् प्रयुञ्जन् अतिष्ठम्।

अचिन्तयञ्च सर्वोऽपि अतिशूरः सेवकवर्गो मयि तथानुरक्तो यथा आज्ञया जीवितमपि तृणाय मन्यते। राज्यस्थितयसैन्यसामग्र्या च न अहमश्मकेन्द्राद् वसन्तभानोर्न्यूनो नीत्याविष्टश्च। अतस्तं पराजित्य विदर्भपतेरनन्तवर्म्मणस्तनयं भास्करवर्म्माणं पितेर पदे स्थापयितुमलमस्मि। अयञ्च राजसूनुर्भवान्याः पुत्रः अहञ्च तत्साहाय्ये नियुक्त इति सर्वत्र किंवदन्ती। इदञ्च मत्कपटं न केनापि विदितम्। अवस्थायाञ्च अस्मिन् भास्करवर्म्मणि अयमस्मत्स्वामिनोऽनन्तवर्म्मणः पुत्रो भवान्याः प्रसादादेतद्राज्यमवाप्स्यतीति बद्धाशा वर्त्तन्ते। अश्मकेन्द्रबलञ्च राजपुत्रस्य भवानीपुत्रत्वं विदित्वा देवशक्तेः पुरो न बलवती मानवी शक्तिरिति अस्माभिर्विग्रहे चलचित्तमिवोपलक्ष्यते। मौलाः प्रकृतयश्च स्वत एव राजसुताभ्युदयकाङ्क्षिण्यः, मया पुनर्दानमानादिना विश्वासिता विशेषेण राजपुत्रमेवाभिकामयन्ते। अश्मकेन्द्रान्तरङ्गाश्च भृत्याः मदीयैः पुरुषैः प्रभूतां प्रीतिमुत्पाद्य मदाज्ञया रहसि इत्थमुपजप्ताः यूयमस्मन्मित्राणि, मित्राणाञ्च शुभोदर्कं वचो वाच्यमेव। ये भवनीवरपुत्रं त्यक्त्वा वसन्तभानोः पक्षीया योत्स्यन्ति तेषां नियतमन्तकभवनगमनम्। तद् यदि सपरिजनः सपुत्रकलत्रः सुखेन स्थातुमिच्छथ तदा अनन्तवर्म्मतनयं भास्करवर्म्माणमनुसरथ। इति आकर्ण्य बहवोऽश्मकेन्द्रभृत्या मद्वशे एवावर्त्तन्त।

अथाश्मकेन्द्रोऽपि अचिन्तयत् राजसूनोर्मौलाः प्रजाः सर्वा एव एनमेव प्रभुमभिलषन्ति, मदीयश्च आभ्यन्तरो भृत्यवर्गः भिन्नमना इव लक्ष्यते। यदि अहमुपेक्षमाणस्तिष्ठामि

तत उत्पन्नोपजापं स्वराज्यमपि नालं रक्षितुम्। अतोऽवि-लम्बमेव अभिन्नमनोभिः कतिपयैर्बलैः समेतः विग्रहं रचयामि इति कृतमतिः मृत्युमुखमिवास्मत्सैन्यमभ्ययात्। तमभ्या-यान्तमालोक्य राजपुत्रेण सार्द्धं तुरगाधिरूढोऽभ्यसरम्। तावत् सर्वा एव तत्सेना यदयमेतावतोऽपरिमितस्य अस्मत्-सैन्यस्य उपरि एक एव अभ्यागच्छति तत्र भवानीवर एव असाधारणो हेतुरिति निश्चित्य आलेख्यलिखिता इव अवस्थिताः।

ततो मयाभिगम्य सङ्गराय समाहूतो वसन्तभानुः समेत्य मामसिप्रहारेण दृढमभ्यहन्। अहञ्च शिक्षाबलेन विफ-लिततत्प्रहारः प्रतिप्रहारेण तं विनाश्य तच्छिरोऽवनौ विनि-पात्य सैनिकान् सर्वान् अवदम् अतःपरमपि ये युयुत्सवः, ते समेत्य मया सह युध्यन्ताम्। नो चेत् राजतनयचरणशरणा भवन्तु। मद्वचनमाकर्ण्य सर्वेऽपि अश्मकेन्द्रसेवकाः स्वस्व-वाहनेभ्यः समवतीर्य्य राजसूनुमास्य तद्वशवर्त्तिनोऽभवन्। ततोऽहमश्मकराज्यं राजसूनुसाद् विधाय तद्रक्षणार्थं मौलान् स्थानधिकारिणो नियुज्य आत्मीयभूतेन तत्सैन्येन साकं विद-र्भान् अभ्येत्य राजधान्यां पितुर पदे न्यवेशयम्।

अथ एकदा मात्रा सहावस्थितं तं राजानं व्यजिज्ञपम् मम एकस्य कार्य्यस्य आरम्भश्चिकीर्षितः, स यावन्न सिध्यति तावन्मया न कुत्रापि अवस्थातुं युक्तम् अत इयं मद्भार्य्या त्वद्भगिनी मञ्जुवादिनी कियन्त्यहानि त्वदन्तिकमेव तिष्ठतु। अहं यावदिष्टजनोपलब्धं भुवं विभ्रम्य तमासाद्य पुनरत्र समे-ष्यामि। इत्याकर्ण्य मात्रानुमतेन राज्ञा अभिहितम् आर्य्य! अस्माकमेतद्राज्योपलम्भस्य असाधारणो हेतुर्भवान्। भवन्तं विना क्षणमपि मया राज्यभूरियं न निर्वाह्या। तत् किमित्थं

ब्रवीति भवान् इति। मया उक्तं त्वया न अत्र किमपि चिन्तनीयं योऽयं ते सचिवरत्नमार्थ्यकेतुरस्ति, स ईदृशानां बहूनां राज्यानां धुरं वोढुमलम् अतस्तमत्र नियुज्य गमिष्यामि। इत्येवमाश्वासितोऽपि समारूढकोऽसौ विविधैराग्रहैः कियन्तं कालं मां प्रयाणोपक्रमात् न्यवर्त्तयत्। प्रादाच्च उत्कलाधिपतेः प्रचण्डवर्म्मणो राज्यं मह्यम्। अहञ्च तद्राज्यं स्वायत्तं कृत्वा राजानमामन्त्र्य यावद् भवदन्वेषणार्थं व्रजामि तावत् अङ्गनाथेन सिंहवर्म्मणा स्वसाहाय्याय आकारितोऽत्र समागतः पूर्वपुण्यपरिपाकात् स्वामिना समगंसि।

इत्याकर्ण्य सम्प्रहृष्टाः सर्वे कुमाराः पाटलिपुत्रे यौवराज्यमुपभुञ्जानं पूर्वसङ्केतितं सभार्य्यं सोमदत्तमानाय्य यावत् परस्परमानन्दमनुभवन्ति, तावत् पुष्पपुराद्राज्ञः पत्रमादाय राजहंसस्य समागता राजपुरुषाः प्रणम्य राजवाहनं व्यजिज्ञपन् कुमार! देवस्य पितुस्ते आज्ञापत्रं गृह्यताम्। इत्याकर्ण्य सादरं तद् गृहीत्वा राजवाहनः सर्वेषां शृण्वतां तदवाचयत्। "स्वस्ति श्रीराजहंसभूपतिः पुष्पपुरात् चम्पामधिवसतो राजवाहनप्रमुखानाश्वास्य निगदति यथा यूयमितो मामामन्त्र्य प्रस्थिताः पथि कस्मिंश्चिद्वनोद्देशे उपशिवालयं स्कन्धावारं निधाय स्थिताः। तत्र राजवाहनं निशि शिवालये शिवपूजार्थं स्थितं प्रातरनुपलभ्य अवशिष्टाः सर्वेऽपि कुमाराः सह एव राजवाहनेन राजहंसं प्रणंस्यामो न चेत् [illegible]ष्याम इति प्रतिज्ञाय सैन्यं परावर्त्त्य राजवाहन[illegible]ष्टुं पृथक् प्रस्थिताः। एवं भवद्वृत्तान्तमाकर्ण्य सैनिकेभ्यः, असह्यशोकसागरे निमग्नोऽहं वामदेवाश्रमं गत्वा तद्विदितं कृत्वैतं वृत्तान्तं प्राणांस्त्यक्ष्यामि इति निश्चित्य तदाश्रमगतस्तं मुनिं प्रणम्य यावत्तिष्ठामि, तावदसौ त्रिकालवेदी विदितास्मदभि-

प्राय: सादरमवादीत् राजन्! विदितं ते समीहितम्, एते हि त्वत्कुमाराः राजवाहननिमित्तं कियन्तं कालमापद-मासाद्य भाग्योदयात् असाधारणविक्रमकौशलाभ्यां विहित-दिग्विजयाः प्रभूतानि राज्यानि उपार्ज्य तव पादाभिवन्द-नार्थमचिरेणागमिष्यन्ति तदत्र मा साहसं कार्षीरिति तदा-कर्ण्य तत्प्रत्ययाद् धैर्य्यमालम्ब्य स्थितं मामद्य असौ मुनि-राज्ञापयत् राजन्! राजवाहनप्रमुखाः सर्वे कुमाराः साम्प्रतं समीहितसिद्धिलाभशोभिनस्त्वम्पायां समेताः, तत् प्रेष्यतामाज्ञापत्रं सेवकैरिति अहमाज्ञापत्रमिदं भवतां प्रेष-यम् अतःपरञ्चेत् क्षणमपि विलम्बं विधास्यथ ततो मां जन-नीञ्च वसुमतीं कथावशेषाविव श्रोष्यथ इति।”

एवं पितुराज्ञापत्रं श्रुत्वैव सराजवाहनाः कुमाराः वशीकृतराज्यरक्षणसमर्थान् आप्तान् पुरुषान् स्थाने स्थाने नियुज्य कियता सैन्येन मार्गरक्षां विधाय पूर्ववैरिणं मालवेन्द्रं मानसारं पराजित्य तद्राज्यं वशीकृत्य चण्ड-वर्म्मणा मन्त्रिणा पूर्वं कारागृहे निक्षिप्तं पुष्पोद्भवं कुमारं सभार्य्यं मोचयित्वा स्वस्वभार्य्यासहिताः पुष्पपुरं गत्वा राजवाहनम् अवन्तिसुन्दर्य्या समेतं पुरस्कृत्य तस्य राज-हंसस्य मातुर्वसुमत्याश्च चरणान् ववन्दिरे। तौ च पुत्र-समागमेन परमानन्दमनुभवन्तौ वामदेवः समीक्ष्य सर्वान् कुमारानाज्ञापयत् भवन्तः सर्वेऽपि साम्प्रतं स्वानि स्वानि राज्यानि गत्वा न्यायेन परिपालयन्तु, यदा च इच्छा पुनर्भवति तदा पित्रोश्चरणाभिवन्दनाय आगन्तव्यम्। ततस्ते सर्वेऽपि कुमारास्तन्मुनिवचनं शिरसि आदाय तं प्रणम्य पितरौ च दिग्विजयं पुनर्विधाय मुनिसन्निधौ स्थितं पितरं राजहंसमुपागमन्।

अथ राजा कुमाराणां स्वस्वचरितानि आकर्ण्य परमप्रीतो मुनिं सविनयं व्यजिज्ञपत् भगवन्! तव प्रसादादस्माभिर्मनुजमनोरथाधिकं सुखमधिगतम् अतःपरं मम भवच्चरणसन्निधौ स्थित्वा आत्मसाधनमेव विधातुमुचितं तत् पुष्पपुरराज्ये मालवराज्ये च राजवाहनमभिषिच्य अवशिष्टानि राज्यानि नवभ्यः कुमारेभ्यो यथायथं सम्प्रदाय ते च कुमारा राजवाहनवशवर्त्तिनस्तदेकमत्या समग्रां भुवमकण्टकां यथा उपभुञ्जन्ति तथा विधेयं स्वामिनेति। मुनिरवदत् कुमाराः! अयं वो जनकः वयःसमुचिते पथि वर्त्तमानः, अस्य मदाश्रये स्थित्वा वानप्रस्थाश्रमाश्रयणं सर्वथा भवद्भिर्न निवारणीयम्। भवन्तश्च पितृसन्निधौ न सुखमवाप्स्यन्ति इति अभिधाय राज्यानि कुमारेभ्यो यथायथं विभज्य प्रादात्। ते च मुनेः पितुश्च आज्ञां शिरसा आधाय राजवाहनं पुष्पपुरेऽवस्थाप्य तदनुज्ञया स्वानि स्वानि राज्यानि गत्वा न्यायेन प्रतिपालयन्तः स्वेच्छया पित्रोः सकाशे गतागतमकुर्वन्। एवमवस्थितास्ते कुमाराः सर्वमपि भूमण्डलं परस्परम् ऐकमत्येन परिपालयन्तः परमसुखेन कालमत्यवाहयन्।

इति अष्टमोऽच्छ्वासः।

मुद्राराक्षसनाटकस्य पूर्वपीठिका ।

अस्ति मगधेषु कुसुमपुरं नाम नगरम् । तत्रासीत् महाप्रतापो राजा नन्दो नाम, तस्य महिषी रत्नावली नाम । तस्य आसन् नव सूनवः । कदाचित् नन्दसमृद्धि-लोलुपानां युद्धार्थिनां राज्ञां मन्त्रिणो व्यजिज्ञपन् भूपालाः! परमसमृद्धिमान् विचक्षणामात्यो नन्दो निग्रहीतुं न शक्यः अतोऽस्य अमात्यबलमविचार्य्य देवैर्नैतदारम्भणीयं कार्य्य-मिति । ततस्ते नृपतयोऽब्रुवन् भवद्भिर्धीमद्भिरेकमत्या अरत्निमितं समं श्लक्ष्णं नितान्तरम्यं देवदारुखण्डमेकं रहसि सुवर्णपट्टिकायां संस्थाप्य मुद्रामुद्रितं विधाय किमस्य मूलं का वास्य शिखेति विचार्य्यार्य्येण अस्माकं लेखनीयमिति लेख्यं कतिपयतुरगवसनमणिमुक्तासमेतं महाराजाय नन्दाय प्रेषणीयमिति ते च तथैवान्वतिष्ठन् ।

कदाचित् राजा नन्दः प्रमदवनं प्राविशत् । तत्र प्रविश्य चामरग्राहिण्या सुमङ्गलाख्यया कयापि किङ्कर्य्या सह चलदलतरोरधस्तादतिष्ठत् । तत्र च तत्फलकणिकां वदनेन आदाय द्रुततरं गच्छन्तीं पिपीलिकापङ्क्तिमा-लोक्य सविस्मयः स्मितमकरोत् । सुमङ्गलापि राज्ञः स्मित-मवलोक्य स्मितमकरोत् । ततो राज्ञा कथं त्वया स्मितं कृतमित्यभिहिता सा न किञ्चित् कारणं मम स्मितस्य परं महाराजस्य स्मितदर्शनेन मम स्मितं जातमिति अव-दत् । ततश्च राजा मत्स्मितहेतुमविज्ञाय त्वया न स्मितं कृतं मया ज्ञायते, तत् मत्स्मितहेतुरवश्यं त्वया वक्तव्यः नोचेत् वधिष्यामि त्वामिति तर्जयामास । उक्तञ्च,

वृथा स्मितं वृथालापं न कुर्य्याद् बुद्धिमान् नरः।
कुर्वन् वै लघुतामेति शक्रतुल्योऽपि भूतले ॥

इत्थं तर्जिता सा गत्यन्तरमपश्यन्ती ब्राह्मणमेकमपश्यत्। अवन्दत च तं पादयोः प्रणिपत्य। स च अग्रजन्मा तां नितरां कातरां मृतामिवोपलक्ष्यमाणामालोक्य कारणमपृच्छत्। सा राज्ञा उक्तं सर्वं न्यवेदयत्। स तु तां सर्वमेतदहमभिधास्ये मा भैषीरिति समाश्वास्य अभाषत वत्से! अपि क्व राजा स्थितः, किं तत्र अभूत्, सर्वं निवेदयेति सा अवोचत् ब्रह्मन्! अश्वत्थतरुतले पिपीलिकापङ्क्तिमात्रमासीत् तत्र कियन्तं कालं राजा असौ स्थित इति।

अथ ब्राह्मणेनोक्तं विदितं राजस्मितस्य कारणं शृणु अश्वत्थबीजमतिक्षुद्रं क्षुद्राभिः पिपीलिकाभिर्वदनेनापह्रियते परमेतदेव बीजं कदाचित् गजादिभिरपि करकवलनायोग्यमहत्तरतरुरूपतया परिणमति, तद्विचित्रा विधातुः सृष्टिरिति स्मितमकरोत् राजा। सा तु एवमभिहिता द्विजेन, राजान्तिकमुपेत्य कृताञ्जलिरभाषत देव! चलद्दलबीजवदनां पिपीलिकालीमवलोक्य एतदेव बीजं कालवशात् महत्तररूपं भविष्यति इति विस्मितो विधातुरतितरां सृष्टिनैपुण्यमिति स्मितमकरोत् महाराज इति। ततश्च अतिप्रीतो नृपतिस्तस्यै सुमङ्गलायै महार्हरत्नहारं प्रसादमकरोत्।

अथैकदा सभासीनं नृपं वेत्रपाणिर्दौवारिकः समेत्य प्रणम्य च कृताञ्जलिः सकलसामन्तसम्मत्या आगतदूतदत्तसुवर्णपेटिकासमेतानेकतुरगादिवस्तुजातमादाय प्रदर्श्य राज्ञामुमतः पेटिकामुद्राश्च तद्दाचिकं सर्वमभिधाय परावर्त्तत। ततश्च राजा यज्ञनासादिभिरमात्यैः सह किमस्य मूलं वा वास्य शिक्षेति विचारयन्नपि न किञ्चिदवधारितवान्। ततश्च सहश्राम-

जनितासुतसुकतामाश्रित्यैव धृततत्काष्ठः स्वान्तःपुरमेव प्राविशत्। तत्र च सुमङ्गलाया एव अस्ति अस्य निगूढार्थबोधसामर्थ्यमित्यवधार्य्य तामवादीत् सुमङ्गले! ब्रूहि तावत् किमस्य काष्ठस्य मूलं का वास्य शिखेति। सा तु शिरसा प्रणम्य बद्धाञ्जलिः, देव! क्व प्रमदानामेतादृशं बुद्धिपाटवम्? यच्च मया स्मितनिमित्तमभिहितं तन्न मया स्वधिया, परं केनचित् महात्मना मन्मरणोद्यमदर्शनसञ्जातकरुणेन अभिहितम्। मया देवपादमूले निवेदितमित्यभाषत।

अथ राजा तदैव तं महापुरुषमन्विष्य मन्त्रागारमानीय यथार्हमर्चयित्वा अब्रवीत् ब्रह्मन्! कं देशमलङ्करोति भवान् किमाख्यश्च। द्विजः प्राह राजन्! भवन्नगरनिवासिनो मणिकारश्रेष्ठिनश्चन्दनदासस्य सविधे कृतवसतिरस्मि सुबुद्धिशर्मा नामेति। राजा अब्रवीत् द्विजवर! किमस्य काष्ठस्य मूलं का वा शिखेति भवता विचार्य्य अभिधीयतां ब्राह्मणेनोक्तं नृपते! किमत्र विचारणीयं सुकर एतस्य अवबोधः, अस्मिन् जले प्रक्षिप्ते योऽस्यांशो जले निमज्जति स एव अस्य मूलं यतः काष्ठस्य मूले एव गुरुतास्ति गुरुत्वञ्च निमज्जनकारणमिति ततश्च राजा तदीयबुद्धिसौष्ठवमवगत्य अतिप्रीतस्तस्मै प्रधानामात्यपदवीं दत्त्वा स्वामात्यकृत्ये न्ययोजयत्। अथ कालेन सुबुद्धिशर्मणः राक्षस इति अपरा आख्या सञ्जाता।

अत्रान्तरे शकटारो नाम कश्चित् सुबुद्धिशर्माणं प्रधानामात्यपदवीमारूढं निशम्य सञ्जातेर्ष्यः पर्वतेश्वरदेशसंस्थापितकटकाधिपत्यमपास्य छायेव राजानं सेवितुमुपचक्रमे। दैवाच्च राजा ममार। तस्मिन्नेव समये विन्ध्यारण्यसन्निधिवासी कश्चित्, वृषिद्धी नाम जटिलः नेपालदेशनीलकण्ठनामोपाध्यायप्रसादासादितपरशरीरप्राणप्रवेशविद्यः सुशील-

बहुश्रुताभिधाभ्यां सतीर्थ्याभ्यां सह गुरुदक्षिणायै कल्पित-लक्षसुवर्णार्जनाय राजानं नन्दमेव तद्दानसमर्थं मन्यमानः कुसुमपुरमुपागमत्। अश्रौषीच्च आगत्य एव जाह्नवीतीरे कृतासनपरिग्रहो राजमरणम्। सोऽचिन्तयत् कथमिदानीं गुरुदक्षिणामाहरामि, अस्याश्च बहुत्वाद् बहुधनिसविधे याचितव्यं तथात्वेऽपि सम्यक् सिद्धिर्भवति न वा, याचनं जीवन्मरणमेव। उक्तञ्च,

धनान्धसविधे दीनं देहि देहीति यो वदेत्।
अपमात्मनः कालं जीवन्नेव न जीवति॥
वरं वृक्षत्वग्भिर्वसनरचनं शैलशयनं
वरं जीर्णारण्ये गलितफलमूलाशनरुचिः।
वरं मृत्युर्लोके न तु धनमदान्धस्य सविधे
स्खलद्वर्णं लज्जानतमिह मुखं याचनविधौ॥

अतो याचनमनुचितं तदिदानीं निजविद्याबलेन राजशरीरमनुप्रविश्य सुशीलं याचकं विधाय स्वकार्य्यं साधयामि इति निश्चित्य अब्रवीत् भ्रातः सुशील! त्वमद्य सन्ध्यासमये राजशरीरप्रविष्टस्य मम सकाशं गत्वा गुरुदक्षिणार्थं लक्षसुवर्णानि याचस्व, भ्रातः बहुश्रुत! त्वं मच्छरीरमिदं यत्नतो रक्षेत्याख्याय स्वसिद्धविद्याप्रभावेण प्राणानाकृष्य राजशरीरमन्वविशत्। राजा च सद्यः सुप्तोत्थित इव व्यबुध्यत। ततश्च मन्त्रिराक्षसेन सकलनगरमहोत्सवाय प्रासादसिंहासने राजानमुपवेश्य महामङ्गलमकारि। तस्मिंश्च काले सुशीलमागतं दृष्ट्वा राजा तं बहु सम्मान्य गुरुदक्षिणार्थं तेन प्रार्थितः तस्मै लक्षसुवर्णानि प्रादात्। एतदालोक्य मन्त्रिराक्षसेन चिन्तितं राज्ञो गतजीवितस्य सहसा पुनर्जीवनं जीवितमात्रेण च बहुसुवर्णदानं किमपि अद्भुतमिव प्रतिभाति, मन्ये केनापि

परशरीरप्रवेशविद्याविचक्षणेन स्वेष्टलाभाय आपातत इद-मनुष्ठितं परतश्च अनेन पुन: स्वशरीरपरिग्रहोऽवश्यं करिष्यते, तदा च वयं राजरहिता भवामः, अतो राजशरीरप्रविष्टस्य शरीरं कुत्रापि स्थितं विनाशनीयं येन अनेन पुनस्तत् न प्रति-पद्यते इति विचिन्त्य तत्कालमेव तुरङ्गमारूढ़: इतस्ततोऽन्वे-षणाय भागीरथीपरिसरेण गच्छन् कदा सुविद्य: स्वशरीरमा-श्रयेदिति चिन्ताव्याकुलं सुशीलं बहुश्रुतञ्च दृष्ट्वा अये! स एवायं जन:, य: सुवर्णलक्षाणि परिगृहीतवान् दृश्यते च सुवर्ण-लक्षप्राप्तावपि व्यग्र इव। अतोऽत्र एव किमपि आलोक-नीयमिति विविच्य अश्वादवततार ददर्श च जटिलशरीर-मेकम्। कथमेतत् शरीरमत्र पतितं तिष्ठति इति पृच्छया यदा सम्यगुत्तरं न अधिगतं तदा एतच्छरीराधिष्ठिता एव राजशरीरमनुप्रविष्ट इति निश्चित्य तच्छरीरं काष्ठादिभि-रदाहि मन्त्रिराक्षसेन। तौ च जटिलसहचरौ कदाचिदेताभ्यां कोऽप्युपाय: करिष्यते इति शिलानिबद्धहृदयौ गङ्गाम्भसि निक्षिप्तौ।

अथ राजशरीरप्रविष्टो जटिल: स्वविद्याप्रभावेण शरीरं मेऽनेन मन्त्रिराक्षसेन भस्मसात् कृतमिति विदित्वा शरीर-वत्सलतया मन:क्षोभमगात्। ततश्च कियता कालेन मन्त्रि-राक्षसेन चिन्तितम्।

मयि प्रवृत्ते किमपि प्रवक्तुं चित्तं समासज्जति कौतुकेषु।
मयि स्थिते संसदि वक्रनासं सम्बोध्य सम्भाषणमातनोति॥

इति विरक्त इव लक्ष्यते राजा प्रायेणायं स्वशरीरविनाश-जनितरोष इति मन्ये अतोऽत्रेदानीमस्मदवस्थितिर्नोचिता।

यत:,

अन्तक: कुपितो यस्मिन् तदन्तं कुरुते हि स:।

राजा तु कुपितः सर्वं कुलस्यान्तं तनोत्यलम् ॥

इति विचिन्त्य सायं नगरप्रान्तस्थितदेवायतनमहोत्सव-दर्शनव्याजेन सकुटुम्बः कुसुमपुरमजहात्। ततश्च भागीरथी-मुत्तीर्य्य सन्निहितदेशाधिपतिः पर्वतेश्वर एव गुणज्ञो मामनु-ग्रहीष्यति इत्यवधार्य्य तमभ्यगात्।

अथ नीतिरीतिविज्ञानविज्ञाता शकटार एव अमा-त्यवर्य्यः राजप्रियतामगात्। एकदा राजानं मृगयारतिमालक्ष्य शकटारोऽपि तमनुसरन् मृगयाविहारेण भ्रममरञ्जयत्। मृगानुसरणक्रमेण राजानमतिनिविड़ारण्यप्रविष्टमश्वमारूढ़-मेकः शकटार एव अनुवव्राज तुरङ्गमाधिरूढ़ः। अपराणि सैन्यानि तमनुसर्त्तुं न अशक्नुवन्। ततश्च अमात्यः शकटारो राजनं श्रममाक्रान्तं क्षुत्पिपासातुरमालोक्य अश्वादवतीर्य्य स्वोत्तरीयवसनास्तृते कान्तारैकदेशे समुपवेश्य तस्य पिपासाप-नयनार्थं पानीयमानेतुमगात्। प्रापश्च इतस्ततोऽन्विष्य जला-शयमेकम्। ततस्तत्र अवगाह्य विसिनीदलनिर्म्मितपुटेन पानीयमुद्धृत्य पिबन् यावत् समन्तादवोकयति स्म तावत् कामपि एकां कतिपयवर्णावलीविराजमानां शिलां जलमध्ये अपश्यत्। तत्र लिखितमस्ति एतत्

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥

तुल्यार्थं तुल्यसामर्थ्यं मर्म्मज्ञं व्यवसायिनम्।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥

ततश्च असौ व्यचिन्तयत् केन किमर्थमिदं व्यलेखि, अथवा मद्दर्शमेव अत्रालेखि विधात्रा यतोऽहमेवैतादृशोऽस्मि। यदि कदाचिद् दुर्दैववशात् मे शिलामिमां राजा स्वयं पश्येत् तन्नूनं मम प्राणसंशय एव भवेत् तत्र युक्तमिमां शिलामोहशीमेव

परित्यक्तुम् अन्यत्र वा नेतुं राजनि अत्र स्थिते। तदत्रैव एनां विपरीतां कृत्वा स्थापयामि, कदाचित् असौ राजा अति-पिपासाकुलतया अत्रैव आगमिष्यति इति तथा पद्मिनीदल-पुटेन जलं गृहीत्वा राजान्तिकमाजगाम। राजा तु तज्जलं पीत्वा अपि पिपासाशान्तिमलभमानः तामेव वापीमवा-तरत्। तत्र च शीतलसोपानप्रान्तशिलातले निहितचरणः निर्मलं पयः समन्तादवलोकयन् एकतस्तु कलुषितं नीर-मालक्ष्य कथमिदमेवं रूपमिति तर्कितमतिस्तदन्तर्जले करं प्रसारयामास। पस्पर्श च शिलामेकां सकर्दमाम्। उत्थाप्य तां जलेन चालयन् यावदवलोकयति तावत् तत्र लिखितं तदेव श्लोकद्वयमालोक्य अवाचयत्।

अत्रान्तरे मन्त्रिणा कथमद्यापि राजा चिरयति, मन्ये सा शिला अनेनाधिगता इति तर्कयता तदन्वेषणव्याजेन तत्रैव आगतम्। आगत्य च स मन्त्री तत्र तं राजानम् आकृष्टशिलालिखितश्लोकदत्तदृष्टिं तदर्थालोचनव्यग्रमनसमव-लोक्य मम एवायमनर्थ आपतित इति समचिन्तयत्।

स्वयं गते जगज्जालं गतमेव न संशयः।
स्वयं जीवति तत्सर्वं जीवतीत्येव निश्चयः॥
धर्म्मार्थकाममोक्षाणां कारणं स्वस्य जीवनम्।
तस्य सत्त्वे त्वधर्मोऽपि परिहर्त्तुं लघुर्भवेत्॥
अश्वमेधसहस्राणि वाजपेयशतानि च।
आत्मत्राणतुलां यान्ति नैव विज्ञानकोटयः॥

एवं विचिन्त्य तामेव महाशिलां राजशिरसि पातया-मास। दृष्ट्वा च राजानं गतजीवितं तद्वाजिनं कस्मिं-श्चित् कान्तारे विमुच्य तस्मादतिदूरमभिगच्छन् राजान्वे-षणमिव कुर्वन् विचचार। ततश्च सैनिकेषु समागतेषु ताम्

राजवृत्तान्तं पप्रच्छ। तैश्च राजा न प्राप्त इति निगदितो दुःखित इव तैः सह समन्तात् काननानि परिभ्रमन् दुःखाभिभूत इव नगरं प्रत्यागमत्। आगत्य च तत्र राजानमदृष्ट्वा सर्वासु दिक्षु तदन्वेषणाय लोकान् प्रास्थापयत्। पुनश्च स्वयं सैनिकैः परिवृतो राजान्वेषणार्थं काननानि पर्यटन् तमेवाश्वं लेभे न तु राजानम्। ततः सर्वे प्रत्याहृत्य सुदुःखिताः नगरमेव शोकाम्बुधौ न्यमज्जयन्। शकटारस्तु हा राजन्। क्वासि देहि मे प्रतिवचनमिति नितरां शोकाकुल इव उच्चैश्चक्रन्द। सर्वैश्च तदनुजीविभिः प्रतिबोधितोऽपि प्राणत्यागाय नाम मतिमकरोत्।

अथ रोदिति सावरोधे कुसुमपुरजने वक्रनासादयो मन्त्रिणो मिलित्वा तं शकटारं प्रबोध्य नव नन्दकुमारान् सान्त्वयित्वा मृतस्य राज्ञः और्ध्वदेहिकमकारयन्। शुभे च दिने ज्येष्ठं राजसुतं राज्ये अभ्यषेचयन्। अपरे च राजनन्दनास्तं ज्येष्ठं पितरमिव उपचेरुः। एकदा असौ नवो नृपतिः सवयोभिरुपवने विहरन् कस्यचित्तरोस्तले उपविष्टः पितृनिधनजनितचिन्तया व्याकुलितः शकटारे अनुपस्थिते वक्रनासादीन् मन्त्रिणोऽपृच्छत् आर्य्याः! पिता अस्माकं क्व गतः किं वा तस्य वृत्तं भवन्तः सविशेषं मम निवेदयन्तु इति। ततस्तैरुक्तं राजन्! एकदा देवस्य पिता अमात्यशकटारेण सह मृगयार्थं महावनमगात्। तत्र इतस्ततः परिभ्रमन्तौ तौ पार्श्वचरसैनिकवृन्दपरिभ्रष्टौ बहुदूरमीयतुः। ततः किञ्चित् कालानन्तरम् अमात्यः शकटारो न क्वापि राजा प्राप्त इति समागत्य नगरे प्रख्याप्य पुनरन्वेषणार्थं गतस्तुरङ्गममेव आनीतवान्। एतावन्तमेव वयं वृत्तान्तं जानीम इति। राजा एकदाकर्ण्य नानावित-

र्त्ताकुलतया क्षणं तूष्णीमासीत्। ततश्च उत्थाय रहसि विचारचतुरान् विश्रम्भभाजनचारजनान् आहूय क्व गतस्तातः किञ्च अस्य सञ्जातमेतद् रहस्यमन्विष्यन्तु भवन्तः, अन्वेषणे सम्पन्ने भवतः सम्यक् परितोषयिष्यामि इति समाज्ञाप्य स्वयमन्तःपुरमगात्। ते तु किञ्चिदितस्ततो मृगयमाणाः अलब्धराजवृत्तान्ताः समागत्य प्रोचुः देव! किञ्चिदपि न अस्माभिर्ज्ञातं राजवृत्तान्तमिति। ततश्च राजा कुपितस्तान् भवद्भिर्येन केनापि उपायेन एतन्निगूढ़वृत्तमानेतव्यं नो चेत् युष्माकं प्राणदण्डं विधास्यामि इति भयमदर्शयत्। अथ तेऽतिभीताः स्थलेषु जलेषु च विविधोपायेन अन्वेषणमकुर्वन्। तेषु कश्चित् स्थविरः नगरोपान्तवर्त्तिनः सरसस्तीरे समासीनं कमपि तापसवेशं पथिकमद्राक्षीत्। तापसश्च तमुद्विग्नरूपं दृष्ट्वा वृत्तान्तमपृच्छत्। वृद्धेनोक्तं वयं राजाज्ञया मृगयागतस्य तत्पितुरन्वेषणार्थं नानाविधान् उपायान् चक्रम परमकृतार्था एव। अकृतार्थांश्च अस्मान् समागतानसौ प्राणदण्डेन योजयिष्यति इति।

तदाकर्ण्य स तापसस्तं स्थविरमब्रवीत् तात! समाश्वसिहि गच्छ सत्वरं राजानं निवेदय, अस्ति कश्चित्तापस एतद्वृत्तान्तप्रणिधाननिपुण इति तदाकर्ण्य तेन वृद्धेन हर्षोत्फुल्लचित्तेन सत्वरं राजसदनमभ्येत्य राजाभिदधे देव! अद्य दिवसावसानसमये मया कश्चित् तापसो दृष्टः। स तु मामलब्धराजवृत्तान्तं विषादपूर्णमालोक्य कृपया श्रुतसर्ववृत्तान्तः नय मां राजसन्निधिम् अहमेतद्वृत्तान्तवर्णने शक्त इत्याचष्ट। तच्छ्रुत्वा अहं सत्वरमेव देवपादमूलमागतः, परं देवः प्रमाणमिति ततश्च राज्ञा शीघ्रमानय तं तापसमित्युक्ते तेन अविलम्बितमेव आनीतः स तापसः राजसमीपमगच्छत्। तमागत-

मभिप्रणम्य समुचितासने समुपवेश्य भगवन्! तातवृत्तान्त-नितान्तचिन्ताकुलतया अनया प्रभूतया राज्यश्रिया अपि निमेषमात्रमपि न विश्रान्तिसुखं प्राप्नोमि, कं शरणं यामि इदानीमिति चिन्तयन्नेव चिन्तामणिमिव भवन्तं समासादित-वानस्मि इत्यवसितवचने एव नरपतौ स तापसः स्वसमीहितं सिद्धमेव अवेहि परश्वः सर्वमावेदयिष्यामि इत्यभिधाय सर-स्तटमगात् राजा च अन्तःपुरम्।

अथ तापसः केनापि उपायेन अयमर्थः शीघ्रं निर्णेय इति चिन्तयन् वीरसाधनं सस्मार। बद्धपरिकरश्च प्रातरुत्थाय तं स्थविरं तदुपयोगिद्रव्यासादने न्ययोजयत्। स्वयञ्च श्मशाने शूलारोपितं पुरुषमेकं संगृह्य सायं गङ्गाजलेन संस्नाप्य चिता-मेकामासिच्य तत्र कृताञ्जनं विहितसिन्दूरतिलकं रक्तचन्दन-चर्चितं रक्तकरवीरदामनिबद्धप्रत्यङ्गं सताम्बूलवदनम् उत्तानं संस्थाप्य चरणयोर्हस्तयोः शिखायाञ्च तत्तन्मन्त्रैः पञ्चभिः कीलकैः कीलयित्वा मत्स्यमांसाद्यनेकबलिपूजोपकरणान्यासाद्य विस्रंसितचिकुरभारो वामकरकलितनरकपालमालः कृत-सिन्दूरतिलकः रक्तचन्दनकृतानुलेपनो रक्तपुष्पमालाविराजित-कण्ठनालः करतलकलितललितकरवालस्ताम्बूलवदनः साञ्जन-नयनो विश्वासास्वच्छवक्षहृदयबद्धवीरासनो दिग्बन्धात्मरक्षा-दिकं विधाय विगतभीर्दिक्षु विदिक्षु च क्षेत्रपालादिभ्यो बलीन् विकीर्य तिरस्करिणीं नमस्कृत्य महाकालीं ध्यात्वा निशीथे मन्त्रमजपत्। ततश्च अनेकसिद्धिविध्वंसि घोरनाना-रूपभूतप्रेतपिशाचादीन् तत्तद्बलिभिस्तत्तद्विद्याप्रभावेश्च निराकुर्वन् मन्त्रवर्णावलीपाठपरः सहसा यामिनीचरमयामे प्रचण्डमार्तण्डमण्डलमिव प्रबलवह्निकालानलमिव तेजो-राशिमपश्यत्। ततश्च देवीपादपद्मनिबद्धचित्ततया अवि-

चलितमतिः क्षणेन भ्रमद्भ्रमरमन्दारदामनिबद्धकुटिलकुन्तलः बहुलरत्नराजिविराजितानेकरविसम्भारभासुरकुण्डलां गृहीत-दिव्यताम्बूलरागप्रतिफलनद्विगुणितरक्तिमारांञ्जितगण्ड-मण्डलां बालातपविडम्बिसिन्दूरसारललिततिलकां सस्मितवदनचन्द्रां देवीं भद्रकालीं ददर्श। दृष्ट्वा दण्डवत् प्रणम्य च तेन संस्तुता सा वत्स! परितुष्टाऽस्मि वरं वृणीष्व इति तमवादीत्। ततस्तेन मातर्भूपतेर्नन्दस्य किं वृत्तम् आचक्ष्व इति वरं प्रार्थिता महादेवी समभाषत भद्र! अस्ति अत्र नगरोपान्तवर्त्ती पातालकन्दरो नाम महीधरः। तस्य दरीपरिसरे वटविटपिसविधवर्त्तिन्या वाप्या जलान्तर्निहितशिलातलोल्लिखितश्लोकद्वयाभिप्रायदत्त-चित्तो महीपतिरमात्यशकटारेण महाशिलानिपातनेन व्यापादितस्तत्रैव अद्यापि तदीयसर्वाङ्गीणाभरणानि अस्थीनि च सन्ति इत्यभिधाय सद्यस्तिरोदधे। अथ स तपस्वी तेन वृद्धेन सह सद्य एव राजसदनमयासीत् अब्रवीच्च तं राजानं देव! विदितं सर्वं देव्याः कृपया, परं न शक्नोमि निवेदयितुं यतः स्वायत्तसिद्धयः परायत्तसिद्धयः उभयायत्तसिद्धयश्च राजानो भवन्ति तेषु भवान् परायत्तसिद्धिरेवासि अयञ्च वृत्तान्तः सर्वोऽपि तं परमेव अनुभावतीति ततश्च राज्ञा स्वायत्तसिद्धिरेव अस्मि इति निःसन्देहमवगच्छ इत्यभिहितः स तापसः सर्वं देव्युक्तं न्यवेदयत्। तदाकर्ण्य राजा अतिचमत्कृतः स्वाभरणानि रत्नानि च बहूनि तस्मै पुरस्कृत्य तं तापसं वृद्धसहितं शिला-माभरणादिकञ्च आनेतुं प्राहिणोत् तौ च परेद्युर्देव्युक्तवर्त्मना गत्वा तत्सर्वमादाय राज्ञे समर्प्य स्वावासमगच्छताम्। ततो नृपतिस्तान्येव आभरणानि इति कञ्चुकिवदनाद्विज्ञाय शिलात-लोल्लिखितश्लोकद्वयार्थमवधार्य पितुश्चोभयायत्तसिद्धित्वमवगम्य अमात्यशकटारेणैव इदमनुष्ठितमिति जानन् शिला...

वक्रनासादीनाहूय सर्वं तद्वृत्तान्तमाख्याय शकटारं हन्तुमादिशत्। ततोऽमात्यशकटारमाहूय तस्मै सर्वं तत्कृतमाख्याय कालकायनामानं भृत्यमाहूय आज्ञापयत् कालकाय! अतिगह्वनमेकं भूगृहं विधाय सपुत्रकलत्रमेनं दुरात्मानं तस्मिन् निक्षिप्य अष्टाङ्गुलमितेन, तद्द्वारेण पलपञ्चकमितान् पुराणचणकान् तन्मितञ्च जलं प्रत्यहं दातव्यं यथा च तत्र न कोऽपि गच्छेत् तथा विधातव्यञ्च इति। कालकायश्च तथैव तत् सर्वमन्वतिष्ठत्।

अथ राजा वक्रनासादिभिरेव राजकार्य्याणि अपश्यत्। शकटारस्तु तथाविधबन्धनागारनिक्षिप्तः नितरां दुःखितः सङ्कटवर्मनिकटवर्मसुमतिमित्रगुप्तप्रकटारविकटाराख्यान् षट् पुत्रानभाषत पुत्राः, समुत्पन्ने ईदृशे व्यसने स्फुरति कश्चिदुपायो येन प्रतिविधानं कर्त्तुं शक्यते? ततस्तेषु कतिपयनिमेषश्वासवतामस्माकं न स्फुरति कोऽपि उपायलेशः, किञ्च तथाविधकृतातिपातकानां युक्तैव एतादृशी गतिरिति वदत्सु विकटारः समुत्पन्नमतिः सक्रोधश्च अब्रवीत् भ्रातरः! आत्मत्राणपरायणेन तातेन तादृशमकार्य्यमपि कृतं परं तत्तनयो राज्यप्रदानपरिपोषणादिना वर्द्धित इति कथं पातकिनो वयं किञ्च कृतघ्नेन अमुना निरपराधा वयमपि नीयन्तेऽन्तकसदनं तदत्र स्वस्वबुद्धिविभवेन प्रतिविधानं भावनीयमेव इति। ततः शकटारो विकटारमेव प्रतिविधानक्षमं विज्ञाय तान् चणकान् तज्जलञ्च तज्जीवनाय एव प्रकल्प्य स्वयं स्वपुत्रकलत्रः क्रमेण प्राणान् जहौ। विकटारस्तु राजापकारचिन्तनावगणितशोकः कथञ्चित् तावन्मात्रवृत्तिः कालमत्यवाहयत्।

एकदा राजा का गतिरिदानीं शकटारस्य इति कालकायमपृच्छत्। तेन च कालकायेन देव! तावन्मात्राश्चणकास्तज्जलञ्च मया तेन रन्ध्रेण दीयते इति एतावन्मात्रं ज्ञायते

नान्यदिति निवेदितम्। ततो नृपतिर्भूगृहद्वारमुद्घाट्य कोऽत्र जीवतीत्यवधार्य्यतामिति समादिष्टः कालकायः सर्वाणि मृतकाष्ठीनि दृतस्ततो दृष्ट्वा अस्थिचर्मावशेषं विकटारञ्च देव! सर्व एव मृताः परमेकोऽस्थिचर्मशेषो हृतनिमेषः निश्वासोपलब्धजीवनो बालस्तिष्ठतीति न्यवेदयत्। तदाकर्ण्य राजा सञ्जातकृपस्तं बालकमानाय्य बन्धनात्, जीवनमात्रमन्नं तदर्थमाज्ञापयत्। स च तेनैव भक्तेन स्वगृहे स्थितः कालं निनाय।

अत्रान्तरे मन्त्रिराक्षसो व्यचिन्तयत्—

किं देशान्तरलब्धवैभवचयैः सर्वाधिकैः सर्वदा
यत्रात्यन्तिकबान्धमित्रसुहृदां दृष्टिर्न सञ्जायते।
किं वाऽनेन महत्तरेण महसा तत्राधिकारेण वा
यत्र द्वेषिजनस्य कापि निकृतिः कर्त्तुं न वा शक्यते॥

भिक्षाटनादिकक्रूरविशेषकृशतरदेहदाहजनितबद्धवैरः सकलसम्पत्तिभोगयोग्यराजशरीरसंवाससंस्थापनारूपोपकारानभिज्ञो राजा तन्मतवर्त्ती शकटारश्च निधनमगात् तत्तनयश्च उदग्रधन्वा नन्दः सर्वामपि महीं स्ववशां कर्त्तुकामः सदृशरूपममात्यं मृगयते। तदस्मात् निष्क्रम्य सकलसुहृद्वरशिरोमणिचन्दनदासशकटदासाद्यधिष्ठितं कुसुमपुरमेव समाश्रयणीयमिति विविच्य पर्वतेश्वरमनुमान्य कुसुमपुरमगात्। ततश्च नन्देन अमात्यराक्षसमागतं विज्ञाय पैतृकोऽयममात्यवर्य्य इति तं प्रधानामात्यपदवीमध्यारोहयत्। स च यथोचितं सर्वं राजकार्य्यमकरोत्। विकटारस्तु तादृशं महाप्रभावशालिनं मन्त्रिराक्षसमेव भृशमुपचचार। तदुपचारेण अतिप्रीतो राक्षसस्तस्मै पारितोषिकं किञ्चित् दातुमैच्छत्। स च अमात्य! नाहं पारितोषिकार्थी, राजसंसारे सर्वमेव त्वदधीनं तदहमेकमधिकारं

लब्धुमिच्छामि इति व्यज्ञापयत्। अमात्यराक्षसश्च तस्मै एक-मधिकारं दास्ये इति प्रतिशुश्राव।

एकदा राज्ञः पितृश्राद्धदिनमागतं दृष्ट्वा मन्त्रिराक्षसस्तं श्राद्धभोक्तृब्राह्मणनिमन्त्रणार्थं न्ययोजयत्। विकटारस्तु तथेति मन्त्रिण आदेशं शिरसा आदाय समयोऽयमस्मत्प्रति-हिंसाया इत्यवधार्य्य तुरगाधिरूढः समन्तात् तादृशं विप्र-मन्विष्यन् प्रान्तरदेशे दीर्घदंष्ट्रनिष्प्रततेजसम् अशीतिवर्षदेशीयं करालकुटिलविरलदशनं भ्रुकुटिकेशनिषेवितपिङ्गलनयनं प्ररूढ-श्मश्रुविकटवदनं पिङ्गलोर्द्ध्वकेशं कुत्सितवेशमतिकुत्सितरूपं कुशोन्मूलनाय तन्मूलेषु माक्षिकप्रक्षेपणव्यग्रकरं कमपि तापस-मद्राक्षीत्। दृष्ट्वा च तं प्रायेणायं महोत्तरोद्योगभागिव लक्ष्यते इत्यवधार्य्य तुरङ्गादवरुह्य प्रणम्य कृताञ्जलिरभाषत भगवन्! के यूयं किमभिधानं श्रीमतां, कथञ्च एतस्मिन् कान्तारदेशे तीक्ष्णसन्तापवति मध्याह्नसमये किमिदमनु-ष्ठीयते, यदि न रहस्यं श्रोतुमिच्छामि। तदाकर्ण्य स तापसः किमनेन कार्य्यप्रतिबन्धिना आलापेनेति वदन् अपि पुनःपुनः तेनोपरुध्यमानः करेण कुशोन्मूलनं कुर्वन् एव अब्रवीत् ब्राह्मणोऽहं विष्णुगुप्तो नाम शिवगुप्ततनयः, एकदा मे तातः स्नातुं भागीरथीतीरं गच्छन् कुशाङ्कुरविद्धचरणस्तज्जनित-क्षतवेदनया एव परलोकमगात्। अत इमे कुशा मच्छत्रव एवेति एतान् उन्मूलयितुं एतन्मूलेषु माक्षिकं प्रक्षिपामि येन तदाकृष्टाभिः पिपीलिकाभिरेतन्मूलपर्य्यन्तध्वंसः कर्त्तव्यः इत्थं क्रमेणाखिलां महीं निष्कुशां करिष्यामि इति सङ्कल्प-वशादेतदनुष्ठीयत इति। विकटारस्तदाकर्ण्य यदि अनेन सह कथमपि राज्ञो विरोधः स्यात् तदा अनेन राजा समूल-मुन्मूलनीय एव, सम्भाव्यते च एतादृशेन कुरूपेण दृष्टेन

एव राज्ञः कोपः। कुपितश्चेनं यथोचितमवमंस्यते तर्हि मम इष्टसिद्धिरवश्यम्भाविनी इति निश्चित्य तमवोचत् ब्रह्मन्! भविता किल श्वः कुसुमपुराधिराजस्य नन्दस्य पैतृकं कृत्यं तद् भवन्तमहं निमन्त्रयामि तत्र भोक्तुम्। अथ तापसः तादृशनिमन्त्रणप्रत्याख्यानमनुचितं मन्वानः किमिदमस्मत्-कार्य्यविघ्नमुत्पादयसि इति विरक्त इव भवतु श्राद्धसमय एव अहं गमिष्यामि, न पूर्वं न वा गमनात् परं क्षणविलम्बमपि सहिष्ये इत्याख्याय विरराम। विकटारस्तु तथेति तं प्रणम्य प्रजविततुरगः कुसुमपुरमगात्। न्यवेदयच्च मन्त्रिराक्षसाय ब्राह्मणो निमन्त्रित इति।

ततश्च निर्द्धारिते दिवसे मध्याह्नसमये सुसज्जितश्राद्ध-वेलायां समागतं विष्णुगुप्तं योग्यासने समुपवेश्य विकटारः परावर्त्तत। राजा तु अन्तःपुरात् कृतनित्यक्रियः समागत्य श्राद्धमण्डपं सहसा तथाविधं विकटाकारं ब्राह्मणं श्राद्धभोक्तु-रासने समुपविष्टमालोक्य सञ्जातरोषः नास्ति किं क्षितितले कश्चित् ब्राह्मणः, येन ईदृशोऽत्रानीतः, अपसार्य्यतामेष विरूपः नाहमेनं श्राद्धभोक्तारं कर्तुमिच्छामि इति उच्चैरभाषत। तदाकर्ण्य विष्णुगुप्तः प्रलयकाल इव क्रोधप्रज्वलितः सहसा आसनादुत्थाय भूमौ पादमाहत्य धिङ्मूर्ख राजापसद! न जानासि माम् अनुभव इदानीमविनयस्य फलम्। शृण्वन्तु सर्वे।

मध्येऽस्मिन्निलये हि सर्वविदुषां मूर्द्धाभिषिक्तस्य मे
यत्रासीदवमानना तदधुना स्तोमं कुशानामिव।
यावन्नन्दकुलं कलङ्कमलिनं नोन्मूलये मूलत-
स्तावच्छ्रीशिवगुप्तलालिततनुर्बध्नामि नाहं शिखाम्॥

इत्यभिधाय अस्ति कश्चिदत्र य एतत्प्राज्यराज्यकामः स-मायातु मया सहेति वदन् राजसदनादुपावर्त्तत। तस्मिंश्च

समये चन्द्रगुप्तो नाम अस्य राज्ञः पितुर्दासीपुत्रः मनसि व्यचिन्तयत् सति नन्दान्वये न कथमपि मम राज्यलाभसम्भवः, कदाचिद् यदि दैवादस्य महातेजसो ब्राह्मणस्य प्रसादादासाद्यते राज्यं तन्महत् प्रयोजनं सेत्स्यति, असिद्धार्थश्चेत् अन्यत्रापि स्थित्वा कथमपि कालं क्षपयिष्यामि, तदनेन सहैव गमन-मुचितं मे इति विचार्य्य तं ब्राह्मणमन्वगात्। भद्रभटपुरुष-दत्तडिङ्गरातबलगुप्तराजसेनभागुरायणरोहिताक्षविजयवर्म्माणश्च तदनुचरास्तमन्वगच्छन्। विष्णुगुप्तस्तैरनुगम्यमानो गङ्गा-मुत्तीर्य्य व्यचिन्तयत्।

उचितमनुचितं वा कुर्वता कार्य्यजातं
परिणतिरवधार्य्या यत्नतः पण्डितेन।
अतिरभसकृतानां कर्म्मणामासमाप्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः॥

कथमेतत् कार्य्यं सेत्स्यति अथवा अलमनया चिन्तया। यतः,

हस्ती स्थूलतरः स चाङ्कुशवशः किं हस्तितुल्योऽङ्कुशः ?
दीपे प्रज्वलिते विनश्यति तमः किं दीपमात्रं तमः ?।
वज्रेणाभिहताः पतन्ति गिरयः किं वज्रतुल्यो गिरिः ?
बुद्धिर्यस्य गरीयसी स बलवान् स्थूलेषु कः प्रत्ययः ?॥
कोऽहं कौ देशकालौ समविषमगुणाः केऽरयः के सपक्षाः
सम्पत्तौ कोऽथ बन्धुः प्रतिहतवचनस्योत्तरं किं नु मे स्यात्।
इत्येवं कार्य्यसिद्धाववहितमनसो नावसाद्या भवन्ति॥

किञ्च सहायबलेनैव सुबुद्धिरपि रामो दशाननं जित्वा तदनुजाय सेवासन्तुष्टो लङ्काराज्यमदादिति सहायान्वेषणं प्रागेव कर्त्तव्यम्। तदिदानीं मन्त्रिराक्षसेन परित्यक्तं पर्वतेश्वरमेव मत्प्रणीतनीतिशास्त्रप्रदर्शनेन स्वायत्तं करोमि, स च राज्यार्द्धलाभप्रोत्साहितो मया अवश्यमेव साहाय्यं

करिष्यति इति विचार्य्य पर्वतेश्वरसकाशमगच्छत्। अस्मिन् एव क्षणे निजसुहृदं विष्णुशर्माणं जीवसिद्धिनामकं क्षपणकवेशं विधाय ज्योतिर्विद्याबलेन अमात्यराक्षसेन सह कृतमैत्रीकं कुसुमपुर एव समीहितसिद्धये प्राहिणोत् न्ययोजयच्च सिद्धार्थकं नाम पुरुषं शकटदासेन कृताकृत्रिममैत्रं तदन्तिक एव स्थातुम्। स्वयञ्च पर्वतेश्वरं राज्यार्द्धं दास्यामि इति प्रलोभ्य तदीयवसुसमुदायपरिवृतः कुसुमपुरमुपरोद्धुमुदचलत्। तस्मिंश्च अवसरे भागुरायणो विष्णुगुप्तेन मन्त्रितो मलयकेतुना पर्वतेश्वरपुत्रेण मैत्रीमकरोत्। भद्रभटादयश्च मलयकेतोः कुमारसेवकेन शिखरसेनेन कृतमैत्रीका आसन्।

ततश्च चाणक्यमतिपरिगृहीतशकयवनकिरातकाम्बोजपारसीकप्रभृतिप्रबलतरसैन्यसमन्वित-पर्वतेश्वर-सैन्य-परिवृत-चन्द्रगुप्तेन सहसोपरुद्धं कुसुमपुरमवलोक्य राजा समयोऽयमस्मत्करकलितकरबालस्य इति विचिन्त्य पितृव्यपुत्रं सर्वार्थसिद्धिं मन्त्रिराक्षसञ्च दुर्गरक्षणाय नियुज्य भ्रातृगणैः सैनिकैश्च परिवृतः शत्रुसैन्यं विवेश। महति च तस्मिन् सम्पराये प्रवर्त्तमाने राजा सानुजः क्रमेण शस्त्रनिहतः क्षितितलशायी अभवत्। चन्द्रगुप्तश्च जयध्वनिसम्प्रहृष्टः कुसुमपुरमतितरां रुरोध। ततश्च सर्वार्थसिद्धिस्तादृशोपरोधेन पौरजनदुःखातिरेकं सोढुमशक्नुवन् स्वकुलक्षयञ्च चिन्तयन् निर्विसहृदयः केनापि मार्गेण निशीथे तपोवनाय पलायाञ्चक्रे। मन्त्रिराक्षसस्तु चन्द्रगुप्तद्वेषात् स्वामिवंशनाशाच्च नितरां व्यथितः सुहृदि चन्दनदासे पुत्रकलत्रादिकं न्यासीकृत्य सुरङ्गया कथञ्चित् नगरान्निःसृत्य सर्वराज्यप्रदानप्रतिज्ञया पर्वतेश्वरेण सन्धाय चन्द्रगुप्तविनाशार्थं विषकन्यकां निर्माय जीवसिद्धिक्षपणक हस्तेन चन्द्रगुप्तसकाशं प्राहिणोत्। ततश्चाणक्यः क्षपणकात् विषकन्यामादाय अनया कन्यया

विलासी पर्वतेश्वर एव प्रथमं तोषणीय इति चन्द्रगुप्तमाभाष्य तां तस्मै प्रादात्। तत्सम्भोगेन च गतप्राणं पर्वतेश्वरं दृष्ट्वा प्रतिश्रुतार्द्धराज्यदानभीत्या चाणक्येन ते पिता घातित त्वामपि समये को वेद किं करिष्यति इति रहसि त्रासयित्वा भागुरायणेनापवाहितो मलयकेतुः पर्वतेश्वरपुत्रः। ततश्च बहुभिरुपायैश्चन्द्रगुप्ताय राज्यं दत्त्वा तत् स्थिरीकरणाय मन्त्रिराक्षसमुपसंग्रहीतुं तथा घटनां कर्तुमुपक्रान्तवान् चाणक्यः इति।

अन्यविधा च आख्यायिका।

आसन् नन्दा नाम केचिद् भूमिपतयः। तेषु ज्येष्ठ उग्रधन्वाख्यो नन्दो महीमशासत्। वक्रनासादयः कुलामात्यास्तस्यासन् तेषु राक्षसो नाम भूसुरो विख्यातपौरुषो दण्डनीतिप्रवीणः षाड्गुण्यप्रविभागवित् शुचिः शूरवरो नन्दैर्मान्यो राज्यधुरामावहत्। अस्य राज्ञः ज्येष्ठा महिषी सुनन्दा नामासीत्। मुरानाम्नी वृषली तु शीललावण्यसम्पदा प्रिया अभवत्। एकदा नृपतिस्तपोधनमेकं गृहमागतं सभार्य्यः समुपाचरत् भक्तिनम्रः। नृपतिस्तस्य पूजितस्य अतिथेः तापसस्य पादोदकविन्दुभिः पत्नी उक्षाम्बभूव। तेषाञ्च पादोदकविन्दूनां नव ज्येष्ठाया महिष्याः शिरसि अपतत् कनिष्ठायास्तु मुरायाः शिरसि एकः। सा च तं विन्दुं सादरं भक्तिप्रवणा अग्रहीत् तस्याश्च तादृशीं भक्तिमवलोक्य तापसोऽतितरां प्रससाद। तत् प्रसादात् च सा मौर्य्याख्यं गुणवत्तरं सुतमसूत। सुनन्दा तु बहुगर्भयुक्तां मांसपेशीं प्रसूतवती। अस्याश्च स्थितान् नवसंख्यकान् गर्भान् राक्षसस्तैलद्रोणीषु निक्षिप्य यत्नेन अपुषत्। ततस्ते क्रमेण परिवर्द्धमाना नव वीरा अभवन् पित्रा च स्वेनैव नाम्ना नन्दा इति व्यपदिष्टाश्च।

वृद्धो महीपतिस्तेषु नवसु राज्यं समासज्य महामतिं मौर्य्यञ्च सेनापत्ये नियुज्य देवत्वमगात्। मौर्य्यस्य तु चन्द्रगुप्तप्रमुखाः शतं सुता आसन्। ते च नन्दा दुरात्मानः सेर्ष्यास्तं सपुत्रम् अन्तर्भूमिगृहमवासयन्।

एकदा सिंहलेश्वरः पञ्जरबद्धं मधूच्छिष्टमयं सिंहमेकं जीवन्तमिव विधाय यो द्रावयेदिमं क्रूरं सत्त्वं पञ्जरस्थमेव अपि तादृशः कोऽपि सुमतिर्युष्माकमस्ति इति सन्दिश्य नन्देभ्यः प्राहिणोत्। तेषु च किंकर्त्तव्यविमूढेषु स्थितेषु मेधावी चन्द्रगुप्त एव प्रतप्तायःशलाकया तं पञ्जरस्थमेव व्यलापयत्। ततश्च सर्वे तस्य तादृशं बुद्धिकौशलं प्रेक्ष्य विस्मितास्तं जिघांसितमपि नन्दा अन्तर्भूमिगृहात् उत्तारयामासुः। नासहन्त तमाजानुलम्बिबाहुं राजलक्षणयुतम् औदार्य्यशौर्य्यगाम्भीर्य्यवन्तं विनीतं चन्द्रगुप्तम्। न्ययोजयन्त च दैवपैतृके कर्मणि। स तु कथमपि कालं प्रतीक्षमाणः तेषामपचिकीर्षया कञ्चिदतिकोपनं कुशोन्मूलनार्थं कृतोद्यमं विष्णुगुप्तनामानं चणकनन्दनं दण्डनीतिविशारदं विप्रं शरणमयासीत्। अभवच्च गुणातिशयादस्य अतिप्रियः। स तु एकदा नन्दानां पैतृके कृत्ये निमन्त्रितः कुरूपतया तैरवमानितोऽग्रासनाच्च प्रावितश्च क्रोधात् पाणिना शिखामुन्मुच्य नन्दवंशदिधक्षया तीव्रान् एतान् दर्पान्धान् नन्दान् अनुन्मूल्य नाहं शिखां बध्नामि इति प्रतिज्ञामारुह्य शरणागतं चन्द्रगुप्तं तुभ्यमहं राज्यमेतद्दास्यामि इति समाश्वास्य पुरान्निर्ययौ। चन्द्रगुप्तश्च स्वनिग्रहभयाकुलः सद्य एव नगरान्निर्गत्य तं कौटिल्यमुपाश्रयत्। स च चन्द्रगुप्तमादाय विष्णुशर्माणं स्वमित्रं क्षपणकवेशं विधाय तेनैवोपायेन राक्षसादीनमात्यान् वञ्चयन् नन्दराज्यार्द्धप्रदानपणेन महाबलं म्लेच्छराजसहितं पर्वतेश्वरं समुत्थाप्य कुसुमपुरमवा-

कृणत्। नन्दाः सर्वे राक्षसमतिपरिगृहीताः युद्धायैव सुसंरब्धाः क्रमेण घोरे सम्प्रहारे चन्द्रगुप्तबलैर्निहताः। राक्षसस्तु तथाविधस्वामिवंशविनाशजनितरोषच्छद्मना चन्द्रगुप्तं हन्तुं विविधानुपायानकरोत्। सर्वार्थसिद्धिर्नाम नन्दानां पितृव्यतनयस्तादृशं पौराणामुपरि वर्त्तमानमवरोधदुःखमसहमानः शर्वर्य्यां सुरङ्गया अपसृत्य वनमभ्यगात्।

अथ मन्त्रिराक्षसः स्वपुत्रकलत्रं सुहृत्तमे चन्दनदासे न्यस्य सुरङ्गया अपसृत्य चन्द्रगुप्तनिधनाय क्षपणकद्वारेण विषकन्यां प्राहिणोत्। चाणक्यस्तु कूटमतिः तयैव विषकन्यया अर्द्धराज्यहर्त्तारं पर्वतेश्वरं विनाश्य स्वानुचरैर्भागुरायणादिभिर्भीषयित्वा पुरात् पर्वतेश्वरपुत्रं निरकाशयत्। राक्षसस्तु पुनरराजकं नन्दानुरक्तपौराढ्यं कुसुमपुरं प्रविशन्तं चन्द्रगुप्तं हन्तुं रहसि सुहृदो दारुवर्मादीन् कूटयन्त्रादियोजनाय व्यवस्थापयत्। कौटिल्यस्तु स्वबुद्ध्या सर्वं तत् रिपुकल्पितमवबुध्य तत्तत् कूटयन्त्रादिभिः राक्षसपक्षीयान् एव तान् पर्वतेश्वर भ्रातरञ्च वैरोधकं पर्वतेश्वरवधोत्पन्नस्वायशसः क्षालनार्थम् अर्द्धराज्यदानप्रलोभितं घातयामास। सर्वार्थसिद्धिञ्च तपोवनस्थितं चारेण निहत्य चन्द्रगुप्तं नन्दराज्ये अभ्यषेचयत्। ततो राक्षसः किंकर्त्तव्यविमूढ़ः शोचन् मलयकेतुं पर्वतकपुत्रम् अभ्येत्य प्रोत्साहयन्नब्रवीत् राजपुत्र! अहम् आरूढ़मूलं मौर्य्यं द्राक् निपात्य स्वामिनां स्वर्गवासिनामानृण्यं गमिष्यामि, सर्वे पौरा अस्मत्पक्षीया जाग्रति तत् सर्वप्रयत्नेन तव हितार्थं यतिष्ये, सकौटिल्यं चन्द्रगुप्तं हत्वा तुभ्यं राज्यं दास्यामि एव। मौर्य्यराज्यार्द्धहारी ते पिता चाणक्येन विषकन्यया घातितः तस्मात् सर्वथा नृशंसमेनं येन केनापि प्रकारेण जहि, त्वयि सर्वं राज्यं समासज्य स्वामिकुलानामानृण्यं लप्स्ये। इत्थं मलयकेतुं प्रोत्साह्य सोऽमात्यवर्य्यः विविधानुपायान् शत्रुजयाय अकल्पयत् परं दैवप्रातिकूल्यात् सर्व एव तत्प्रयासो विफलो जातः परिशेषे तु स्वयमेव शत्रुवश्योऽभवत्।

इति समाप्ता।

संस्कृतशिक्षामञ्जर्य्याः

चतुर्थभागः ।

पण्डितकुलपतिना
वि, ए, उपाधिधारिणा
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण सङ्कलितः ।
तदात्मजाभ्यां
पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-
विद्यारत्नाभ्यां संस्कृत्य प्रकाशितः ।

द्वितीयसंस्करणम् ।

कलिकातामहानगर्य्याम्
वाचस्पत्ययन्त्रे
मुद्रितः ।

इं १९१८ ।

 मूल्यं मुद्रापादः ।

संस्कृतशिक्षामञ्जर्य्याः

चतुर्थभागः ।

पण्डितकुलपतिना

बि, ए, उपाधिधारिणा

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण सङ्कलितः ।

तदात्मजाभ्यां

पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-

विद्यारत्नाभ्यां संस्कृत्य प्रकाशितः ।

द्वितीयसंस्करणम् ।

कलिकातामहानगर्य्याम्

वाचस्पत्ययन्त्रे

मुद्रितः ।

इं १९१८ ।

मूल्यं मुद्रापादः ।

संक्षिप्तश्रीहर्षचरितम् ।

प्रथम उच्छ्वासः ।

यत्प्रभावात् सतो विद्या साधूनां भासते हृदि ।
तां विश्ववन्द्यां परमां वाग्देवीं प्रणमाम्यहम् ॥
बाणभट्टकृतं गद्यं संक्षिप्य क्रियते मया ।
संक्षिप्तहर्षचरितं श्रीजीवानन्दशर्म्मणा ॥

पुरा किल भगवान् विश्वपतिः परमेष्ठी इन्द्रादिभिः देववृन्दैः महर्षिभिश्च सह संलपन् स्वं लोकम् अधितष्ठौ । तत्र महर्षिषु वेदान् पठत्सु कदाचित् अतिकोपनो मुनिः दुर्वासाः द्वितीयेन सहचरेण मन्दपालनाम्ना मुनिना सह विरोधम् आचरन् क्रोधात् विस्वरं साम जगौ । तत् आकर्ण्य शापभयात् अन्येषु दोषम् अकथयत्सु देवेषु मुनिषु च, अवधीरयति च अन्यासङ्गव्याजेन देवे पद्मसम्भवे, भगवती कुमारी तत्र चामरेण पितामहम् उपवीजयन्ती वाग्देवी मृदुमन्दम् अहसत् । स च मुनिः तां तथा हसन्तीम् अवलोक्य "रे पापे ! दुर्व्वाससं माम् उपहससि ?" इत्युक्त्वा कमण्डलुजलेन उपस्पृश्य शप्तुं प्रचक्रमे । अत्रान्तरे तत्र स्थिता देवी सावित्री तर्जनीम् उत्क्षिप्य "आः पाप ! दुर्विनीत ! ब्राह्मणापसद ! सुरासुरवन्द्यां देवीं सरस्वतीं शप्तुमिच्छसि ?" इत्यभिदधाना क्रोधात् स्वासनात् उदतिष्ठत् । ततो देवैः स्वशिष्यैश्च शतशः प्रसाद्यमानोऽपि, पित्रा अत्रिणा "पुत्र ! मा तपःक्षयं कुरु, स्खलितम् अस्या एकं क्षमस्व" इति निषिध्यमानोऽपि दुर्व्वासाः "दुःशीले ! मत्त्व-

भूमिं गच्छ” इति तां शशाप। ततश्च प्रतिशापोद्यतां सावित्रीं देवी वाग्देवी एव “सखि! संहर कोपं, खत एव द्विजन्मानो माननीयाः” इत्युक्त्वा न्यवारयत्।

अथ तां सरस्वतीम् अभिशप्ताम् आलोक्य विरिञ्चिः धीरेण स्वरेण उवाच,—“ऋषे! नायं सज्जनाचरितः पन्थाः येन प्रवृत्तोऽसि, क्षमा हि तपसां मूलं, क्रोधेन बुद्धिः विक्रियते, विकृतबुद्धयश्च अन्धा इव हिताहितं न पश्यन्ति, तस्मात् क्रोधम् अपहाय चरितव्यं विशेषतः तापसैः” इत्युक्त्वा अब्रवीत्,—“वत्से सरस्वति! मा विषाद, भवितव्यता अत्र बलवती, एषा त्वाम् अनुचरिष्यति सावित्री, विनोदयिष्यति च अस्मद्विरहिताम्। शापश्च अयं सुताऽऽननकमलाऽऽलोकनावसानः” इति। एवं सान्त्विता पितामहेन सा सह सावित्र्या विषण्णा गृहम् आजगाम।

अथ प्रदोषे सावित्री विषादसागरपतितां सबाष्पां सरस्वतीम् आह,—“सखि! त्वं हि त्रिलोकशिक्षादायिनी, तव पुरतः किमहं ब्रवीमि? विदितवृत्तान्ताऽसि दैवहतकस्य। यत् सत्यं दुःसहो बन्धुजनविरहः तापयतितराम्। तदत्र अप्रतिविधेये किं कर्त्तुम् अर्हसि? नात्र अनुशोचितव्यम्; कथय, इदानीं कतमं भूतलविभागमलङ्कर्त्तुम् इच्छसि अवस्थानेन? इतःप्रभृति एव देवदेवं स्वेष्टदातारं मनसा स्मर, अचिरेण एव कालेन गतशापा पुनः स्वधाम प्रतिपत्स्यसे” इति।

तथा अभिहिता सा प्रत्यब्रवीत्,—“सखि! त्वया सह वसन्त्या न मे स्वस्थानभ्रंशः मर्त्त्यलोकवासदुःखं वा अतिपीड़ाम् आवहति, केवलं पद्मयोनिचरणसेवनसुखं विगलयति मे चित्तम्; तत् त्वमेव मर्त्त्यभूमौ धर्मक्षेत्राणि पुण्यतीर्थानि जानासि, यदेव स्थानं तुभ्यं रोचते, तत्रैव वत्स्यामि” इत्युक्त्वा निमीलितनेत्रैव रजनीम अगमयत।

अथ अपरेद्युः उदिते भगवति सवितरि मुनिशापसमुद्दिग्ना सावित्र्या सह महीतलम् अवततार। अवतीर्य्य च भूतले उपशोणं तत्तीरदेशस्य रामणीयकेन आकृष्टहृदया तत्रैव वासम् अरोचत ; अवदत् च सावित्रीं,—"सखि! रोचते मे तटभुः अस्य महानदस्य, तदत्र एव स्थातुम् अभिलषति हृदयम्"इति। सावित्री च तथा अनुमोदमाना तस्य नदस्य पश्चिमे तीरे कस्मिंश्चित् शुचौ शिलातलसनाथे लतामण्डपे सरस्वतीम् अवासयत्।

अथ कदाचित् तत्र स्थिता प्रतिदिवसम् इष्टदेवम् आराधयन्ती, प्रहरमात्रोदिते सवितरि उत्तरस्यां दिशि अश्वक्रेषितम् आकर्ण्य लतामण्डपात् निर्गत्य, सहस्रमात्रेण पदातिसैनिकेन सह आगच्छत् अश्वसैनिकं, मध्ये च तस्य निरुपमं विधातुः सर्गमिव अष्टादशवर्षदेशीयं तरुणं, तत्पार्श्वे च स्थविरमेकम् असिचर्म्मधरं पुरुषम् अद्राक्षीत्। स च युवा अग्रयायिनां, तत् कन्यायुगलम् अवलोकयतां पदातीनां मुखात् श्रुत्वा तत् दिव्याकृति कन्यारत्नयुगलं सञ्जातकौतुकः स्वयं दिदृक्षुः तूर्णजवेन वाजिना तत्प्रदेशम् आययौ ; अवततार च तुरगात् तेन द्वितीयेन परिणतवयसा सह पुरुषेण। ततश्च तौ चरणाभ्यामेव सविनयं तत् लतामण्डपम् आगतौ सह सावित्र्या सरस्वत्या वनवासोचितेन आतिथ्येन यथार्हम् उपचरितौ। अथ क्षणमिव विश्रान्तं तं द्वितीयं प्रथमं सावित्री ईषद्व्रीडितेव सविनयम् अवादीत्,—"आर्य्य! कुत आगम्यते? क्व वा गमिष्यते समेन्याभ्यां भवद्भ्याम्? अद्य आश्रमोऽयमागमनेन भवतोश्चरितार्थ इव संवृत्तः, न चेत् रहस्यं दोषो वा, तदाख्यातुम् अर्हति भवान्, कोऽयं महाभागः? त्रिभुवनरमणीयं रूपम् इदम् अवलोक्य मर्त्यभूमिः स्वर्गातिशायिताम् इव पश्यामि" इति।

इत्थम् अभिहितोऽसौ पुरुषः सप्रश्रयम् अवादीत्,—"देवि! साधवः स्वतः प्रियंवदा भवन्ति, तन्न अतिविस्मयाय इदं भवद्वचनामृतम्। शृणोतु भवती,—अयं हि भृगुकुलतिलकस्य भगवतः च्यवनस्य बहिर्जीवितं दधीचो नाम कुमारः। माता च अस्य शर्य्यातस्य नृपतेः कन्या त्रिभुवनललामभूता सुकन्या नाम। स च राजर्षिः दौहित्रम् इमम् अतिप्रियम् अस्य पितुः अनुमत्या स्वगृह एव लालितवान्, अशिक्षयच्च सर्व्वाः विद्याः सकलाश्च कलाः। सोऽपि अस्य नरपतेः आज्ञाकरं जानीहि विकुक्षिनामानम्।

अथ प्राप्ते सर्व्वविद्याऽधिगमे मातामहः शर्य्यातिः अस्य पितुः आश्रमम् एनं कृतविद्यं प्रदर्शयिष्यन् महितायं महाश्ववृन्दैः सपदातिभिश्च प्राहिणोत्। इतश्च न अतिदूरे उपशोणं तस्य भगवतः च्यवनस्य आश्रमपदं च्यावनं नाम काननम्। एष तावत् अस्मद्वृत्तान्तः। साम्प्रतं शुश्रूषवो वयम् आयुष्मत्योः वृत्तं, न इयमाकृतिः कदाचित् मानवी भवितुमर्हति; तत् आवेदयतु भवती, परं कौतुकम् अत्र नो वर्त्तते" इति।

सा अब्रवीत्,—"भद्र! श्रोतव्यमावयोः वृत्तं कालेन। बहून् दिवसान् अत्र आवां स्थास्यावः। न च विस्मर्त्तव्योऽयम् अस्मत्परिचय आर्य्येण" इति। दधीचस्तु धीरमधुरम् अवादीत्,—"आर्य्ये! करिष्यति एव आर्य्या नौ प्रसादं, तिष्ठतु तावत् अधुना, तातमेव शीघ्रं द्रष्टुम् अभिलषति मे मनः, तत् उत्तिष्ठ, व्रजावः" इति।

अथ सरस्वती अश्वमारूढं प्रयान्तं तं युवानं प्रति अनिमिषनयना यावन्नात्येति दृष्टिपथात्, तावद् व्यलोकयत्। क्रमेण च शोणम् उत्तीर्य्य दधीचः पितुः आश्रमम् अवाप; उवास च कियतो दिवसान् पित्राऽऽनन्दितः तस्मिन् कानने।

अथ सरस्वती तं युवानम् आलोक्य कुसुमशरशरविद्धा अभवत्। अथ अपरेद्युः च्यवनाश्रमात् तं देशमागत्य कृतासन-परिग्रहं दधीचसहचरं विकुक्षिं दृष्ट्वा प्रीत्या पप्रच्छ सावित्री,— "आर्य्य! कुशली तावत् कुमारः दधीचः?" इति। सोऽवदत्,— "देवि! कुशली कुमारः, स्मरति च आयुष्मत्योः अमीषु दिवसेषु। वृत्तान्तञ्च कुमारस्य समाख्यातुं मालती नाम काचित् किङ्करी अचिरेण एव आगमिष्यति युवयोः सकाशम्" इति। इत्युक्त्वा यथाऽभिलषितं प्रदेशम् अयासीत् विकुक्षिः। ततः परेद्युः एव मालती दधीचवार्त्तां समादाय तयोः आश्रमम् अभ्याययौ।

अथ शोणम् अवतीर्णायां सावित्र्यां स्नातुं, रहसि मालती सरस्वतीम् अवोचत्,—"देवि! विदितमेव भवत्याः माधुर्य्यं विषयस्य, लोलुपता च इन्द्रियाणाम्। किमुच्यते? लज्जेऽहं वक्तुं, तथाऽपि स्वामिनिदेशोऽपरिहरणीय इति विवक्षा मां बाधते। तत् आकर्णयतु भवती, यदा एव दृष्टाऽसि कुमारेण, तत एव आरभ्य आधयः किमिव तं न व्यथयन्ति? न अकार्य्यमस्ति कुसुमायुधस्य, किमधिकेन विज्ञापनेन, यदि न अनुकम्पसे, तदा अनिष्टमपि घोरम् आपतिष्यति कुमारस्य इति हृदयमाशङ्कते; तत् अधुना अनुरूपोऽयं देव्या वर इति मात्रम् आवेदयामि, इति श्रुत्वा देवी प्रमाणम्" इत्युक्त्वा व्यरंसीत्। सरस्वती तु अब्रवीत्,—"अयि मालति! किमत्र प्रतिवच्मि? नात्र बहु भाषितुम् अवसरोऽस्ति मे, तदिदानीं ते वचनकारी अयम् जनः अनुकम्प्यतां कुमारसमागमेन" इति। ततश्च मालती प्रीता दधीचम् आनेतुं च्यवनाश्रमम् अगात्। सावित्री च स्नातागता विदितवृत्तान्ता हृष्टा आसीत्।

अथ आगत्य दधीचः मालतीवचनैर्नन्दितः तम् आश्रमं तया मनोरमया रमण्या सह सङ्गतः यथासुखम् अधिकं संवत्सरकालम्

एकं दिवसम् इव रममाणाऽतिवाहयाञ्चकार। दधार च गर्भं सरस्वती, असूत च सर्व्वलक्षणसम्पन्नं कुमारम्। ततश्च तस्मै सर्व्वं सरस्वत्याः वेदाः साङ्गोपाङ्गाः, सर्व्वाणि च अन्यानि शास्त्राणि, सर्व्वाश्च कलाः स्वयम् आविर्भविष्यन्ति इति वरं दत्त्वा सह सावित्र्या गतशापा ब्रह्मलोकं प्रत्याजगाम। तस्याञ्च गतायां दधीचः तद्विरहकातरः स्वतनयस्य संवर्द्धनाय भार्गववंश-समुत्पन्नस्य भ्रातुः ब्राह्मणस्य पत्नीम् अक्षमालां नाम नियुज्य, जातवैराग्यः तपश्चरणाय वनम् अगात्। यस्मिन् एव दिने सरस्वती प्रसूतवती, तस्मिन्नेव दिने अक्षमालाऽपि तनयमेकं प्रासोष्ट। सा तु अक्षमाला तौ अभिनवजातौ कुमारौ निर्व्विशेषं सम्पुपोष। तयोः एकः सारस्वतो नाम, द्वितीयो वत्सनामा आसीत्। द्वौ एव सोदरौ इव परस्परम् अकृत्रिमसद्भावौ तौ एकत्र ऊषतुः।

अथ गच्छता कालेन सारस्वतः मातृवरप्रभावेण यौवनारम्भ एव सर्व्वविद्यापारगः तस्मिन् समवयसि प्रियतमे भ्रातरि वत्से सर्व्वं वाङ्मयं सङ्क्रामयामास; स्थापयामास च तं कृतदार-परिग्रहं तत्रैव प्रदेशे प्रीतिकूटाभिधाने नगरे। स्वयन्तु नैष्ठिक-ब्रह्मचर्य्यपरः तपस्यतः पितुः अन्तिकम् अगमत्।

एतस्माच्च वत्सात् प्रादुरभवत् महत्तरो वंशः। तथा च, प्राक् तस्मात् एव वंशात् वात्स्यायना नाम गृहधर्म्मिणो मुनयः समजायन्त। क्रमेण कलौ सम्प्रवृत्ते अस्मिन्नेव विश्रुते कुले कुबेरो नाम कश्चित् द्विजः समुद्बभौ; तस्य चत्वारः सुता आसन् अच्युतः, ईशानः, हरः, पाशुपतश्च इति। तस्माच्च पाशुपतात् एक एव कुमारो जज्ञे अर्थपतिर्नाम। तस्य च एकादशसूनवः समभवन्,— भृगुः, हंसः, शुचिः, कविः, महीदत्तः, धर्म्मः, जातवेदाः, चित्रभानुः, त्र्यक्षः, अहिदत्तः, विश्वरूपश्चेति। चित्रभानुश्च तेषां राजदेव्याख्यायां पत्न्यां बाणं नाम सुतम् अजीजनत्। स तु

बाणः शैशव एव मातृहीनः चतुर्दशवर्षदेशीयश्च पित्रा व्ययुज्यत। ततश्च पितृशोकेन दग्धहृदयः, कथमपि कालेन विरलतां गते च शोके, चापलतया यौवनारम्भस्य सर्व्वदोषाकरतया च स्वातन्त्र्यास्य अनेकानि चापलानि आचरन् तुल्यशीलवयोभिः बहुभिः सुहृद्भिः सह देशान्तरदर्शनाकृष्टचेताः देशात् देशान्तरं गच्छन्, अलभत सतां निन्दनीयताम्। अथ शनैः शनैः राजकुलानि पश्यन्, विद्यालाभार्थं गुरुगृहाणि अधितिष्ठन्, महृदयगोष्ठीश्च निषेवमाणः बुधमण्डलानि च उपचरन् भूयोऽपि स्वकुलोचितां वैदुषीं प्रकृतिं प्रापत्। एवञ्च सुबहोः कालात् ताम् एव जन्मभूमिं पुनरागात्।

द्वितीय उच्छ्वासः।

एकदा निदाघेऽतीवोग्रे काले चन्द्रसेननामा कश्चिदस्य पारशवः भ्राता स्वगृहास्थितं तम् आगत्य अब्रवीत्,—"आर्य्य! द्वारि स्थितो दीर्घाध्वगो भवताम् अन्तिकं श्रीहर्षदेवस्य महाराजाधिराजस्य कृष्णाभिधानेन भ्रात्रा प्रेषितः कश्चित्" इति। बाणोऽवदत्,—"भ्रातः! अविलम्बेन एव प्रवेशयैनम्" इति। ततश्च प्रविशन्तं लेखहारकं दृष्ट्वा अभ्यभाषत,—"भद्र! कुशलमत्रभवतः कृष्णस्य सत्प्रियबन्धोः?" स तु "कुशलम्" इत्युक्त्वा "लेख एष स्वामिना प्रहितः" इत्यर्पयामास। बाणस्तु सादरं लेखमादाय स्वयमेव वाचयित्वा विदितलेखार्थः सन्देशमपृच्छत्। मेखलको नामासौ लेखहरः प्रत्यवादीत्,—"ब्रह्मन्! एवमाह अस्मत्स्वामी,—'यत् अदृष्टे त्वयि विना कारणं किमपि आशङ्कते मे स्निग्धं हृदयं, तद्भवता अकृतकालक्षेपेण एव राजकुलम् आगन्तव्यम्' इति"। अथ बाणः तं लेखहरं "विश्रामय" इति

भ्रातरं चन्द्रसेनम् आदिश्य कथमपि तद्दृहः समुत्सुकः एव अत्यवाहयत्।

अथ अन्येद्युः प्रातः स्नात्वा कृतदेवार्च्चनः तस्मात् प्रीतिकूटात् निर्गत्य सद्य एव मल्लकूटाख्यं ग्राममाससाद। तत्र सुहृदा जगत्पतिनामधेयेन कृतातिथ्यः सुखोषितः परेद्युः यष्टिगृहकनामानं वनग्रामं गत्वा निशामयापयत्। ततोऽपरस्मिन् दिने राजभवनसन्निधौ विश्रान्तः मेखलकेन तेन सह अपराह्णसमये राजद्वारं प्राप। मेखलकस्तु "तिष्ठतु तावत् क्षणमात्रम् अत्र भवान्" इत्यभिधाय एक एव पुरमविशत्। क्षणेन च पुनः निर्गच्छता तेन सह समागतः पारियात्राख्यः प्रतीहारः मधुरवाचा सविनयम् अभ्यभाषत,—"ब्रह्मन्! आगच्छतु, प्रविशतु च अभ्यन्तरं भवान्, दर्शनाय कृतप्रतीक्षो देवः प्रसादेन" इति।

बाणस्तु "कृतार्थोऽस्मि" इत्यभिधाय पुरं प्रविशन् प्रथममेव दर्पशातनामानं गजेन्द्रम् आलोक्य विस्मयाकृष्टचेताः क्षणं तदवलोकनकौतुकी समतिष्ठत। ततश्च "पुनरपि समये एनं द्रक्ष्यसि, साम्प्रतं प्रतीक्षमाणं देवं तावत् पश्य" इत्यभिधीयमानो दौवारिकेण, समतिक्रम्य कक्ष्यान्तराणि त्रीणि, चतुर्थे आस्थानमण्डपस्य पुरतः चत्वरे राजभिः परिवृतम्, अमात्यैश्च समुपास्यमानं, दर्शनीयतमं, राजाधिराजं हर्षदेवं पश्यन् समुपेत्य कृताशीर्व्वादः स्वस्तिशब्दम् अकरोत्। राजा तु तं दृष्ट्वा गम्भीरेण स्वरेण "किम् अयं स बाणः?" इति अभ्यधात्। दौवारिकेण तु "देव! स एव अयम्" इति निवेदितः "न तावदेनम् अकृतस्वशुद्धिं पश्यामि" इति चक्षुषी प्रत्यावर्त्तयन्, पृष्ठतो निषण्णस्य अतिप्रियस्य मालवेन्द्रसूनोः अवदत्,—"महान् अयं विटः" इति। एतत् आकर्ण्य सर्व्वस्मिन् एव राजलोके निःशब्दे मुहूर्त्तम् इव तूष्णीं स्थितो बाणः समभ्यधात्,—"देव!

अविदिततत्त्व इव अज्ञातलोकवृत्त इव कथमेवम् आज्ञापयसि ? संसारेऽस्मिन् विचित्रमेव लोकानां चरितं, स्वभावश्च। तत् अत्र साधुभिः यथार्थदर्शिभिः एव भाव्यम्। विचारे यदि अत्र दोषो इति प्रमीयते, तदा एव माम् अधिक्षेप्तुमर्हति महाभागः। न तु अकारणं माम् अन्यथा सम्भावयतु देवः। ब्राह्मणोऽस्मि, महति वात्स्यायने कुले जातः। मया साङ्गा वेदाः सम्यक् पठिताः, अन्यानि शास्त्राणि यथाशक्ति समालोचितानि। तत्कथं मम विटत्वम् अवधार्य्यते देवेन ? सर्व्वथा समयेन मां यादृशं यथाऽहञ्च ज्ञास्यति महाराजः स्वयमेव" इति। अथ नरपतिः "एवम् अस्माभिः श्रुतम्" इति अभिदधानः समुचितसमादरादिना वाङ्गेन एनम् अभ्यनन्दत्, केवलं सस्नेहेन दृष्टिपातेन एव प्रीतिं प्रकटयन् विसर्ज्जितराजलोकोऽभ्यन्तरमेव प्राविशत्।

अनन्तरं भूपतेः तादृशेन आचरणेन व्यथितो बाणः तस्मात् राजभवनात् निर्गत्य तावत् बान्धवानां भवनेषु विमना एव अतिष्ठत्, यावत् अस्य कृतप्रसादो महीपतिः एनम् अभिनन्दन् स्वयं न आह्वयत्। अथ कालेन नरेन्द्रेण तथा अस्य प्रसादः कृतः, यथा असौ राजभवने स्थितो देवस्य हर्षवर्द्धनस्य परमप्रसादस्पदम् अतीव विश्रम्भभाजनं मित्रत्वम् आसाद्य परं सुखमन्वभवत्।

तृतीय उच्छ्वासः।

अथ एकदा शरदारम्भे बाणो हर्षसकाशात् बन्धून् द्रष्टुं तमेव ब्राह्मणनिवासम् आजगाम। तत्रागत्य सुदृष्टिः नाम पुस्तकवाचकः श्रोतृचित्तं समाकर्षन् पुराणम् अपठत्। तदा-

तोऽत्र नातिदूरवर्त्ती बन्दी सूचीबाणः तारमधुरेण स्वरेण इदम् आर्य्यायुगलं पठितवान्,—

"तदपि मुनिर्गीतमतिपृथ् तदपि जगद्व्यापि पावनं तदपि।
हर्षचरितादभिन्नं प्रतिभाति हि मे पुराणमिदम्॥ १॥
वंशानुगमविवादि स्फुटकरणं भरतमार्गभजनगुरु।
श्रीकण्ठविनिर्यातं गीतमिदं हर्षराज्यमिव" ॥ २॥

एतत् आकर्ण्य बाणस्य चत्वारः पितृव्यपुत्राः परस्परं मुखम् अवलोकयामासुः। तेषु सर्व्वकनीयांश्च श्यामलो नाम प्रियतरः सप्रणयम् अवादीत्,—"भ्रातः! यदि एवं, तदा भवता वर्ण्यमानस्य अस्य पवित्रकीर्त्तेः चक्रवर्त्तिनो हर्षदेवस्य पूर्व्व-वंशानुक्रमसहितम् आमूलात् चरितस्य श्रवणे सकौतुका वयम्; तच्च द्वितीयं महाभारतमिव कस्य कीर्त्त्यमानं न आवहति प्रीतिम्? तदाख्यातु भवान्" इति। तदाकर्ण्य विहस्य बाणोऽब्रवीत्,—"आर्य्य! न युक्तम् उक्तं भवता; यतः को हि पुरुषायुषशतेनापि समग्रम् अस्य चरितम् आख्यातुं शक्नुयात्? कियति अपि वर्णिते यदि वः कौतुकं, तत् कथयामि; अद्य प्रायेण अतिक्रान्तो दिवसः, तत् परश्वः आरप्स्यते वर्णयितुम्" इति। ते च सर्व्वे भ्रातरः तथा एव अन्वमोदन्त।

अथ परस्मिन् अहनि सर्व्वे बाणस्य ज्ञातयः सुहृदश्च सकौतुकाः समागमन्। स चापि बाणः तेषां पुरतः हर्ष-चरितम् आख्यातुम् उपचक्रमे।—

"अस्ति श्रीकण्ठो नाम पुण्यवतां निवासोऽपरो वासवावास इव वसुधाङ्गतः कश्चित् जनपदः; वर्त्तते च तत्र स्थाण्वीश्वराख्यो नगरविशेषः। तत्र पुष्पभूतिः नाम राजाधिराजः प्रादुरासीत्। तस्य भगवति भूतभावने भवे सहजा भक्तिः आसीत्। एकदा असौ परमशैवो भूपतिः लोकमुखात् भैरवाचार्य्यनामानम् एकं

महापाशुपतं स्वजनपदमागतम् अश्रौषीत्। श्रुत्वा एव तन्नाम तस्मिन् महती भक्तिः बभूव अस्य भूपतेः।

कदाचित् परिणते वासरे प्रतीहारो राजानमेत्य व्यज्ञापयत्,—'देव! द्वारि स्थितः परिव्राट् भैरवाचार्य्यादेशात् अनुप्राप्तो देवं द्रष्टुम् इच्छति'। तदाकर्ण्य राजा अभ्यधात्,—'अविलम्ब प्रवेश्यताम् एषः' इति। ततश्च प्रविष्टं तम् अपृच्छत् नरपतिः,—'क्व भैरवाचार्य्यः?' इति। प्रीतमनाः परिव्राट् उपनगरं भगवतीतटैकदेशे वनान्तर्वर्त्तिनि शून्याऽऽयतने स्थितं तमाख्यातवान्। पुनश्च अकथयत्,—'देव! स भगवान् तत्र स्थितो महाभागम् अश्वयति आशीर्वचनाः' इत्युक्त्वा प्रादात् योगकरण्डात् आकृष्य पञ्च राजतानि रत्नोज्ज्वलानि कमलानि भैरवाचार्य्यप्रहितानि।

राजा तु सादरं तानि आदाय अब्रवीत्,—'योगिन्! मनोरथदुर्लभफलप्रसविनी शिवभक्तिः इयम् अस्माकं, यया एवम् अस्मासु प्रसीदति भगवान् भैरवाचार्य्यः। तत् परेद्यवि भगवन्तं साक्षात्करिष्यामि' इत्युक्त्वा तं परिव्राजं विससर्ज।

अथ अन्येद्युः प्रातरुत्थाय अश्वारूढः कतिपयैः एव राजपुत्रैः अनुसृतः भैरवाचार्य्यसकाशं प्रायात्। गत्वा च तम् आश्रमं तत्र स्थितं शिष्यमेकं तदीय दृष्ट्वा अपृच्छत्,—'क्व इदानीं भगवान् भैरवाचार्य्यः?' इति। साऽब्रवीत्,—'महाभाग! एतस्य जीर्णमातृगृहस्य उत्तरेण विल्ववाटिकाम् अधितिष्ठति' इति। तथोक्तश्च असौ नरपतिः गत्वा ताम् एव विल्ववाटिकाम् अविशत्, अपश्यच्च तत्र प्रातः स्नातं, हुतहुताशनं, व्याघ्राजिनमधितिष्ठन्तं, कार्पटिकगणैः परिवृतं प्रमथगणवृतं भगवन्तं विरूपाक्षमिव भैरवाचार्य्यम्। स आचार्य्यः दृष्ट्वैव तं राजानं प्रत्युज्जगाम, समवर्द्धयच्च स्वस्तिगिरा गम्भीरया। राजा तु दूरतः

कृतप्रणामोऽब्रवीत्,—'भगवन्! मनोरथगिरष्योऽयं जनो भवतां समागतः' इति। तदाकर्ण्य भैरवाचार्य्यः परमप्रीतः आसनदानेन तम् अभ्यर्च्य स्वयं व्याघ्राजिन एव निषसाद। राजा तु तस्मिन्नेव दिने नानाविधाभिः कथाभिः चिरं स्थित्वा तेनानुमतः पुनः राजधानीं प्रत्याजगाम।

अन्येद्युश्च भैरवाचार्य्योऽपि राजानं द्रष्टुं तदीयं राजभवनमगात्। आगताय च तस्मै राजा परमया भक्त्या सर्व्वं सपरिजनं सकोषं सान्तःपुरम् आत्मानं न्यवेदयत्। योगी विहस्य अब्रवीत्,—'राजन्! क्व वयं वनवासिनः फलमूलाशनाः निःस्पृहाः? क्व वा भोगविभवाः? विभवमदो हि नाशयति मनस्वितां; तद्भवादृशा एव एतान् भोक्तुमलं, न वयम्' इति उक्त्वा कियन्तं कालं विविधाभिः वाग्भिः राजानम् अभिनन्द्य स्वम् एव आश्रयं प्रत्यागमत्।

एवञ्च असौ परिव्राट् अन्यानि तादृशानि पञ्च पञ्च कमलानि अन्तरा अन्तरा राज्ञे उपायनानि प्राहिणोत्। एकदा स श्वेतकर्पटावृतं किमपि आदाय राजभवनम् आगत्य राजानम् अब्रवीत्,—"महाभाग! भगवान् भैरवाचार्य्यः भवन्तमेवम् आह यत्,—'मम एकेन शिष्येण पातालस्वामिना कस्यचित् ब्रह्मराक्षसस्य हस्तात् महाऽसिः अट्टहासो नाम अधिगतः, सोऽयं भवद्भुजमेव अलङ्कर्त्तुमलं' गृह्यताम्" इत्युक्त्वा तस्मात् श्वेतकर्पटात् अपकृष्य कृपाणं प्रादात्। नृपतिस्तु आयुधप्रियतया तत् आदाय पश्यन् परमां प्रीतिम् अवाप, अवोचत् च समयोचितं सविनयं किञ्चित्। स च परिव्राट् सपरितोषं 'स्वस्ति भवते' इत्यभिधाय स्वमेव आश्रमम् अयासीत्।

अथ गच्छत्सु कालेषु कदाचित् भैरवाचार्य्यः स्वयमागत्य रहसि राजानम् अवदत्,—"तात! कमपि महामन्त्रं सेवितवान्

अस्मि महाश्मशाने कोटिजपेन ; तस्य सिद्धिस्तु वेतालसाधनावसाना ; सा च असहायेन न कदाचित् लभ्यते। त्वमेव अलमस्य साहायकत्वे। त्वयि च अङ्गीकृतभारग्रहणे अपरे च त्रयः सहायाः सम्भविष्यन्ति ; एकः स खलु पातालस्वामी, अपरः स एव परिव्राट् टीट्टिभनामा अस्मच्छैशवसुहृत्, अन्यश्च कर्णतालो नाम शिष्यः'। अथ 'तथा' इति स्वीकृतवचसि भूपतौ भैरवाचार्य्यः प्रहृष्टः चकार सङ्केतम्,—'आगामिन्यां कृष्णचतुर्दश्याम् अर्द्धरात्रे महाश्मशानेऽस्मिन् शून्याऽऽयतने शस्त्रधारिणा भवता साक्षात्करणीया वयम्' इति।

अथ तस्यां कृष्णचतुर्दश्याम् आगतायां निशीथे नरपतिः शस्त्रमात्रसहायः तमेव उद्देशमगच्छत्। ते च त्रयः पातालस्वामिप्रभृतयः तं प्रत्युदगमन् विकटवेशाः। तमसाऽऽच्छन्नतया तत्प्रदेशस्य अदृष्टशरीरत्वात् तेषां राजा 'कः कोऽत्र भोः!' इति तान् अपृच्छत्, अब्रुवंश्च ते त्रयः स्वं स्वं नाम इति। अथ नृपतिः तैः अनुगम्यमानः तामेव साधनभूमिम् अगच्छत्। तत्र गत्वा च महतो मण्डलस्य मध्ये किमपि जपन्तम् आचार्य्यम् अपश्यत्, प्राणमच्च। ततश्च पूर्व्वसङ्केतानुसारेण पातालस्वामी प्राचीं दिशं, कर्णतालः कौबेरीं, परिव्राट् पश्चिमां, राजा दक्षिणाम् आश्रित्य तस्थौ।

एवमवस्थितेषु तेषु, विस्रब्धम् आचरति च स्वं कर्म्म भैरवाचार्य्ये, निवृत्तेषु च जनितकर्णज्वरेषु अचिरं कृतकलकलेषु विफलप्रयासेषु विघ्नकारिषु यातुधानेषु, समतिक्रामति च निशीथसमये, मण्डलस्य उत्तरेण भूः अदीर्य्यत ; उज्जगाम च सहसा तस्माद् विदीर्णात् भुवो भागात् कश्चित् कुवलयश्यामः पुरुषः ; उच्चैः जगाद च विहस्य,—'भोः! किमयं विद्याऽवलेपः सहायमदो वा!!—यत् मह्यम् अविधाय बलिं जाल्म इव

स्वर्गमिदम् अभिवाञ्छसि ? दुर्मतिरियम्; एतत्क्षेत्राधिपतिरहं श्रीकण्ठो नाम नागाधिपतिः। प्रतिकूलवर्त्तिनि मयि का शक्तिः ग्रहाणामपि गगनमार्गं सञ्चरितुम्? अनुभूयताम् अस्य दुर्नयस्य फलमिदानीं महायवनाऽपि' इत्यभिधाय प्रकोष्ठप्रहारैः त्रीनपि तान् पातालस्वामिप्रभृतीन् अमिचर्म्मवतोऽपि न्यपातयत्। नरपतिस्तु सावहेलमब्रवीत्,—'रे काकोदराधम! काक! जीवति मयि राजहंसे बलिमादातुं न जिह्रेषि? परुषभाषितैः का श्लाघा? भुजे एव वीर्य्यं वसति, न वचने। गृहाण शस्त्रं, यदि एवं प्रतिपत्तिस्ते' इति। नागस्तु अनादृत्य तद्वचनम्—'आगच्छ, किं शस्त्रेण?—भुजाभ्याम् एव शातयामि ते दर्पम्' एवमभिदधानः समास्फोटयामास। राजा तु तथाऽधिक्षिप्तः परिकरं बध्नन् युद्धायमुद्यतस्तम् आक्रम्य केशेषु जग्राह, पातयामास च तत्क्षणमेव भूतले तं पापं नागम्। अथ आकृष्य तम् अट्टहासं शिरश्छेत्तुम् उपक्रममाणः सोपवीतं तदङ्गं पश्यन् अब्रवीत्,—'पाप! दुर्विनीत! पश्यामि ते दुर्नयनिर्वाहबीजमिदं, यतो निःशङ्कमवाचरसि अविनयम्; ब्रह्मबधाऽकर्त्तव्य एव' इति वदन् तं सुदूरतः समुत्ससर्ज।

अनन्तरञ्च सहसा एव ददर्श महान्तमालोकम्, अजिघ्रच्च घ्राणतर्पणमतिसौरभम् आमोदं, शुश्राव च नूपुरनिस्वनम्। नूपुरशब्दानुसारेण च व्यापारितचक्षुः अभिमुखम् आपतन्तीं कामपि कामिनीं दृष्ट्वा राजा असम्भ्रान्त एव अप्राक्षीत्,—'भद्रे! काऽसि? किमर्थं कुतो वा दृष्टिपथम् आगता?' इति।

अथ सा अब्रवीत्,—'महाभाग! जानीहि मां भगवतो विष्णोर्वक्षःस्थलविहारिणीं लक्ष्मीम्। अपहृताऽस्मि ते निरुपमेन अनेन साहसेन दुर्ज्जयनागनिपातिना; वृणीष्व इदानीं स्वाभिलषितं वरम्' इति। परोपकारपरायणस्तु राजा

तां प्रणम्य स्वार्थनिःस्पृह एव आचार्य्यस्य सिद्धिमेव अयाचत। सा तु लक्ष्मीः 'तथा अस्तु' इत्यभिधाय पुनरब्रवीत्,—'राजन्! अनेन तव सत्त्वोत्कर्षेण, असाधारणया च शिवभक्त्या, स्वार्थनिःस्पृहतया च भृशं प्रीताऽस्मि ; ददामि ते अपरम् अभीष्टम् ;—भविष्यति भवान् महतो राजवंशस्य कर्त्ता ; यस्मिन् उत्पत्स्यते महाराजाधिराज आदिराजः पृथुः इव हर्षो नाम,—भविष्यते हि यं मदीयमिदं करकमलं कमलमपहाय गृहीतचामरम्' इत्युक्त्वा तिरोबभूवे।

अथ राजा तत्प्रसादेन नितरां प्रीतिमवाप हृदयेन। भैरवाचार्य्योऽपि राजप्रसादात् विद्याधरत्वमधिगतः प्राब्रवीत्,—'नरनाथ! प्रीतोऽस्मि ते महासत्त्वतया परोपकारितया च ; स्वप्नेऽपि असम्भाविता कोऽन्यो भवन्तमपहाय गुरवे ईदृशीं दक्षिणां दातुमलम्!! तदिच्छामि केनापि कार्य्योपयोगेन आत्मानम् अनृणीकर्त्तुं भवतः' इति। राजनि तु,—'भवत्सिद्धैव कृतकृत्योऽस्मि, नान्यत् किमपि कामये ; साधयतु यथासमीहितं स्थानम् आचार्य्यः' इत्यभिहितवति, आचार्य्यः स्वाभीष्टं विद्याधरक्षेत्रं जिगमिषुः समालिङ्ग्य तान् शिष्यान् पातालस्वामिप्रभृतीन्,—'तात! साधयामि इति न स्नेहानुरूपं वचनं, स्मर्त्तव्योऽयं स्वार्थपरो जनः सर्व्वथा कथाऽन्तरेषु' इत्यादिकं तत्कालोचितं राजानं व्याहरन् उत्पपात गगनतलं, प्राप च सिद्धिलब्धं स्थानम्। श्रीकण्ठोऽपि नागराजः,—'राजन्! पराक्रमक्रीतोऽयं जनः स्मर्त्तव्यः' इत्यभिदधान एव भुवो विवरं प्राविशत्।

क्षितिपतिस्तु अवसितायां रजन्यां त्रीनपि तान् पातालस्वामिप्रभृतीन् सहायीकृत्य वनवापीसलिले अङ्गानि प्रक्षाल्य स्वं नगरं प्रत्यागमत्। कियता कालेन तेषु त्रिषु परिव्राट्/

वनमाश्रयत्। पातालस्वामिकर्णतालौ तु शौर्य्यरमानुरागिणौ तमेव राजानम् आश्रित्य तस्थतुः।

चतुर्थ उच्छ्वासः।

अथ असौ पुष्पभूतिः शूर इव हरिवंशं महान्तं राजवंशम् अजीजनत्। तस्माच्च राजवंशात् क्रमेण बहवो राजानः समजायन्त। तेषु च तथाविधेषु धरणीं पालयत्सु उदभूत् प्रभाकरवर्द्धनो नाम भूपतिः; यशोवती नाम तस्य राजर्षेः महादेवी, पार्व्वती इव भगवतः शङ्करस्य परमप्रेयसी आसीत्। असौ च नरपतिः प्रकृत्यैव सूर्य्यभक्तः अन्वहम् अजपत् मन्त्रम् आदित्यहृदयम् अपत्यकामः त्रिकालम्। कदाचित् स ग्रीष्मरजन्यां यदृच्छया यशोवत्या सह प्रियया हर्म्यपृष्ठे सुष्वाप। गतभूयिष्ठायाञ्च निशायां राजमहिषी यशोवती सहसा एव 'परित्रायस्व परित्रायस्व आर्य्यपुत्र !' इति व्याहरन्ती, भूषणरवेण आह्वयन्ती इव परिजनं वेपमानाङ्गयष्टिः उदस्थात्। तेन रवेण सहसा प्रबुद्धो राजा 'देवि ! न भेतव्यं न भेतव्यं, किमेतत् ?' इति आलपन् सहसा उदतिष्ठत्; चतुर्दिक्षु दत्तदृष्टिश्च यदा न किमपि दृष्टवान्, तदा तां भयकारणम् अपृच्छत्।

क्षणेन च साध्वसे प्रशान्ते सा देवी प्राब्रवीत्,—"आर्य्यपुत्र ! दृष्टवत्यस्मि स्वप्ने—'भगवतः सवितुर्मण्डलात् निर्गत्य द्वौ कुमारौ ज्योतिर्म्मयौ बालातपेन पूरयन्तौ दिगन्तराणि, अशेषेण जगतीजनेन अभिवन्द्यमानौ, कन्यया एकया च चन्द्रकलया इव अनुगम्यमानौ, भुवं गतौ विलपन्त्या मे शस्त्रेण उदरं विदार्य्य प्रविशन्तौ' एवम् आलोक्यैव भीता प्रबुद्धास्मि आर्य्यपुत्रम् आक्रोशन्ती कम्पमाना" इति। तत् आकर्ण्य राजा ताम्

अवादीत्,—'प्रिये ! हर्षे विषादम् अनुभवसि, पूर्णमनोरथौ आवाम् ; प्रसन्नोऽस्माकं रविः भगवान्, अचिरेण एव अपत्यरत्नत्रयप्रदानेन प्रीणयिष्यति देवीम्' इति।

अथ गच्छता कालेन देवी यशोवती राज्यवर्द्धनं नाम प्रथमं तनयम् असूत। ततश्च समतिक्रान्ते कस्मिंश्चित् काललवे, देवक्या इव भगवान् चक्रपाणिः, यशोवत्याः हृदये गर्भे च सममेव प्रादुरासीत् हर्षः। सम्प्राप्ते च ज्यैष्ठामूलीये मासि, बहुलासु, बहुलपक्षद्वादश्यां व्यतिक्रान्तायां प्रदोषवेलायां साम्राज्यलक्षणाक्रान्तमूर्त्तिः देवो हर्षः समजायत। अत्रान्तरे मौहूर्त्तिकः तारको नाम राज्ञः परमसम्मतः समागत्य 'मान्धाता किल एवंविधे व्यतीपातादिदोषविरहिते वासरे, सर्व्वेषु उच्चस्थानावस्थितेषु च ग्रहगणेषु, ईदृशि एव लग्ने प्रादुरासीत् ; ततोऽनन्तरं पुनः ईदृशि लग्ने चक्रवर्त्तिजनने नान्यः कोऽपि समजायत। सप्तचक्रवर्त्तिनृपाणां धुरीणः, महारत्नानां चक्रवर्त्तिलक्षणानाञ्च भाजनं, सप्तसागराधिपतिः सुतोऽयं देवस्य जातः' इति राजानं व्यज्ञापयत्। अथ गच्छति च काले धात्र्याः कराङ्गुलिम् अवलम्ब्य पञ्चषाणि पदानि प्रक्षिपति हर्षे, षष्ठञ्च हायनम् अनुप्रविशति राज्यवर्द्धने देवे, सा यशोवती गौरीमिव हिमाद्रिजाया प्रासोष्ट राज्यश्रियं नाम कन्यकाम्।

अत्रान्तरे च यशोवत्या भ्राता पुत्रं भण्डिनामानम् अष्टवर्षवयसं मनोभवमिव पुनरुत्पन्नं परमसुन्दरम् अनुचरं कुमारयोः समर्पयामास। राजा तु तस्मिन् पुत्रयोः इव समदृष्टिरासीत्। राजपुत्रौ तेन मधुमाधवौ इव मलयमारुतेन परां शोभां प्रापतुः। क्रमेण च यौवनपदवीमारुरुहतुः तौ पित्रोः आनन्देन समं वर्द्धमानौ।

कदाचित् अन्तःपुरवर्त्ती राजा सस्नेहनिर्भरम् अभाषत,—

'वत्सौ ! दुर्लभाः सङ्गत्याः, तदेव तावत् प्रथमं राज्याङ्गम् ; धूर्त्ता हि क्रीड़ारसप्रसङ्गेन पार्थिवं रञ्जयन्तः जनयन्ति स्वप्ना इव मिथ्यादर्शनेषु सद्बुद्धिं, भ्रंशयन्ति च क्रमेण बहुविधाभिः उपाधिभिः स्वपदात्। तत् एतौ सर्व्वैः एव दोषाभिषङ्गैः अनाघ्रातौ, बहुधा अस्माभिः विप्रलम्भेण परीक्षितौ, विशुद्ध-प्रकृतौ, विनीतौ, विक्रमशालिनौ, अभिरूपौ च मालवेन्द्रतनयौ भुजौ इव मे शरीरादभिन्नौ कुमारगुप्तमाधवगुप्ताभिधानौ अस्माभिः भवतोः अनुचरौ निर्दिष्टौ। अनयोः उभयोरपि भवद्भ्यां सोदरदृष्टिभ्यां वर्त्तितव्यम्' इत्युक्त्वा तयोः आह्वानाय दौवारिकम् आदिदेश।

अचिरेणैव तौ तेन प्रतीहारेण समभागतौ प्रविश्य अभ्यन्तरं राजानं यथाविनयं प्रणेमतुः, उपविविशतुश्च नरपतिनिर्दिष्टे अनुरूपे आसने। भूपतिः तौ आदिदेश तयोस्थितौ,— 'वत्सौ ! अद्य प्रभृति भवद्भ्यां कुमारयोः अनुचराभ्यां भवितव्यम्' इति। तौ च 'यथा आज्ञापयति देवः' इत्युक्त्वा कुमारौ राज्यवर्द्धनहर्षौ सविनयं प्रणम्य ततः प्रभृति नक्तन्दिवं तौ अनुचरन्तौ तस्थतुः।

अथ राज्यश्रीः अपि राज्यश्रीः इव क्रमेण अवर्द्धत। अल्पैः एव दिवसैः तरुणीभूतां तां राजानः दूतसम्प्रेषणादिभिः अयाचन्त। एकदा राजा केनापि पठ्यमानाम् आर्य्यामिमाम् अश्रौषीत्,—

'उद्वेगमहाऽऽवर्त्ते पातयति पयोधरोन्नमनकाले।
सरिदिव तटमनुवर्षं विवर्द्धमाना सुता पितरम् ॥' इति।

एताञ्च आकर्ण्य रहसि राज्ञीं यशोवतीं प्राह राजा,—'देवि ! यौवनसीमाम् अनुप्राप्ता ते दुहिता। तुल्यायामपि अपत्यतायां दुहितुः जनने हि तप्यन्ते गृहिणः। अपत्यविरहं दुःसहमपि

सहमानाः कथञ्चित् प्राणाधिकामपि दुहितरं पात्रसात् कृत्वा सुखिनो भवन्ति सन्तः। सकलभुवनवन्द्यो हि मौखरो वंशः, तस्मात् उत्पन्नः अवन्तिवर्म्मसुतो ग्रहवर्म्मा एनाम् अस्मत्सुतां कामयते; यदि भवत्या अनुमोदितमेतत्, तदा अस्मै एव सुतां राज्यश्रियं समर्पयामि' इति। देवी प्राह,—'आर्य्यपुत्र! धात्रीनिर्व्विशेषा हि भवन्ति जनन्यः कन्यापुत्राणां प्रतिपालनमात्रक्षमाः, दाने तु प्रमाणं पितरः। तदेतदेव ब्रवीमि,—यथा यावज्जीवमावयोः व्यथां न जनयति, सत्पात्रम आसाद्य सुखेन कालं नेष्यति च दुहिता, तथा आर्य्यपुत्र एव अवधारयतु' इति।

अथ नरपतिः ग्रहवर्म्मणे दातुं कृतनिश्चयः, शुभे दिवसे शुभे च लग्ने ग्रहवर्म्माणम आहूय सुतां राज्यश्रियं सम्प्रददौ। जामाता च तां परमसुन्दरीं भार्य्याम् अधिगम्य, तया एव सह श्वशुरकुले कियन्ति दिनानि स्थित्वा, कथमपि श्वश्र्वा श्वशुरेण च यौतुकादिभिः सत्कृत्य विसर्ज्जितः तां राज्यश्रियम् आदाय स्वराज्यमयासीत्।

पञ्चम उच्छ्वासः।

एकदा राजा राज्यवर्द्धनं युवराजं कृत्वा हूनान् जेतुम् उत्तरापथं प्रजिघाय। देवोऽपि हर्षवर्द्धनः तं सौभ्रात्रेण कियन्तम् अध्वानं तुरङ्गाऽऽरूढोऽनुससार। अथ प्रविष्टे भ्रातरि कैलासप्रभोद्भासिनीमाशां, बहिरेव कियन्तं कालं मृगयाव्यपदेशेन व्यलम्बत। एकदा तु रजन्यां परिणतायामेव स्वप्ने दुरन्तेन दावानलेन दह्यमानं केशरिणम् अद्राक्षीत्। तस्मिन् एव च दहने समुत्सृज्य सुतस्नेहं, भाविनः पतिविरहस्य दुर्वि-

षण्डतां चिन्तयन्तीं केशरिणीम् आत्मानं पातयन्तीम् अद्राक्षीत्। आसीच्च अस्य चेतसि,—'संसारेऽस्मिन् लोहेभ्योऽपि कठिनतराः प्रणयपाशाः, यन्निबद्धाः समाचरन्ति तिर्य्यञ्चोऽपि एवमेवम्'। अथ प्रबुद्धस्य 'किमेतत्' इति भावयतः पस्पन्दे मुहुर्मुहुः दक्षिणेतरं चक्षुः। चलितमिव अभूत् हृदयम्। इत्थं विषण्ण एव शून्येन चेतसा प्रभाते मृगयां विजहार, मध्याह्ने च वेत्रपट्टिकाशयनम् अधिशयानः साशङ्क एव अतिष्ठत्।

अत्रान्तरे कश्चिल्लेखहरः कुरङ्गकनामा दीर्घाध्वगः समुपेत्य कृतप्रणामः शुष्केण एव मुखेन स्वान्तदुःखम् उद्गिरन् लेखम् उपानयत्। तञ्च आदाय देवो हर्षः स्वयमेव अवाचयत्। विदितलेखार्थश्च 'किं मान्द्यं तातस्य ?' इति तम् अप्राक्षीत्। स च 'महान् दाहज्वरः' इति प्रत्युवाच। श्रुत्वा एव एतत् निदारुणं वचः समुत्पन्नवेपथुः पितुरारोग्यकामः विप्रेभ्यः अमितसुवर्णरत्नादिकं दत्त्वा, तस्मिन् एव दिने अकृताहार एव प्रयाणशङ्खमादिशन् एकाकी एव अश्वमारुह्य नगराय गन्तुम् उपचक्रमे। सहचराश्च राजलोकाः सैनिकाः तम् अनुवव्रजुः। पथि गच्छंश्च महद्भिः दुर्निमित्तशतैः अनभिनन्द्यमानगमनः साशङ्क एव नक्तन्दिवं चलन्, अन्येद्युः मध्याह्नसमये स्कन्धावारम् आससाद ; प्रविशंश्च तत्र यमपट्टिकेन केनचित् गायमानं श्लोकमिमं शुश्राव,—

'मातापितृसहस्राणि पुत्रदारशतानि च।
युगे युगे व्यतीतानि कस्य त्वं कस्य वा भवान् ?॥' इति।

अथ क्रमेण राजद्वारम् आगत्य अन्तःपुरात् बहिरागच्छन्तं सुषेणनामानं वैद्यकुमारं वैद्यकशास्त्रपारगं पितुः प्रियम् अपृच्छत्,—'सुषेण ! अपि तातस्य कश्चिद् विशेषः ?' इति। सोऽवदत्,—'कुमार ! नास्ति, इदानीं यदि कुमारं दृष्ट्वा भवेत्'

इति। अथ प्रविष्टोऽभ्यन्तरं माता यशोवत्या 'आर्य्यपुत्र! स्वपिषि कच्चित्?' इति व्याहरन्त्या सविषादं सर्व्वाङ्गेषु संवाह्यमानं, प्रबलदाहज्वरेण विकृतिमापद्यमानं पितरम् अवलोकयामास। राजा तु दूरादेव पुत्रं कनीयांसमागतं दयिततमम् आलोक्य, तदवस्थोऽपि 'एहि एहि वत्स!' इति प्रसार्य्य बाहू शरीरार्द्धेन शयनात् उदतिष्ठत्; अस्पृशच्च पुनरेनं कम्पमानेन करतलेन सर्व्वाङ्गेषु, अब्रवीच्च कृच्छ्रात् इव क्षयक्षामकण्ठः,— 'वत्स! कृशोऽसि' इति।

भण्डिस्तु अब्रवीत्,—'देव! अद्य तृतीयं दिनम् अस्य कृताहारस्य' इति। तदाकर्ण्य वाष्परुद्धकण्ठः कथञ्चिदपि दीर्घं निश्वसन् पुनरवादीत्,—'वत्स! वेद्मि त्वां पितृवत्सलं, सुकोमलहृदयञ्च। अवस्था च एतादृशी विधुरयति धीरस्य अपि धियम्। बन्धुजनस्नेहोऽतीव प्रमाथी संसारे अस्मिन् मानवानाम्; तथाऽपि, 'आत्मानं सततं रक्षेत्' इति नीतिम् अनुसृत्य सर्व्वथा शोकप्रसरो न दातव्यः। उत्कटदाहज्वरदग्धोऽपि वत्सस्य अनेन क्लेशवार्त्ताश्रवणेन अतिमात्रं दह्ये। त्वां तनुताम् आपन्नं दृष्ट्वा अतीव व्यथते मे हृदयम्। मदीयं सुखं, राज्यं, कुलञ्च, जीवितञ्च त्वदधीनम्। तव एव जन्मना अस्मि चरितार्थः। साम्प्रतं निराशोऽस्मि संवृत्तो जीविते; केवलं भिषजाम् अनुरोधः पाययति मां भेषजम्। तत् अविलम्बम् उत्तिष्ठ, कुरु आहारं, कृताऽऽहारे च त्वयि अहं यथायुक्तं पथ्यं करिष्यामि' इति। श्रुत्वा च पितुर्वचनं देवस्य हर्षस्य शोकानलः सुतराम् अदीप्यत। क्षणं स्थित्वा पित्रा पुनः आहारार्थम् आदिष्टः तस्मात् पितुर्गृहात् अवततार, अकारोच्च चेतसि,—"अकाण्ड एवायं समापतितः महान् अनर्थः निर्मेघ इव अशनिसम्पातः, किमत्र करवाणि?' इति। अथ गत्वा

च स्वं धाम परिजनैः अनुगम्यमानः कथञ्चित् कतिपयान कवलान् गृहीत्वा पुनरपि पितुरन्तिकमागात। तत्र पितु-रवस्थाम् अतीव शोचनीयाम् आकर्णयन्, पश्यंश्च जाग्रदेव दीर्घदाघां निशाम् अयापयत्, प्राहिणोच्च प्रत्यूषसि एव भ्रातु-रन्तिकं दूतान्।

अथ अन्यस्मिन् अहनि 'क्व असौ कुमारो हर्षः?' इति आत्मपत्नी, वेलाभिधाना यशोवत्याः प्रतीहारी तम् उपेत्य व्यज्ञापयत्,—'कुमार! परित्रायस्व परित्रायस्व, जीवति एव पत्यौ किमपि अध्यवसितं भवज्जनन्या' इति। तदाकर्ण्य हर्षः सत्वरं प्रविशन् अन्तःपुरं मर्त्तुं कृतव्यवसायां मातरम् अद्राक्षात्; अभ्यधाच्च दूरादेव सवाष्पदृष्टिः उच्चैः,—'मातः! किमेवं व्यवस्यति भवती? मन्दभाग्यान् अस्मान् त्वमपि त्यक्तु-मिच्छसि? प्रसीद, निवर्त्तस्व अस्माद् दुर्व्यवसितात्' इति अभिधाय पादयोः न्यपतत्।

देवी च ससम्भ्रमं सस्नेहञ्च तमुत्थाप्य सुतं, वाष्पनिरुद्ध-कण्ठी पुनः पुनः निश्वस्य आचष्ट,—'वत्स! नासि त्वम् अप्रियो निर्गुणो वा, येन त्वां परित्यजामि; स्तन्येन सह एव त्वया पीतम् अस्मद्धृदयम्; परं कुलवधूः अहं चारित्रवती, धर्म्मोज्ज्वले च कुले जाता। किं न जानासि, महावीरस्य पुरुषप्रवरस्य महिषीं मां केशरिणः इव केशरिणीम्? वीर-पत्नी, वीरजननी, वीरकन्या च अहम् अविधवा एव मर्त्तुम् अभिलषामि; किं बहुना वत्स! यश एव चिरस्थायि, भौतिकं कलेवरन्तु न; तत् माम् अस्माद् व्यवसायात् निवर्त्तयितुं न अर्हसि, कथम् एतादृशी सुभगा भूत्वा भर्त्तृविरहानलदग्धा चिरं स्थास्यामि?' इति।

स तु दुर्निवारतां तादृशस्य शोकस्य समवधार्य्य, कुलाङ्गना-

नाम उचितां श्रेयसीञ्च तां गतिं मन्यमानः तूष्णीम् अवाङ्मुखः तस्थौ। यशोवती च सन्त्यक्तसुतस्नेहा चरणाभ्यामेव च अन्तःपुरात् निर्गत्य, अनुसरस्वतीतटं चिताऽग्निम् आरुरोह।

हर्षस्तु मातुर्मरणेन नितरां विह्वलः पुनः पितुः अन्तिकम् आगच्छन्, तञ्च स्वल्पावशेषजीवितम् अश्रुस्रोतसा वर्षन् विमुक्तकण्ठमतिचिरं प्रारोदीत्। राजा तु चिरात् चक्षुरुन्मील्य पुत्रं तथाविधं दृष्ट्वा प्रक्षीणस्वरेण कथञ्चित् उवाच,—'वत्स! कथमेवं विक्लवीभवन्तम् आत्मानं न रुणत्सि? त्वादृशा हि न अमहासत्त्वाः, न अल्पसत्त्वाश्च; क्व त्वद्विधाः? क्व च वैक्लव्यम्? भूरियं तव, इति सार्वभौमलक्षणवतः पुनरुक्ततामेति। अवलम्ब्यतां लक्ष्मीः, इति लक्ष्म्या स्वयं गृहीतपाणेः न युज्यते। निगृह्यतां चापलम्, इति स्वभावधीरस्य निरर्थकोपदेशः' इत्येवं ब्रुवन् एव पञ्चत्वम् अगात् राजसिंहः।

अत्रान्तरे अस्तमयासीत् वासरमणिः। प्रकाशमाने च प्राच्यां दिशि तारापतौ, स्वयमेव समर्पितस्कन्धैः सामन्तैः पौरजनैश्च पुरोधःपुरःसरैः गृहीत्वा शवशिबिकाम् उपसरस्वतीतटं, चितायां नरनाथार्हायां वह्निसत्कारेण कान्तिमात्रावशेषतां निन्ये यशोधनः औशीनर इव राजेन्द्रः। अथ उदिते च सवितरि देवो हर्षः स्नात्वा पित्रे अददुदकाञ्जलिम्। अपस्नातश्चार्द्रमस्तक एव पिधाय उद्गमनीयदुकूलवसनं पादचारेणैव क्षितितलनिहितनयनः उष्णं निश्वसन् प्रत्याजगाम भवनम्।

एवं देवो हर्षः सममेव पितृभ्यां विहीनः, नितान्तविह्वलः, किङ्कर्त्तव्यविमूढोऽपि भ्रातृगतहृदयः समचिन्तयत्,—'अपि नाम आर्य्यः ईदृशं पितृमरणं महाप्रलयसमम् आकर्ण्य गतधैर्य्यो वाष्पवारिकृतस्नानो वनमाश्रयेत्?—उत राज्यपदं परित्यजेत्? न आद्रियेत वा राजलक्ष्मीमुपसर्पन्तीम्? अतीव पितृवत्सलः

आर्य्यः ; सर्व्वदा तातं श्लाघमानः माम् आह स्म,—'वत्स हर्ष ! कस्यचिदपरस्य अस्ति, आसीत्, भविष्यति वा तातसदृशं कलेवरं, मुखकमलञ्च एतादृशम् ?—भुजदण्डौ च इत्थम्भूतौ ? क्व वा दृश्यन्ते ईदृशानि विचेष्टितानि ? कश्च अपरो मानी विक्रान्तः दानशौण्डो वा तातादन्यः ?' एतानि नानाविधानि चिन्तयन् भ्रातुरागमनं प्रतीक्षमाणः कथमपि शोकार्त्तः तस्थौ ।

षष्ठ उच्छ्वासः ।

अथ भुक्ते प्रथमप्रेतपिण्डादके विप्रे, अतीतेषु च अति-वैक्लव्यजननेषु अशौचकालेषु, चित्रार्पितकलेवरे काव्यार्पिताख्ये च नृपतौ, कुमारो हर्षः कदाचित् शोकाऽऽकुलचेताः सहसा महाजनमज्ञातसमागमं दृष्ट्वा मनसि अचिन्तयत्,—'किमन्यत् भवितुमर्हति कारणमेषामागमनस्य ? मन्ये, आर्य्यम् इव सम्प्राप्तम् आवेदयति अयं शोकाऽऽकुलो जनगणः' इति अपृच्छत् कञ्चित् प्रविशन्तं पुरुषं,—'किमार्य्यः समागतः ?' इति । स तु शनैरवादीत्,—'देव ! यथा आज्ञापयसि' । ततश्च अचिरेण एव प्रविशन् देवो राज्यवर्द्धनः दूरादेव प्रियं भ्रातरं दृष्ट्वा, चिरसञ्चितवाष्पवेगेण निरुद्धकण्ठो बाहुयुगलेन कण्ठे गृहीत्वा मुक्तकण्ठं प्रारोदीत् ।

अथ पर्जन्य इव निरवशेषनयनाम्बुः, सुचिराच्च कथञ्चिदपि प्रशान्तमन्युवेगः देवो राज्यवर्द्धनः, परिजनानीतेन सलिलेन मुखादिकं प्रक्षाल्य सुचिरं तूष्णीं स्थित्वा स्नानागारमगच्छत् । तत्र स्नात्वा विश्रस्तकुन्तलः विमुक्ताभरणः शयनीये निपत्य मौनमतिष्ठत् । अथ अन्येद्युः प्रभाते प्रविश्य समुपविष्टेषु राजलोकेषु, भ्रातरं हर्षवर्द्धनमब्रवीत्,—

'तात! पात्रमसि गुरुवचनानाम्। शैशवत एव भवता चित्तवृत्तिम् अनुसरता सम्यक् आराधितः तातः; तत् एवं गते वचनस्थितं त्वां किमपि विवक्षुः अस्मि, नात्र चापल्यात् विमतिः अवलम्बनीया; न च अत्र मदीहिते प्रत्यूहलवोऽपि विधेयः। ज्ञायत एव भवता लोकवृत्तं बहुदर्शनेन। पश्य,—मान्धातरि निधनं गते किमध्यवसितं पुरुकुत्सेन तदात्मजेन?—दिलीपे वा रघुणा?—दशरथे च रामेण?—दुष्मन्ते वा भरतेन? मन्तु तावदेते;—तातेन अपि पितरि सुगृहीतनाम्नि स्वर्गं गते नाकारि किं राज्यम्?—नावलम्बितं किं गार्हस्थ्यम्?—न रक्षिता वा प्रजाः? शोकपरिभूतञ्च जनं कापुरुषम् आचक्षते विद्वांसः; अबला एव विषयः शोकसम्भाराणाम्। तथाऽपि किं करोमि? अहन्तु स्वभावदुर्बलतया कापुरुषतया वा शोकविह्वलः किङ्कर्त्तव्यविमूढोऽस्मि। मम हि, एवं विपर्य्यस्ते संसारे प्रनष्ट एव प्रज्ञाऽऽलोकः, विच्युतमेव धैर्य्यम्; किं बहुना,—सर्व्वथा निरुत्सुकोऽस्मि विषयेषु। राज्यं विषमिव चकोरस्य चक्षुर्मे विरक्तीकरोति। वंशलक्ष्मीमुद्वोढुं न अभिलषति मे मनः। तदहम् इच्छामि, पुरुरिव आज्ञया गुरोर्जरां, गृहाण मे राज्यलक्ष्मीम् इति। त्यक्त्वा च सर्व्वाणि बालक्रीड़ितानि हरिः इव लक्ष्म्या विहर। त्यक्तं मया अद्य प्रभृति शस्त्रम्' इत्यभिधाय निजं खड्गं खड्गधारिणी हस्तात् आकृष्य भूमौ न्यपातयत्।

तत् आकर्ण्य देवो हर्षः सुतरां विदीर्णहृदयः सञ्चिन्तितवान्,—'किम् अयम् आर्य्यः मां ब्रवीति!! किमसौ केनचित् माम् अन्तरेण कोपितः?—अथवा एवं मां परीक्षते?—उत शोकजः कोऽपि चेतोविकार एषः?—आहोस्वित् शोकविमूढ़धिया एकं विवक्षितम्, अन्यत् मुखात् निर्गलितम्? केन हि ईदृशे भ्रातरि ज्यायसि त्यक्तराज्ये नवयसि, लक्ष्मीः काम्यते

चाण्डालेनापि ? कथं वा सम्भावितम् इदम् अतीव अनुचितं चित्तवता आर्य्येण ?—किं वा अनेन विस्मृतः सौमित्रिः ?—अथवा भामसेनादयः पाण्डवाः ? यद् भवतु, आर्य्ये मां विहाय तपोवनं विशति, नाहं क्षणमपि जीवितुं शक्नोमि' इति।

इत्थं चिन्तयति तस्मिन्, सहसा राज्यश्रियः परिजनः संवादको नाम समेत्य, मुक्तकण्ठं विरुदन् सभायाम् आत्मानं न्यपातयत्। ततश्च सम्भ्रान्तो देवो राज्यवर्द्धनः सह भ्रात्रा 'किम् ?' इति तं पप्रच्छ। स तु कथमपि संवृतबाष्पवेगः प्राब्रवीत्,—'देव ! पिशाचस्य इव नीचस्य चरितं रन्ध्रप्रहारि। यस्मिन् दिने राजाधिराजः प्रभाकरवर्द्धनो देवभावं गत इति वार्त्ता आसीत्, तस्मिन्नेव दिने दुरात्मना मालवेन्द्रेण ग्रहवर्मा व्यापादितः कूटकारिणा। देवी च राज्यश्रीः संयता कान्यकुब्जदुर्गे कारायां निहिता। जनश्रुतिश्च एषा यत्,—अराजकं राज्यमिदं मन्यमानोऽसौ दुर्मतिः एतामपि भुवम् आत्मसात् कर्त्तुम् आजिगमिषति' इत्युक्त्वा विरराम।

श्रुत्वा एतत् आकस्मिकम् अनुपेक्षणीयम् अपरं दुर्घटनं परपरिभवस्य अनाकर्णितपूर्व्वतया, तेजस्वितया नवयौवनस्य, स्वसुः स्नेहवशंवदतया च सद्य एव अस्य तादृशः शोको व्यरंसीत्। कोपावेशश्च गम्भीरं हृदयम् आचक्राम। पुनरपि परित्यक्तं शस्त्रं ग्रहीतुं समूलमालवोन्मूलनाय प्रससार दक्षिणोऽस्य करः। ततश्च कनीयांसम् अब्रवीत् भ्रातरम्,—'आयुष्मन् ! राजकुलमिदं, बान्धवा इमे, परिजनोऽयं, भूश्च इयं रक्ष्यताम्; गत एव अहम् अद्यैव मालवराजविध्वंसनाय। इदम् एव तावत् मे तपः दुर्विनीतारिनिर्मूलनम्। कुरङ्गकैः कचग्रहः केशरिण इव, भेकैः करप्रहारः कालसर्पस्य इव, मालवैः परिभवोऽस्मद्वंशस्य ; तिष्ठन्तु अन्यानि साधनानि ;—एक एव अयं भण्डिः

अयुतमात्रेण अश्वानां मया सह प्रयातु' इत्यभिधाय प्रयाणार्थं पटहम् आज्ञापयत् ।

तथा प्रक्रान्तं तत्र् आह स्म सविनयं देवो हर्षः,—'आर्य ! माम् अनुगन्तुम् आदिशतु, नाहं भवता विना क्षणमपि अत्र अवस्थातुम् उत्सहे ; प्रसीदतु भवान्, न वञ्चितोऽस्मि कदाचिदपि प्रसादेषु आर्य्येण' इत्यभिदधान एव पादयोः अपतत् । तं पुनश्चरणपतितम् उत्थाप्य सस्नेहं प्रोवाच देवो राज्यवर्द्धनः,—'वत्स ! कथम् एवम् अतिसमारम्भसमुद्योगेन गौरवम् आरोप्यते लघीयान् अरातिः ? न हि कुलाद्रिसमुत्पाटनक्षमाः प्रभञ्जना समुज्जृम्भन्ते अतिचपले तूलराशौ । अचिरात् एव ग्रहीष्यन्ति अस्त्वं दिशां विजये । साम्प्रतं द्रक्ष्यन्ति त्वाम् अनाथाः प्रजाः' इत्यभिधाय तस्मिन्नेव दिने प्रायात् मालवेन्द्रोन्मूलनाय ।

अथ देवो हर्षः भ्रातरि तथा प्रयाते खिद्यमानहृदयः परिणतप्रायायां रजन्याम् एकदा स्वप्ने अभ्रङ्कषं लोहस्तम्भं भज्यमानम् अद्राक्षीत् । सहसा प्रबुद्धश्च व्यचिन्तयत्,—'किम् एवं माम् एषः दुःस्वप्नः एतदवस्थमपि विधुरयति !! स्फुरति च निरन्तरम् अशुभसूचनाकुशलं सव्यं नयनम् ; सुदारुणाश्च विविधा उत्पाताः पुनः प्रबलपार्थिवनाशमाचक्षाणाः मुहूर्त्तमपि न प्रशाम्यन्ति ; सर्व्वथा स्वस्ति अस्तु सङ्ग्रामविजयिने आर्य्याय'। इत्थं मनसा अभिध्यायन् समुत्थाय आस्थानमण्डपगत एव सहसा प्रविशन्तं कुन्तलं नाम अश्ववारं राज्यवर्द्धनस्य प्रीतिभाजनम् अद्राक्षीत् ; अश्रौषीच्च तस्मात् वाष्पपूर्णनयनात्,—अवज्ञानिर्ज्जितमालवराजमपि गौड़ाधिपेन अलीकोपचारजनितविश्वासम् अशस्त्र स्वभवनगतम् एव भ्रातरं निहतम् । श्रुत्वा एव शोकक्रोधाभ्यां सममेव समाक्रान्तहृदयः अब्रवीत्,—'कः खलु तादृशं महापुरुषम् अकाण्डे गर्हितेन उपायेन मृत्युवशं नयेत् अनार्य्यात् गौड़ाधिपात्

अपरः ? न जाने,—स खलु दुरात्मा कां गतिं वा योनिं गमिष्यति ?—कस्मिन् वा निरये पतिष्यति ? चाण्डालोऽपि क इदं विगर्हितम् अकार्य्यम् आचरेत् ? नामग्रहणमपि अस्य पापकारिणः पापं जनयति। क इदानीं गमिष्यतेऽनेन दुरात्मना ?' इत्येवं वदत एव अस्य समोपगतः, पितुः मित्रं सेनापतिः सिंहनादनामा गम्भीरया वाचा सैनिकानां समररसम् उत्तेजयन् समभ्यधात्,—'देव! कापुरुषाः काका इव कृताश्रयया कोकिलया, हतलक्ष्म्या विप्रलभ्यमानम् आत्मानं न खलु चेतयन्ते। श्रियो हि दोषान्धतादयः कामलाविकाराः ; आतपत्रावृतरवयो हि न स्मरन्त्यपरं तेजस्विनं कुधियः ; किं वा करोतु वराकः ?—येनातिभीरुणा नित्यसमरविमुखेण नावलोकितान्येव कुपितानां शूराणामाननानि ? नासौ मूढः जानाति एवं यत्,—अभिचारा इव अपमानिताः सद्य एव समग्रवंशविनाशं विदधति मनस्विनः। वीरसमाजावहेलितस्य निघृणस्य तस्यैव उचितमिदं दुर्जनस्य दुष्पारनरकनिपातकुशलं कर्म्म। न खलु कदाचित् तेजस्विनं स्प्रष्टुं शक्नोति शोकः। त्वन्तु सत्त्ववतां प्राग्रहरोऽसि,—किम् एकेन गौड़ाधिपेन,—तथा कुरु, अन्योऽपि कश्चित् कदाचित् एवं यथा नाचरेत् इति। समाश्वास्यन्तामशरणाः प्रजाः। समर्प्यन्तां भूपतीनां शिरःसु शारदीयेन सूर्य्येण इव ललाटन्तपाः पादन्यासाः.' इति।

तत् आकर्ण्य देवो हर्षस्तं प्रत्यवोचत्,—'करणीयमेव इदम् अभिहितम् आर्य्येण। शृणु तावत्, प्रतिजाने आर्य्यस्य पादरजःस्पर्शेन,—यदि अल्पीयसा एव कालेन निर्गौड़ां न करोमि पृथ्वीं, ततो जातवेदसि ज्वलति पतङ्ग इव महापातकी पातयामि कलेवरम्' इति।

एवं कृतशपथश्च सभां त्यक्त्वा रात्रौ शयनतलनिलीनगात्रः

शोकानलदह्यमानान्तःकरणः चेतसि अकरोत्,—'कथमिव अस्य हतजीवितकामस्य आर्य्यविरहे क्षणमपि युक्तम् उच्छ्वसितुम्!! क्व गता सा प्रीतिः भक्तिः अनुवृत्तिः वा? कः खलु आर्य्यविरहे मम जीवितं सम्भावयेत्? तथाविधम् ऐक्यम् एकपद एव विलीनम्!! अभिन्नोऽपि हतविधिना सहसा विभिन्नः कृतः। दग्ध-रोषाऽऽविष्टचेतसा शोकात् रुदितमपि न मुक्तकण्ठं निर्घृणेन मया!! पर इव अहम् आर्य्ये मां विहाय स्वर्गं गते स्वस्थः इव तिष्ठामि!!' इत्येवं बहुविधानि चिन्तयन् निर्निद्र एव क्षपां नीत्वा प्रभातायाम् एव शर्व्वर्य्यां सकलगजसैन्याध्यक्षं स्कन्दगुप्त-माहूय विजयप्रयाणगजपूरणाय समादिशत्।

सप्तम उच्छ्वासः।

अथ अन्येद्युः देवो हर्षः चतसृणाम् अपि दिशां विजयाय शुभे लग्ने कृतमङ्गलाचारः प्रातिष्ठत। उपसरस्वति तृणनिर्म्मितं मन्दिरम् अधितिष्ठति तस्मिन्, कोऽपि समागत्य वृषाङ्कामिकां काञ्चनमयीं मुद्राम् अर्पयामास। जग्राह च राजा। समुपस्थापितं च आदावेव सा करात् परिभ्रश्य मृत्पिण्डे अवनतमुखी महीतले पपात। मृदुमृत्तिकायां पतनेन अस्या वर्णावलयः स्फुटतया अराजन्त। अशुभशङ्किषु अपि परिजनेषु देवस्य हर्षस्य मनसि भूयसी प्रतीतिः एषा जाता—'यस्मादियं वर्णराजिर्दृश्यते, अनेन एकशासनमुद्रिता भूर्भविष्यति इति निवेदितं निमित्तेन शुभेन' इति ताम् अभिनन्द्य मनसा राजा हर्षदेवः तत्रैव तं दिवसम् अयापयत्। अथ रात्र्यां परिणतायां प्रयाणपटहः समताड्यत। पूरितञ्च राजद्वारम् उद्घोष्यमाणनाम-धेयैः भूपतिभिः।

अथ उदिते एव भगवति मरीचिमालिनि प्रयियासुः नरपतिः प्रणमतां राजलोकानां सुभटानाञ्च यथायथं सम्मानेन प्रयाणमर्य्यादां विभज्य प्रतस्थे। ततः कियन्तम् अध्वानं गत्वा शिविरसन्निविष्टं तं प्रविश्य प्रतीहारो व्यजिज्ञपत्,—'देव! द्वारि स्थितः प्राग्ज्योतिषेश्वरकुमारेण प्रेषितो हंसवेगो नाम दूतः' इति। राजा 'शीघ्रमेनं प्रवेशय' इति तम् आज्ञापयत्। अथ प्रविशन्तं तम् अपृच्छत्,—'हंसवेग! अपि कुशलं कुमारस्य?' इति। स प्रत्यवादीत्,—'साम्प्रतम् असौ कुशली,—येन देवेन एवं स्नेहसिक्तया वाचा पृच्छ्यते' इति।

क्षणं स्थित्वा असौ पुनः अब्रवीत्,—'यदि च दुर्लभं देवस्य अनुरूपं जगति प्राभृतं, तदपि सन्देशम् अशून्यं करणीयम् इति अस्मात् कारणात् प्रभुणा पूर्व्वपुरुषोपार्ज्जितं वारुणम् आतपत्रम् आभोगाऽऽख्यं प्रेषितं तत् इदम् अनुरूपस्थानन्यासेन, कृपया प्रतिगृह्यताम्। अस्य च बहूनि आश्चर्य्याणि सन्ति;—प्रतिदिनं प्रविशति अस्मिन् चन्द्रमसः किरणावलितः एकैकः रश्मिः शैत्यार्थं छायायाः। प्रविष्टे च चन्द्रकिरणे प्रच्यवन्तेऽस्य मणिमयशलाकाभ्योऽच्छा धाराः सोममयूखानां बहुशः। यः खलु वरुण इव चतुर्णाम् अम्भोधीनाम् अधिपतिः भूतो भावी वा, तमेव सेवते छायया, न इतरमिदम्। नेदं जातवेदसा दह्यते, पृषदश्वेन न क्षियते, नोदकेन आर्द्रतां नीयते, न रजोभिः मालिन्यं प्राप्यते, नापि जरया जीर्य्यति। तदेतत् अनुगृह्यतां देवेन कटाक्षपातेन, सन्देशं कमपि सुविश्रब्धं श्रोष्यति' इत्यभिधाय पश्चाद्वर्त्तिनं पुरुषं प्राब्रवीत्,—'भद्र! दर्शय एतद् देवस्य' इति।

अथ तेन तत् निचोलकात् निष्कोषितं राजा राजन्यगणपरिवृतः साश्चर्य्यम् अवलोकयन् 'त्रिभुवनरत्नम् एतदद्भुतम्' इति

ननन्द। दृष्टे च तस्मिन् राज्ञा, अपराण्यपि उपायनानि प्रदर्शयामास सः। 'प्रथमे प्रयाणे शोभनं निमित्तमिदम्' इति मनसा प्रीयमाणो हंसवेगमाबभाषे,—'भद्र! एतस्य आतपत्र-रत्नस्य कुमारात् लाभोऽतीव प्रीतिं जनयति, तत् विश्रम्य-ताम्' इत्यभिधाय स्वयम् आभोगस्य तस्य छायाम् अधितष्ठौ। एवम् आनन्दम् अनुभवन् तं दिवसम् अनयत्।

अथ रजन्यां विसर्जितपरिजनो हंसवेगम् आहूय आदिदेश सन्देशकथने। स च प्रणम्य कथयितुम् आरेभे,—'देव! आसीत् पुरा नरको नृपतिः महावीरः। स इदं वरुणस्य प्राणसमं छत्र-रत्नं जहार। तस्य महासत्त्वस्य अन्ववाये भगदत्तप्रभृतयो राजानः समभवन्; तेषु च कालेन व्यतिगतेषु भूतिवर्म्मा नाम नरपतिः अजायत। तस्मिन् पुनः देवभावं गते, चन्द्रमुखवर्म्मा तत्पुत्रः तदीयं सिंहासनम् अभजत। तस्मिंश्च स्वर्गते तत्पुत्रः स्थितिवर्म्मा राज्यम् अवाप। ततः सुस्थिरवर्म्मा नाम तत्पुत्रो महाराजपदवीं लेभे, यं मृगाङ्क इति लोका आहुः। तस्य च सुगृहीतनाम्नः देवस्य श्यामाऽभिधानायां महादेव्यां भास्कर-वर्म्माऽपरनामा तनयः कुमारः समजायत। सोऽयं कुमारः जगदेकवीरेण देवनिभेन देवेन सख्यम् इच्छति, तत् आज्ञादानेन अनुमोदतां देवः; अनुभवतु साम्प्रतं देवस्य गाढाऽऽलिङ्गनसुखं कामरूपेश्वरः। न अभिनन्दति चेत् एतं प्रणयम् अस्य देवः,—तत् आज्ञापयतु, किमस्य कथनीयम्?' इति।

अथ भूपतिः तं सादरम् अब्रवीत्,—'हंसवेग! कथमिव तथाविधे गुणवतां प्रवरे मादृशस्य अन्यथा स्वप्नेऽपि प्रवर्त्तेत हृदयम्? अतिशुभः सङ्कल्पः कुमारस्य। स्वयम् असौ बाहु-वीर्य्यशाली मया च समालम्बितशरासनेन सख्या किमिव न

अधिकरिष्यति ? तत् तथा यतस्व,—यथा न चिरम् इयं क्लेशयति अस्मान् कुमारदर्शनोत्कण्ठा' इति ।

अथ प्रभाते प्रभूतानि प्रतिप्राभृतानि प्रधानप्रतिदूताधिष्ठितानि दत्त्वा हंसवेगं व्यसर्ज्जयत् । स्वयमपि तत आरभ्य अविरतैः प्रयाणैः अभ्यमित्रम् अयासीत् ।

प्रयांश्च कियन्तम् अध्वानं राज्यवर्द्धनभुजोपार्ज्जितम् अशेषं मालवराजसैनिकम् आदाय समागच्छन्तं भण्डिं शुश्राव। तत्र च अभिनवेन पुनः भ्रातृशोकस्मरणेन सम्पोड्यमानहृदयस्य शिविरं प्रविशतः सहसा भण्डिरागत्य अधोमुखो मुक्तकण्ठं रुदन् पादयोः पपात । राजा च सुचिरम् अतिकरुणं प्रारोदीत् । अथ कथञ्चिदिव प्रशान्ते मन्युवेगे देवो हर्षः क्षणं स्थित्वा भ्रातृमरणवृत्तान्तम् अपृच्छत् ; अब्रवीच्च यथावृत्तं भण्डिः । अथ राजा पुनः अकथयत्,—'राज्यश्रीवृत्तमाख्याहि' । सोऽवदत्, 'देव ! देवभूयं गते राज्यवर्द्धने, गुप्तनाम्ना च गृहीते कुशस्थले, राज्यश्रीः परिभ्रश्य बन्धनात् विन्ध्याटवीं सपरिजना प्रविष्टेति लोकमुखात् श्रुयते वार्त्ता । अन्वेषणाथञ्च तस्याः प्रहिताः कतिपये जना नाद्यापि निवर्त्तन्ते' इति । तदाकर्ण्य राजा अवादीत्,—'यत्र सा, तत्र अहमपि गमिष्यामि । भवान् कटकम् आदाय प्रवर्त्ततां गौड़ाभिमुखम्' ।

अथ अन्येद्युः स्वसारम् अन्वेष्टुं हयसाधनैः कतिपयैः प्रातिष्ठत विन्ध्याचलम् ; प्रापच्च कतिपयैः एव अहोभिः तम् । प्रविशंश्च दूरतो वनग्रामम् अद्राक्षीत्, प्राविशच्च तत्रैव इति ।

अष्टम उच्छ्वासः ।

अथ अन्येद्युः देवो हर्षः तस्मात् वनग्रामात् निर्गत्य विन्ध्या-

टवीम् अविशत्; पर्य्यटच्च तत्र समन्तात् बहून् दिवसान्। कदाचित् परिभ्रमतः तस्य भूपतेः व्याघ्रकेतुः नाम कश्चित् आटविकसामन्तस्य शरभकेतोः सूनुः कुतोऽपि शबरयुवानम् एकम् आदाय सन्निकर्षम् आगच्छत्, व्यज्ञापयच्च,—'देव! एतस्य खलु विन्ध्यस्य स्वामी शबरसेनापतिः भूकम्पो नाम। तस्य अयं निर्घातनामा स्वस्त्रीयः सर्व्वस्य अस्य विन्ध्यारण्यस्य पर्णानामपि अभिज्ञः, किमुत तत्प्रदेशानाम्' इति। नृपतिः तम् अपृच्छत्,—'भद्र! काचित् रूपवती नारी दर्शनपथम् आगता तव?' इति। स प्रत्यवोचत्,—"न एवंरूपा काऽपि दृष्टिपथं गता, इदानीं तावत् देवाऽऽदेशात् अन्वेष्टुं यतिष्ये। इतश्च न अतिदूरं दिवाकरमित्राऽऽख्यः काऽपि पाराशरी गिरिनदीम् आश्रित्य प्रतिवसति, स यदि विन्देत वार्त्ताम्' इति। तत् आकर्ण्य राजा चिन्तयामास,—'श्रूयते,—स्वर्गतस्य ग्रहवर्म्मणः शैशवमित्रं दिवाकरमित्रो नाम युवा एव सौगतधर्म्मम् आश्रित्य काषायपरिवीती व्यचारीत्' इति। प्रकाशम् अवादीत्, 'भद्र! उपदिश्यतां तन्निवासस्थानं, यत्रासौ प्रतिवसति'।

अथ नरपतिः तेन निर्घातेन सह गत्वा तरुषण्डमध्यवर्त्तिनं दिवाकरमित्रं दृष्ट्वा, शिरसा मनसा वाचा च वन्दित्वा व्यजिज्ञपत्,—'भगवन्! मम हि विनष्टनिखिलप्रियजनस्य जीवितनिबन्धनं एकैव यवीयसी भगिनी अवशिष्टा। साऽपि भर्त्तृवियोगात् वैरिपरिभवम् असहमाना विन्ध्याटवीम् अविशत् इति वार्त्ता। ताञ्च अन्वेष्टुं वयम् अविरतम् इमाम् अटवीं पर्य्यटामः, न च एषा अधिगम्यते। तत्कथयतु गुरुदेवः, यदि कदाचित् वनं पर्य्यटता दृष्टिपथं गता सा भवतः श्रुतिपथं वा' इति।

तत् आकर्ण्य जातानुकम्पः पाराशरी समभ्यधात्,—'भद्र! न अधिगतः कश्चिद् वृत्तान्त एवंरूपः' इति ब्रुवति एव तस्मिन्,

कश्चिज्जातकरुण इव भिक्षुः ससम्भ्रमम् आगत्य उपरचिताञ्जलिः समभाषत,—'भगवन् भदन्त! महत् खलु करुणं वर्त्तते, परित्रायस्व,—बाला काचित् बलवद्व्यसनाभिभूता इव दृश्यमाना कल्याणरूपा वैश्वानरं प्रवेष्टुम् उद्यता' इति। तत् आकर्ण्य राजा सञ्जातानुजाशङ्कः प्राह,—'भद्र! कियद्दूरे सा? —कथं वा आर्य्यस्य दृष्टिपथं गता?' इति।

तथाऽभिहितोऽसौ भिक्षुः प्राब्रवीत्,—"महाभाग! श्रूयताम्,—अहम् अद्य प्रत्यूष एव यदृच्छया गतवान् अतिदूरम्। गत्वा च एकस्मिन् वनलतागहने नारीणां रुदितम् अशृणवम्; सञ्जातकृपश्च तम् उद्देशं गतोऽस्मि; दृष्टवान् च अस्मि परं कारणं करुणायाः योषितमेकाम्; अचिन्तयञ्च 'चित्रमिदम्!! ईदृशीमपि आकृतिम् अभिभवति दारुणः सन्तापः!!' इति। सन्निहितञ्च मां काऽपि अन्यतरा योषित् तस्मात् स्त्रैणादुत्थाय समब्रवीत्,—'भगवन्! सर्व्वभूतानुकम्पनपरा प्रायेण प्रव्रज्या श्रूयते; तत् इयं नः स्वामिनी पितुः अवमानेन, भर्त्तुः वियोगेन, भ्रातुः अकालमृत्युना, शेषस्य बान्धववर्गस्य भ्रंशेन च सवाष्पनयनं भृत्यवर्गं विहाय अग्निं प्रविशति; परित्रातुम् अर्हति'। अहन्तु तत् आकर्ण्य समुद्विग्नतरः शनैः अवदम्,—'आर्य्ये! यथा कथ्यते, तथा, शक्यते चेत् मुहूर्त्तमात्रमपि त्रातुं, तदा न व्यर्थेयं प्रार्थना भविष्यति। मम आचार्य्यः सन्निहित एव। तदन्तिकम् अस्मिन् वृत्तान्ते कथिते, अवश्यमेव असौ समागत्य प्रतिविधास्यति। सुकोशलेन कुशलशीलामिमां कियन्तं कालं प्रबोध्य रक्षतु भवती, अहम् अविलम्बेनैव गत्वा व्यतिकरम् इमं गुरवे निवेदयिष्यामि' इत्युक्त्वा भवदन्तिकम् उपागाम"।

तदाकर्ण्य राजा श्रमणाऽऽचार्य्यमब्रवीत्,—'भगवन्! नियतं सा एव इयम् अनार्य्यस्य अस्य हतभाग्यस्य स्वसा इति विदीर्य्य-

मामेव इदं हतहृदयम् आवेदयति, तत् सत्वरं परित्रायताम्' इत्युक्त्वा तमपि भिक्षुम् अब्रवीत्,—'आर्य्य! दर्शय पन्थानं, क्व असौ? तत्र गच्छामः,—यदि कथमपि जीवितां पश्यामः'।

अथ सर्व्वे ते गतवन्तः तम् उद्देशम्; दृष्टवन्तश्च वैश्वानर-प्रवेशोद्यतां राज्यश्रियम्। अथ भ्राता हर्षस्तां ससम्भ्रमम् अग्नि-सान्निध्यात् आक्षिप्य तरुतलम् आनीतवान्। दृष्ट्वा च भ्रातरं सुचिरमतिकरुणं विललाप सा। परिजनैश्च महता प्रयत्नेन प्रबोध्यमाना कथङ्कथमपि निवर्त्तितवती। ततः स्वमारं शनैः अब्रवीत् राजा,—'वत्से! वन्दस्व भगवन्तं श्रमणाऽऽचार्य्यम, एष ते भर्त्तृहृदय द्वितीयं, गुरुश्च अस्माकम्' इति। ततश्च भ्रातृवच-नात् पतिवार्त्ताऽऽकर्णनप्रसङ्गेन पुनरपि अश्रुपूर्णलोचनायां राज्यश्रियां नमन्त्यां आचार्य्यः दीर्घं निश्वसन् सुहृच्छोकेन, क्षणं स्थित्वा मधुरया वाचा समभ्यधात्,—'वत्से! अलमति-रुदितेन' इति राज्यश्रियमुक्त्वा राजानं पुनरवादीत्,—'वत्स! गम्यतां पुनः मदीया आवासभूमिः' इति।

ततो राजा सपरिजनां भगिनीमादाय तमेव देशं गत्वा आबन्धनात् पावकप्रवेशोद्योगपर्य्यन्तं सर्व्वं वृत्तान्तं स्वसुः परिजनात् शुश्राव। तथा श्रवणकातरञ्च तं देवं हर्षं श्रमणा-ऽऽचार्य्यः सान्त्वयन् प्रोवाच,—'श्रीमन्! श्रूयतां तावत्, वक्तव्यमस्ति किञ्चित्,—एकदा नागार्ज्जुनेन नाम भिक्षुणा नागराजात् अद्भुतप्रभाभासिना विषसन्तापशमनी मन्दाकिनी नाम एकावली लेभे। स च शातवाहनाभिधानाय राज्ञे सख्ये तां दत्तवान्। सा च इयं कालेन शिष्यपरम्परया अस्माकं हस्तं प्राप्ता। यदि च परिभव इव भवादृशां दानम् उपचारः, तथाऽपि औषधिबुद्ध्या धीमता सर्व्वसत्त्वरक्षाप्रवृत्तेन विषमन्तापात् रक्षितुकामेन गृह्यताम्' इत्युक्त्वा तां मन्दाकिनीं

राज्ञे प्रादात्। राजा च तां प्रभूतैः मयूखैः भासमानां सर्व्वाऽऽशापूरणीं दृष्ट्वा सादरम् अग्रहीत्। गते च एकावली-प्रसङ्गे प्राप्तविश्रम्भा राज्यश्रीः ताम्बूलकरङ्कवाहिण्या पत्रलेखया हर्षं विज्ञापयामास,—'काषायग्रहणानुज्ञया अनुकम्प्यतामियम् अपुण्यभाजनं ते भगिनी' इति। राजा तु तदाकर्ण्य किमपि नाभ्यधात्। अथ आचार्य्यः विविधैः प्रबोधवचनैः सान्त्वयामास ताम्। ततश्च भूपतिः सविनयम् आबभाषे श्रमणाऽऽचार्य्यम्,—'प्रार्थनाऽस्ति काचित् विषयस्यास्य,—इयमस्माकं भगिनी सर्व्वकार्य्योपरोधेनापि पालनीया नित्यम्; अतः अद्यावधि यावदहं लघयामि प्रतिज्ञाभारं, तावदिमाम् अत्रभवतः धर्म्याभिः कथाभिः अस्मत्पार्श्ववर्त्तिनीमिव प्रतिबोध्यमानामिच्छामि। इयं पुनः अवसितकृत्येन मयैव समं ग्रहीष्यति काषायाणि' इति उक्त्वा तूष्णीम्बभूव भूपतिः। अथ आचार्य्ये तस्मिन् 'तथा' इति अभिनन्दितप्रणये प्रीयमाणः राजा तत्र तां रजनीम् अतिवाह्य, प्रभाते वसनालङ्कारादिभिः परितोष्य विसर्ज्य च निर्घातम् आचार्य्येण सह स्वसारम् आदाय कटकम् अनुजाह्नविनिविष्टं प्रत्यागमत्।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचितं

सङ्क्षिप्तश्रीहर्षचरितं समाप्तम्।

कादम्बरीकथासङ्ग्रहः।

प्रणम्य परमात्मानं श्रीजीवानन्दशर्म्मणा।
कादम्बरीकथासारः क्रियते छात्रबोधकः॥

अस्ति विदिशानाम्नी नगरी। तस्यामासीत् शूद्रको नाम नरपतिः। एकदा काऽपि मतङ्गदारिका तस्मै वैशम्पायन-नामानं कमपि गुणवन्तं शुकमुपाहरत्। स च शुकः दक्षिणं चरणमुद्धृत्य जयशब्दपूर्व्वम्;—

"स्तनयुगमश्रुस्नातं समीपतरवर्त्ति हृदयशोकाग्नेः।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्॥"

इत्यार्य्यया नृपस्य लोकोत्तरं प्रतापमाख्यत्। राजा तं गुणसागर-मालोक्य कौतुकात्—"कस्त्वम्?—क्व ते जन्म?—कः पिता?—का च माता?—कथं शास्त्राणामधिगमः?—किं जन्मान्त-रानुस्मृतिः, उत वरप्रभावः?—कथं पञ्जरबन्धः?—कुत आग-तम्?" इति पृष्टश्च सः निखिलमात्मवृत्तान्तमवर्णयत्,—"देव! विन्ध्यारण्ये पम्पासरसस्तीरे मम जन्म, मां प्रसूयैव जननी मे प्रसववेदनया परलोकं गता, विवर्द्धितश्चाहं पित्रा न्यवसम। कदाचित् कोऽपि मृगयुः तमुद्देशमागत्य बहुभिः शुकैः सह तातं निजघान; अहन्तु दैवात् ततो मुक्तः पथि लुण्ठन् मुनिना हारीतेन तेनैव पथा गच्छताऽऽश्रमं नीतः। तस्य पिता जावालिर्नाम महातपाः मामवलोक्य सन्निहितान् मुनीन् अवदत्,—'स्वकृतस्याविनयस्य फलमनेन भुज्यते'। श्रुत्वा च तद्वचनं सर्व्वे मुनयः मद्वृत्तान्तश्रवणकुतूहलिनः—'कोऽयम्?—

कीदृशो वा अविनयः कृतोऽनेन?' इत्यादि सविनयं तं पप्रच्छुः। मुनिरप्याह, शृणुत,—

'आसीत् तारापीड़ो नाम नृपतिरवन्त्याम्। तस्य पत्नी विलासवती नाम पुत्रार्थं बहूनि व्रतानि अकरोत्; तुष्टाश्च देवास्तेन। अथैकदा राजा प्रभातप्रायायां रजन्यां महिष्या वक्त्रे प्रविशन्तमिन्दुं दृष्ट्वा, स्वप्नोत्थितः स्वं मन्त्रिणं शुकनाममाहूय तं सर्व्वं स्वप्नवृत्तान्तं कथयामास। तदाकर्ण्य मन्त्री प्रोवाच,—'राजन्! द्वितीयमिव चन्द्रं पुत्रं लप्स्यसे। मया च अद्य स्वप्ने दृष्टं,—मम मनोरमाया भार्य्याया अङ्के पुण्डरीकमापतितम्' इति।

अथ गच्छता कालेन राज्ञी कुमारमप्रतिमरूपमसूत, मनोरमा च तथैव सुपुत्रम्। राजा 'चन्द्रः महिष्या वदने प्रविष्टः' इति स्वप्नानुसारेणैव पुत्रं 'चन्द्रापीड़ः' इति नाम्ना चकार। मन्त्री तु पुत्रस्य 'वैशम्पायनः' इति नाम ददौ। चन्द्रापीड़-वैशम्पायनयोराजन्म तथा सौहृदमवर्द्धत,—यथा क्षणमपि परस्परवियोगं न सेहे परस्परम्। स च राजतनयस्तेन मान्त्रपुत्रेण सह शैशव एव सर्व्वासु कलासु पारं जगाम। कालेनोपारूढ़यौवनश्च पितृदत्तैः बहुभीरत्नजातैरिन्द्रायुधाख्येन चाश्ववरेण भृशं मोदमगमत्। अत्रान्तरे जनन्या प्रहितां पत्रलेखाऽऽख्यां कामपि ताम्बूलकरङ्कवाहिणीं लब्ध्वा, तस्यां परां प्रीतिमधत्त। अथ राजा पुत्रं तथाविधं विनीतं प्रकृतसुभगं प्रकृतिरञ्जनञ्च विदित्वा, स्वभुजादवरोप्य राज्यभारं स्वयं निर्वृतिं लिप्सुः यौवराज्येऽभिषिषेच।

कियता कालेन स युवराजः बहुभिः सामन्तराजैः वैशम्पायनेन चानुगम्यमानो दिशो जेतुं प्रस्थितः, प्राक् प्राचीं, ततो याम्यां, ततश्च प्रतीचीं, समनन्तरञ्च कौबेरीं

विजिग्ये। अथोत्तरस्यां कैलाससन्निधिचराणां हेमजटनाम्नां किरातानां सुवर्णपुराऽऽख्यं जनपदं नातिदूरवर्त्तिनं पूर्व्व-सागरस्य जित्वा, तत्रैव कृतशिविरसन्निवेशः मृगयां चरन्, एकदा किन्नरमिथुनमपश्यत्, अन्वधावच्च तज्जिघृक्षुः प्रजविना तुरगेण। क्रमेण हस्तप्राप्तमिव तत् सुदूरं नीत्वा राजपुत्रं तिरोबभूव। इत्थं महावेगिना इन्द्राऽऽयुधेन मुहूर्त्तादेव पञ्च-दशयोजनमध्वानं जगाम राजतनयः। अध्वश्रमार्त्तश्च राज-पुत्रस्तत इतः सलिलमन्विष्यन्, अच्छोदं नाम सरः सम्प्राप्य दर्शनेनैवापगतक्लमः तत्सलिलममृतस्वादु पीत्वा, कियन्तं कालं तत्तीरे विश्रान्तः, उत्तरेण दिव्यं सङ्गीतस्वरमाकर्ण्य, तत्प्रभवं जिज्ञासुस्तदनुसरन् पुरतः भगवतः पिनाकिनः शून्यं सिद्धाय-तनं रम्यमपश्यत्। तत्र च गत्वा भगवन्तं चन्द्रशेखरं भक्त्या प्रणम्य, तत्र स्थितां भगवद्गुणान् गायन्तीं कामपि दिव्ययोषितं ज्योत्स्नाधवलकान्तिमष्टादशवर्षदेशीयामवलोकयामास; विसि-स्मिये च तद्रूपसम्पदा हारिणा गीतेन च। अथ तत्र स्थितं सा दिव्याङ्गना अवसितसङ्गीता भगवन्तं देवं प्रदक्षिणीकृत्य प्रणम्य च, तस्मिन्नभ्यागते सुधास्निग्धां दृष्टिमपातयत्; अवोचच्च मधुवर्षिण्या वाचा,—"स्वागतमतिथये? आश्रममेहि, पूज्यो-ऽतिथिरसि" इति। एवमभिधाय वाचैव सूनृतया कृताऽऽतिथ्यं तं राजसुतम् आश्रमं नीत्वा विधिवत् पूजयामास; पप्रच्छ च कृताऽऽतिथ्यं सुखाऽऽसीनं,—"महाभाग! कस्त्वम्?—कुत इमां भूमिमनुप्राप्तोऽसि?" इति। स त्वेवमनुयुक्तस्तुरगमुखानुसरणान्तं सर्व्वमात्मवृत्तान्तमकथयत्।

अथ तां स्ववार्त्ताकीर्त्तने परमप्रीतां स्निग्धामिवाऽऽलोक्य विनयादपृच्छत्,—"देवि! भवत्याः क्व जन्म?—किमसि देवी?—वा विद्याधरी?—वा काऽपि गन्धर्वी? प्रथमे वयसि च कोऽयं

परिहृतभोगस्तपसि आवेशः ?—कथञ्चेदृशो वपुषश्चन्द्रधवला कान्तिः ?" इति । तथाऽनुयुक्ता च सा दीर्घं निश्वस्य, अश्रुभिरभिवृष्टां पुरोभूमिं चक्रे । तदवस्थाञ्च तां दृष्ट्वा राजसुतः आत्मानं कृतापराधमिवाऽऽशङ्क्य, नयनवारि परिमार्ष्टुं सलिलमञ्जलिना उपाहरत् । सा च तेन सलिलेन प्रमृज्य लोचने, निजवृत्तान्तमाख्यातुमुपचक्रमे,—"महाभाग ! अस्ति चेत् कौतुकं, तत् समासेन स्ववृत्तं कथयामि, श्रूयताम् ;—

सन्ति अप्सरसां चतुर्दश कुलानि लोकेषु विदितानि । एकं भगवतः पद्मयोनेः मनसः समुत्पन्नम्, अन्यत् वेदेभ्यः, अपरम् अग्नेः, अन्यत् अनिलात्, एकममृतात् मथ्यमानादुत्थितम्, एकं सलिलात्, अन्यत् सूर्य्यकरेभ्यः, अपरं चन्द्रमयूखेभ्यः, अन्यत् पृथिव्याः, अन्यत् तड़िद्भ्यः निर्गतम्, एकं मृत्युना कल्पितम्, एकम् अनङ्गेन, अन्ये द्वे प्रजापतेर्दक्षस्य अतिप्रभूतासु आत्मजासु मुनेः अरिष्टायाश्च द्वाभ्यां तनयाभ्यां जाते । तत्रामृतदीधितेः करात् यदुत्पन्नं, तस्मात् गौरी नाम कन्या समुदपादि,- ये च दक्षसुतायामरिष्टायां गन्धर्वाः समुत्पेदिरे तुम्बुरुप्रभृतयः षट् पुत्राः ; तत्र ज्येष्ठः मम पिता हंसो नाम । स चास्मिन् किम्पुरुषे वर्षे गन्धर्व्वाणामधिपतिर्भूत्वा गौरीं तां गौरीमुदवहत् ।

अथ सुचिरं बहून् भोगान् भुञ्जानयोस्तयोर्विहरतोः कालेन दुर्लक्षणाऽहमेकैव दुहिता समुत्पन्ना । अतीवधवलकान्तिं मां दृष्ट्वा पिता मे 'महाश्वेता' इति नाम सोत्सवमकरोत् । क्रमेण सुसुखं शैशवमतीत्य यौवनमारूढ़ा, मात्रा सहैकदा अस्मिन्नेव सरसि अच्छोदे स्नातुमागच्छम् । अत्राऽऽगत्य सख्या सह सलीलं विहरन्ती दूरतः समायान्तं दिव्यं कमपि कुसुमगन्धमजिघ्रम् । कौतुकात् तद्गन्धलोभाऽऽकृष्टा कियन्तं दूरं

गच्छन्ती, आगच्छन्तं मूर्त्तमिव कामं कमपि मुनिकुमारं, श्रवणे च तस्य हारिणीं कामपि कुसुममञ्जरीमपश्यम्; दर्शनेनैव स्मराऽऽत्तहृदया विह्वला च तत्सहचरं कमप्यपरं मुनिबालकं नत्वाऽपृच्छं,—'कोऽयं युवा?—कुतश्चेयं लब्धा?' इति। स मामवदत्,—'यदि कौतुकं, श्रूयताम्,—अस्ति श्वेतकेतुर्नाम महातपाः दिवि महामुनिः। कदाचित् देवार्च्चनार्थं कमलान्याहर्त्तुं मन्दाकिनीमवतरन्तं मुनिं दृष्ट्वा तद्रूपसम्पदा विमोहिता कमलाऽऽलया लक्ष्मीः कमलवन एव कृतार्थतामगमत्; अददाच्च तत्क्षणजातं तनयमस्मै महर्षये 'तवायम्' इति। स च महामुनिस्तं शिशुमादाय तस्य पुण्डरीकजन्मतया 'पुण्डरीकः' इति नाम कृतवान्। सोऽयं लक्ष्म्यास्तनयः पितृतो लब्धसर्व्वविद्यः, अद्य मया सह कैलासादवतरन् नन्दनवनदेवतया दृष्टः; दृष्ट्वा चैनमतिरमणीयाऽऽकृतिं 'तवैव कर्णाऽऽभरणयोग्येयं पारिजातकुसुममञ्जरी' इति प्रोच्य, सा अनिच्छतोऽप्यस्य कर्णे मञ्जरीमितां न्यदधात्, इति योऽय, यथा चेयमासादिता, तत् सर्व्वमावेदितम्' इति।

अथ विरते तस्मिन्, स तपोधनयुवा ईषद् विहस्य मामवादीत्,—'कुतूहलिनि! किमनेन कष्टप्रश्नेन?—यदि ते स्पृहाऽस्ति, तत् गृह्यतामियम्' इत्युक्त्वा स्वकीयात् श्रवणादपनीय, सस्पृहं मदानने दत्तदृष्टिस्तां मदीय एव श्रवणे स्वयं न्यदधात्। तदानीञ्च अङ्गुलिकपोलयोः सङ्गादुभयोरेव स्मराऽऽवेशः समजनि। तत्करतलात् पतन्तीञ्चाक्षमालां तेनालक्षितामेवाहमग्रह्णां, न्यदधाञ्च स्वकण्ठे। इत्थम्भूते च व्यतिकरे, मातुराज्ञया अनिच्छन्तीमपि कथञ्चिदेव गन्तुमुद्यतां मां सकोप इव स प्राह,—'चपले! अपहृतामक्षमालामदत्त्वा पदात् पदमपि न गन्तव्यम्' इति। अहन्तु,—'गृहाणेमामक्ष-

मालाम्' इत्युक्त्वा, अचेतनतया स्वकण्ठात् एकावलीमुन्मुच्य तन्मुखार्पितदृष्टेः तस्य प्रसारितकरकमले निहितवती। ततश्च मदीयताम्बूलकरङ्कवाहिनीं मामनुगच्छन्तीमागत्य सोऽब्रवीत्,—'कल्याणिनि! केयं तरुणी?—दुहिता वा कस्य?—याति वा कुत्र?' इति। ततस्तया निखिले सद्वृत्तान्ते कथिते, स युवा वल्कलप्रान्तमापाद्य तमालपल्लवरसेन निजपाणिकमल-कनिष्ठाङ्गुलिनखराग्रेण च तत्र,—

'दूरं मुक्तालतया बिसासितया विप्रलोभ्यमानो मे।
हंस इव दर्शिताऽऽशो मानसजन्मा त्वया नीतः॥'

इत्यार्य्यां विलिख्य पुनः सप्रणयं मत्सखीमाह स्म,—'वत्से! लेख्यमिदं त्वया प्रच्छन्नमस्यै सुन्दर्य्यै देयम्' इति। सा तु तरलिका नाम जवेन मत्पार्श्वमागत्य, तद्विरहार्त्तां मां सञ्जीवयन्ती प्राह,—'भर्त्तृदारिके! यदर्थं खिद्यसि, तेनेयं पत्रिका तुभ्यं दत्ता' इति ताम्बूलभाजनात् तामाकृष्य मह्य-मदात्। अहन्तु तत्र तामार्य्यां वाचयित्वा, बुद्ध्वा च तदर्थं पुनरपि नितरां कामाग्नितप्ता,—'काऽहम्?—केयम्?—क्वाऽऽसम्?—किं करोमि?—कोऽत्र प्रतीकारः?' इत्यादिकं किमपि तदा नाध्यगच्छम्।

अथापराह्णे छत्रधारिणी मे समुपेत्य मामवदत्,—'भर्त्तृ-दारिके! यौ तौ मुनिकुमारावच्छोदसरस्तीरेऽस्माभिर्दृष्टौ, तयो-रेको द्वारि तिष्ठति, कथयति च—'अक्षमालां प्रार्थयितुमुपा-गतोऽस्मि' इति; श्रुत्वा भर्त्तृदारिका प्रमाणम्' इति। श्रुत्वैव कञ्चुकिनमाहूय—'प्रवेशयैनम्' इति समादिश्य, तेन च प्रवेशितं तस्य सखायं द्वितीयं मुनिकुमारमवलोक्य यथावदभ्यर्च्य,—'किमसौ वक्ष्यति?' इति तन्मुखाऽऽसक्तदृष्टिरासम्। स च सवैलक्ष्यं,—'राजपुत्रि! त्वद्विरहानलेन सन्तप्तो मे सखा, तदेनं

कृपया सञ्जीवय, एष मया अञ्जलिर्विरचितः, यदत्र क्षेमं, तत् कुरु साम्प्रतम्' इति प्राह। 'किमस्मै सन्दिशामि' इति चिन्तयन्त्या एव मे माता श्रुतमदस्वास्थ्यवार्त्ता समागच्छतीति प्रतीहारीमुखादाकर्ण्य, प्रकाशभयाऽस्य चापल्यस्य, असौ मत्प्रत्युत्तरकालमनपेक्ष्यैव तिरोऽभूत्।

अथ सुचिरं स्थित्वा जनन्यां प्रतिगतायां, विरहाऽऽर्त्ता अहं समं तरलिकया कृताभिसरणवेशा तमुद्देशमगच्छम्। गच्छन्ती च दूरात् रुदितध्वनिमिव श्रुत्वा,—'किमेतत्?' इति शङ्किता वेपमानहृदया सत्वरं गत्वा, उपरतमसुं, विलपन्तञ्च तत्सुहृदमपश्यम्। ततश्च तदा विचित्रपदं बहु रुदतीं, विलपन्तीम्, अनुमरणकृतनिश्चयाञ्च मां सहसा चन्द्रमण्डलविनिर्गतः दिव्यः कश्चित् पुमान् नभोदेशात् आगत्य आश्वासयन्नब्रवीत्,—'वत्से! मा त्याक्षीः शरीरं, पुनरनेनैव समागमं लप्स्यसे' इति वदन्नेव, उपरतं तमङ्के गृहीत्वा दिव्यं लोकमगात्। 'किमिदम्?' इति सखायं तं पृच्छन्तीं मां स किमपि नोक्त्वा,—'सखायं मे अपहृत्य दुरात्मन्! क्व यासि?' इति वदन्, बद्धपरिकर एव तमनुससार। अवलोकयन्त्या एव मे सर्व्व एव ते नक्षत्रमण्डलमविशन्। ततश्च तया दिव्यगिरा समाश्वासिता विस्मिता च, त्यक्त्वा सर्व्वान् भोगान् तमेव ध्यायन्ती, तयैव तरलिकया सह वनमिदमध्यवात्सम्"।

इत्यावेदिते तया निखिले स्ववृत्तान्ते, चन्द्रापीड़ः तद्दुःखद्रवीभूतहृदयः शनैः शनैः तां पुनरब्रवीत्,—"देवि! तव सा परिचारिणी इदानीं क्व?" इति। साऽवदत्,—"राजपुत्र! यानि चतुर्दशाप्सरसां कुलानि समासतः प्रागुक्तानि, तत्रामृतादुत्पन्ने एकस्मिन् कुले मदिरा नाम कन्या जाता; तथा दक्षसुतायां मुनौ गन्धर्व्वादुत्पन्नश्चित्ररथो नाम। स चास्मिन् किम्पुरुषे

वर्षं बहूनां गन्धर्व्वाणामधिपतिरासीत्, पर्य्यणयच्च तां मदिराम् ; तयोश्चाभिमतमिन्द्रियसुखं भुञ्जानयोः सुलक्षणा 'कादम्बरी' नाम परमसुन्दरी कन्या जज्ञे। सा च मे बाल्यसखी, मयैव सार्द्धं विविधविद्यया, सङ्गीतशास्त्रेण, बालसुलभाभिः क्रीड़ाभिश्च शैशवमतिवाहितवती। सा तु मदीयेनैतेन दुःखेन नितरां व्यथिता प्रतिज्ञामकरोत्,—'महाश्वेतायां सशोकायां नाहमात्मनः पाणिं ग्राहयिष्यामि ;—यदि अनभिलषन्तीमपि कदाचित् पिता मां बलात् कस्मैचित् समर्पयितुमिच्छति, तदाऽहमुपवासेन वा, अग्निना वा, गरलेन वा, उद्बन्धनेन वा निश्चितमेव जीवितं त्यक्ष्यामि' इति। पितरौ च तदेकापत्यतया श्रुत्वा दुहितुर्निश्चयं, स्वयं किमपि नोक्त्वा मत्समीपं सन्दिदिशतुः,—'वत्से महाश्वेते! त्वयैव मे पुत्री उपदेष्टव्या' इति। अहन्तु तन्नियोगात् ज्ञात्वाऽऽत्मानं तद्वत्, तामुपदेष्टुं मत्पार्श्ववर्त्तिनीं तरलिकां,—'गच्छ त्वं मद्वचसा सखीं कादम्बरीं, किं शोकार्त्तामपि मामतिशयेन शोचयसि? यदि मद्वचनं तव प्रमाणं, यदि च मां जीवन्तीमिच्छसि, तदा कुरु वचनं पित्रोः' इत्युपदेष्टुं प्राहिणवम्। अधुनैव सा प्रयाता, समनन्तरमेव महाभागः प्राप्त इमां भूमिम्" एवमुक्त्वाऽसौ विरता।

अन्येद्युः तरलिका केयूरकनाम्ना केनचित् गन्धर्व्वदारकेण सह समागत्य प्रणम्य च प्राह,—"देवि! अयमार्य्यया प्रहितस्तस्या एव वीणावाहकः केयूरकः सर्व्वमाख्यास्यति" इति। ततः केयूरकेण कादम्बर्य्याः सुनिबन्धे कथिते, महाश्वेता,—"गच्छ त्वम्, अहं स्वयमेव गत्वा यत् कर्त्तव्यं, तत् करिष्यामि" इत्युक्त्वा तं विससर्ज।

अथ याते केयूरके, महाश्वेता चन्द्रापीड़मुवाच,—"राजपुत्र! किन्नरविषयो रम्यः, गन्धर्व्वनगरी हारिणी, देवी च

कादम्बरी महाऽनुभावा मे सखी, यदि ते कौतुकं, गमने च न किञ्चित् हीयते,—तदद्य मया सह तत्र गन्तव्यम्” इति। स प्राह,—“देवि! दर्शनतो भवत्याः परवानयं जनः, तद् यथेच्छसि, तथैव करोमि”इत्युक्त्वा तमेवेन्द्रायुधमारुह्य तया सह गन्धर्व्वराजधानीं गतः; तत्र च कादम्बरीमकाशमवाप। कादम्बरी तु प्राप्तां महाश्वेतामालोक्य कुशलप्रश्नाऽऽदृतां कण्ठे भृशं समालिलिङ्ग; प्रोवाच च,—“कोऽयं त्वया सहाऽऽगतो महाभागः?” इति। तदाकर्ण्य महाश्वेता प्राह,—“सखि! राजपुत्र एष मनुष्येषु गुणसिन्धुः, अतीव प्रियदर्शनः, परं प्रेमभाजनमस्माकं, तदेनं यथावत् समर्हय जितमदनं रूपेण”। एवमुक्ते तया, सा राजपुत्री कादम्बरी तस्य रूपेण धर्षिता, परवशा च मदनेन स्वसमीप एव तस्मै आसनं ददौ। अथ महाश्वेता कृतपादप्रक्षालना तया कादम्बर्य्या सहैकमासनं भेजे; चन्द्रापीड़श्च यथाऽर्हं तदासनमलञ्चकार।

अत्रान्तरे कादम्बरीचन्द्रापीड़योरन्योऽन्यावलोकनात् अनुरागपरवशयोः कोऽपि चेतसि मान्मथो विकारः प्रादुरासीत्। सा सुकेशी पुनःपुनस्तद्वक्त्रं सतृष्णं विलोकयन्ती स्वचक्षुषोः साफल्यं, मनुष्यलोकस्य च धन्यतां रमणीयताञ्चामन्यत। चन्द्रापीड़ोऽपि तदवलोकनेन निजजन्मनः श्रमस्य च साफल्यं, किन्नरमिथुनस्य चानुसरणमुपकारि मेने। अथ हंसदुहिता प्रीत्या विचित्रमालप्य, ताम्बूलदानावसरे सा चित्ररथपुत्री प्रोक्ता,—“सखि! राजपुत्र एषः, प्रीत्याऽस्माभिरद्य समर्चनीयः, तदग्रत एवास्मै ताम्बूलं देहि”। श्रुत्वैतत् सा सव्रीड़माह स्म,—“सखि! लज्जेऽहमनेनोपचारेण, तत् त्वमेवास्मै प्रयच्छ” इति।

अथ सा महाश्वेताया निर्बन्धात् स्वयं दाने नियुक्ता वलितग्रीवा कथमपि अस्मै ताम्बूलमदात्; तदा तत्करकमल-

स्पर्शसुखेन मन्मथाऽऽवेशात् शून्यहृदयतया करविसलयपरिभ्रष्टं निजं रत्नवलयमपि न ज्ञातवती। राजपुत्रस्यापि तत्करतल-सङ्गमे तदा कोऽपि चेतोविकारः प्रादुरभवत्,—येन धीर-प्रकृतिरपि स आत्मनो विकृतिं गूहितुं न शशाक। अनन्तरं मदिराचित्ररथाभ्यां द्रष्टुं समाहूता महाश्वेता तद्दर्शने जिग-मिषुः कादम्बरीमवादीत्,—"सखि! राजसुतस्यास्य यथाऽर्हं स्थानं निर्दिश"। स्मित्वा असौ,—"निखिलकुमाराणां मनांसि अस्याधिवासाय सन्ति, भूयः किं कल्पयामि?" इति मनसा कथयन्ती, व्यक्तमब्रवीत्,—"सखि! दर्शनमात्रादेवाहं स्वशरी-रस्याप्यप्रभुरस्मि, किं पुनर्विभवस्य?—तत् सन्दिश त्वमेव, यत्रास्मै रोचते, यत्र च ते मानसं प्रीतिमेति"।

अथ सा महाश्वेता,—"क्रीड़ापर्व्वतमणिवेश्म अस्य निवा-सार्थं सन्दिश" इत्यादिश्य गन्धर्व्वराजसमीपमगात्। चन्द्रा-पीड़ोऽपि क्रीड़ापर्व्वतमणिमन्दिरं प्राप। तत्र च राजपुत्रा विसृष्टान् विविधान् भोगान् भुञ्जानः, अपराह्णे समागतां सम-नुरूपं हारमादाय कादम्बर्याः प्रधानसहचरीं मदलेखामद्रा-क्षीत्। सा समुपेत्याभ्यधात्,—"युवराज! उदधिः सर्व्वाणि रत्नानि अर्थिभ्यः प्रदित्सुरिमं शेषाऽऽख्यं हारं वरुणाय, वरुणो गन्धर्व्वपतये, असौ च देव्यै कादम्बर्य्यै प्रादात्, देवी च त्वां प्राप्यैव असौ कृतार्थीभविष्यति इत्यवधार्य्य अनुप्रेषितवती; यदि चासौ तव वपुषो नानुरूपः, तथाऽपि देव्याः प्रथमः प्रणय-भङ्गस्त्वया न कार्य्यः" इत्युक्त्वाऽसौ चन्द्रापीड़स्य कण्ठे तं हारं न्यदधात्। स च राजसुतस्तया सह देव्या गुणकथाः कुर्व्वन् भृशं मुमुदे। अथ गतायां तस्यां, कादम्बरी अल्पपरिजना तमभिनन्दितुं क्रीड़ापर्व्वतमाययौ। स च समागतां तां सत्कृत्य भूमावेव उपाविशत्; साऽपि भूतल एव तस्थौ।

अथासौ राजपुत्रः,—"दर्शनमात्रकृतानुग्रहे दासजने कोऽयमादरातिशयः? न खलु स्वस्य गुणलेशं पश्यामि, यत्फलमीदृशः प्रसादस्ते" इत्येवंरूपाभिर्विविधाभिर्वाग्भिस्तां परवशामकरोत्, सा च तं कटाक्षैः। स्थित्वा च कियन्तं कालमसौ राजबाला केयूरकं तत्र नियुज्य प्रायात्। स च तस्मिन्नेव शिलातले केयूरकेण संवाह्यमानचरणः कादम्बर्या महान्तमनुभावम्, अनुरागञ्च महाश्वेतायाः, सौजन्यातिशयञ्च सखीनां, मनसा भावयन् रजनीमत्यवाहयत्।

अथ प्रातः महाश्वेतामुखेन देवीं प्रसाद्य गमनानुज्ञां प्रार्थयमानः प्रोवाच,—"स्मर्त्तव्योऽयं जनः परिजनकथासु कदाचित् देव्या" इति। तस्याः तु कृच्छ्रादनुमतो गमनाय गन्धर्वसूनुभिः साकम् अच्छोदं, तत्र च संस्थापितम् इन्द्रायुधखुरपुटमनुसृत्यैव समागतं निजं स्कन्धावारमाससाद। तत्र च वैशम्पायनप्रमुखैः अमात्यैः, राजन्यवर्गैः, सेनापतिभिश्च भृशमभिनन्द्यमानः गन्धर्वपुरवृत्तं तेभ्यः सङ्कीर्त्तयन् न्यवसत्।

अथापरेद्युः स एव केयूरकः विविधान् भोगानादाय तत्राऽऽगात्। तमागतमभिवीक्ष्य चन्द्रापीडः दूरादेव"एह्येहि"इत्युक्त्वा सादरं पर्य्यष्वजत। तस्माच्च विरहार्त्तामतीव देवीं विदित्वा, अश्वमारुह्य पत्रलेखया केयूरकेण तेन च सह पुनर्गन्धर्वनगरमागात्; आगत्य च हिमगृहमध्यवर्त्तिनीं, स्ववियोगशून्यमनसं, भृशमार्त्तां कादम्बरीं, महाश्वेताञ्च तत्र स्थितां दृष्ट्वा प्रणम्य परिजनोपनीतं काञ्चनमयमासनं चरणेनैव समुत्सार्य्य भूमावेव समुपाविशत्।

अथ केयूरकोऽब्रवीत्,—"देवि! पश्य इमामस्य पार्श्ववर्त्तिनीं द्वितीयं हृदयमिव ताम्बूलदात्रीं पत्रलेखाम्"। तदाकर्ण्य देवी तां यथावत् सत्कृत्य स्वाऽऽसन एव न्यवेशयत्,

अमन्यत च तद्रूपगुणसम्पदाकृष्टचित्ता प्राणेभ्योऽपि प्रियाम्। अथ राजपुत्रः तां तथाभूतां स्वाऽऽलोकनप्रमुदितां भावि-वियोगशङ्कार्त्तांञ्च गन्धर्व्वतनयां पश्यन् सश्लेषमूचे,—"देवि! कामरतिं हृदि कृत्वा अद्य तीव्रः सन्तापः प्राप्तः?" इति। श्रुत्वेदं मदलेखा समुचितमुत्तरं प्रादात्,—"राजपुत्र! कौमार-भाववर्त्तिन्या अस्याः किं किं न घटेत?" इत्थं सश्लेषवचना-दस्याः सन्देहदोलाऽधिरूढहृदयश्चन्द्रापीड़ः महाश्वेतया समं विविधाभिः मधुरालापगर्भाभिः कथाभिः दीर्घकालमतिवाह्य, तत्प्रेमपाशबन्धनादात्मानं कथञ्चित् मोचयित्वा तत्सन्नि-धानात् स्कन्धावारं जिगमिषुर्गमनानुमतिं ययाचे। देवी तु कथञ्चित् गमने मौनेनैव कृतानुमतिः केयूरकमुखेण,—"यास्यति पत्रलेखा पश्चात्, इदानीमेषा तिष्ठतु" इति सादरमनुरुरोध। स च,—"देवीप्रसादमेषाऽनुभवतु"इति तां तत्र स्थापयित्वा पुनः स्कन्धावारं स्वमाससाद; ददर्श च तत्र समागतान् पितुर्लेख-हारान्।"अविलम्बेन कुमारः समायातु" इति लेखार्थमाकलय्य कादम्बरीनिराशः सुहृदं वैशम्पायनं सेनासन्नयनाय, सेनाऽध्यक्षं मेघनादञ्च पत्रलेखाऽऽनयनाय समादिश्य, अश्वमात्रसहायः तदानीमेव प्रतस्थे। आगत्य चातर्कितमेव पित्रोरतुलां मुद-मातत्य, कादम्बरीवियोगसन्तप्तो वहिः सुखितभावं प्रकटयन् तस्थौ। कतिपयदिवसापगमे च कादम्बर्य्या विसृष्टा पत्रलेखा समागत्य देवीविषयं निखिलं वृत्तान्तमावेदयन्ती,—"बहुना किमुक्तेन, देव्याः प्राणास्त्वदायत्ताः, कालातीतेषु जगतां तादृश-रत्नवियोगात् आन्ध्यं स्यात्" इत्युवाच।

इति पूर्व्वकादम्बरीकथासङ्ग्रहः।

उत्तरकादम्बरीकथासङ्ग्रहः।

चन्द्रापीड़स्तु तामवस्थां कादम्बर्य्याः समाकर्ण्य मूर्च्छावशोऽभूत्; कृच्छ्रेण च लब्धसंज्ञः कथमपि गमनाय उपायं विचिन्तयन्, कियन्तं कालं गमयन्, एकदा सिप्रातटे तथैव पत्रलेखया सार्द्धं भ्राम्यन्, त्वरया समायान्तं सानुचरं केयूरकमपश्यत्। आगतञ्च तं दूराऽऽनतं दोर्भ्यामालिङ्ग्य, देवीकुशलं तत्सन्दिष्टञ्चापृच्छत्। "अद्य तु कुशलं देव्याः, यदपृच्छत् भवान् तस्याः कुशलम्; न च किञ्चित् तया मयि सन्दिष्टं, नापि आर्य्यया अहं प्रेषितः। 'यातः कुमारः' इति वाचं श्रुत्वैव सा सुदीर्घं निश्वस्य मूकीभूता केवलं शयनीये लुलोठ, नैवालपत् स्वां सखीं मदलेखां, नाप्यस्मान् पार्श्ववर्त्तिनः परिजनान्। तथास्थिता वयम् एकदा तयोक्ताः,—'कथमत्र यूयं मत्सकाशे स्थिताः? न कार्य्यं मे युष्माभिरत्र स्थितैः' इति। अहन्तु तदभिप्रायं बुद्ध्वैव त्वरया ते पादमूलमुपागतोऽस्मि, तत् साम्प्रतं गमनेन त्वद्विरहानलसन्तप्तां तामचिरेण समुज्जीवयतु देवः" इति केयूरकेणाभिहितः कुमारः समधिकां मूर्च्छामवाप। कथञ्चिदुद्बुध्य च गन्तुमिच्छन् मनसा बहु व्यचिन्तयत,—"कथमद्य पित्रोरभ्यनुज्ञामनवाप्तवतः मम गमनं स्यात्?—किं व्यपदिश्य पित्रोरनुज्ञां लभे? स्पष्टञ्च,—'सा वियोगार्त्ता' इति कथं कथयामि? कस्मिंश्च राज्यधुरां सन्न्यस्य यामि? कश्चात्र कार्य्ये मे सहायो भवेत् तं सुहृदं वैशम्पायनमृते? सोऽप्यद्यापि नाऽऽयातः" इत्येवं चिन्तयतोऽस्य 'प्राप्तः स्कन्धावारो दशपुरमद्य' इति किंवदन्ती श्रुतिपथमानन्दयामास। ततः प्रीत्या केयूरकमाह,—"भद्र! देवी मया प्राप्तेत्यवगच्छ, ममासौ सखा प्राप्तः, यो मे गमने सहायो भवेत्। तत् त्वमेतां पत्रलेखामादाय अग्रतो याहि, अहमनु-

पदम् एवाऽऽगतः। यत् सन्देष्टव्यं, तदेषा स्वयमेव देव्यै निवेदयिष्यति। त्वया च मद्वचसा बद्धाञ्जलिना प्रणम्य सा तथा विज्ञाप्या, यथा आगमनं मे विफलं न स्यात्, यथा च जगत् अन्धं न स्यात्, तथा कार्य्यम्” इति तां पत्रलेखां नियुज्य, सख्युर्दर्शनार्थं पितरौ विज्ञाप्य, कतिपयैरनुचरैः सहित एवातर्कितं दशपुरं प्रायात्।

अथ तत्राऽऽगत्य सुहृदमदृष्ट्वा, सेनाऽध्यक्षान् विषण्णान् विलोक्य अनिष्टं तर्कयन् सुदीनः तान् पप्रच्छ,—“कथमत्र सखा मे न दृश्यते? किमस्य सञ्जातम्?” तं च शिरसा प्रणम्य व्यज्ञपयन्,—“देव! जीवति ते मन्त्रिसुतः सखा वैशम्पायनः, यन्नागतः, तत्र हेतुं शृणोतु देवः;—भवति पितुरादेशात् सत्वरं प्रस्थिते, स हि अस्मानवदत्,—‘श्रूयते अच्छोदं सरः अतीव पुण्यतीर्थं, तदद्य अत्र स्नात्वा सर्व्वे श्वोऽविलम्बेन यास्यामः’ इति। तथोक्त्वा अस्मान्, असौ तत्र स्नात्वा समन्ततः किमपि पश्यन् भ्रान्त इव आविष्ट इव प्रोवाच,—‘नाहं यामि, यूयं व्रजत’ इति। तदवस्थं तं दृष्ट्वा अस्माभिस्तदानयनार्थं बहुशो यत्नः कृतः। यदा चास्य निर्बन्धं निराकर्त्तुं न शक्ता वयं, तदा किङ्कर्त्तव्यविमूढैरस्माभिर्देवपादमूलं समुपस्थितम्” इति।

स च राजपुत्रस्तस्य ईदृशं वैषम्यं शृण्वन्, चिन्तयन्नपि न कमपि तद्धेतुं बुबुधे। “भवतु, स्वयमेव तत्र मया गंस्यते, देवी च तत्रैव द्रष्टव्या” इति निश्चित्य गृहं प्रत्यागम्य मन्त्रिगृहस्थितं विदितवृत्तान्तं शुकनासमाश्वासयन्तं पितरमद्राक्षीत्। राजा च पुत्रमुपस्थितमालोक्य सकोप इव,—“वत्स! तवैवात्र स्खलितं किञ्चिदाशङ्कते मे हृदयं, यन्नाऽऽगतोऽसौ” इति अवदत्। राज्ञस्तादृशीं वाचं निशम्य युवराजः,—“देह्यनुज्ञां वैशम्पायनाऽऽनयनाय, अपयशसश्च

शोधनाय" इत्यवोचत्। शुकनासस्तु श्रुत्वेदं राजानमब्रवीत्,—"किमेवमयुक्तमाशङ्कितं देवेन? नास्य दोषलवोऽपि चन्द्रापीडस्य अनुभूयते, स तु दुरात्मा तिर्य्यग्जातिविचेष्टः स्वस्याविनयस्य विकृतिमचिरादनुभवतु" इति।

अथ शुकनाससुखेन पित्रोरनुज्ञां लब्ध्वा तदानयनाय, सपदि करतलगतां देवीं कादम्बरीममन्यत। कृच्छ्रेण च पितृभ्यां मन्त्रिणा च विसर्ज्जितः अचिरादेव पूर्व्वदृष्टमच्छोदं सरः प्रापत्। तत्र समन्ततोऽन्विष्यन् सुहृदम्, अपश्यंश्च अस्य किमपि चिह्नं "भवतु, गच्छामि तावत् महाश्वेताऽऽश्रमं, तत्-सकाशेऽस्य वृत्तान्तस्योपलब्धिर्भवेत्" इति वितर्क्य तत्रैव जगाम; ददर्श च गत्वा तत्र दीनां तरलिकया धृतदेहां विषादपूर्णां महाश्वेताम्; मेने च तदवलोकनेन महानिष्टं देव्याः कादम्बर्य्याः; अवदच्च तां तरलिकां,—"वद त्वमस्या भगवत्या दुःखहेतुं, नाल्पोऽस्य हेतुरनुभूयते; यतः प्राप्तं मां महाश्वेता नावेक्षते, नैव वदति च किञ्चित्" इति।

इत्येवमापृच्छमानं तं महाश्वेता स्वयमेवावदत्,—"किमेषा वदेत्? अहमेव कथयामि, शृणु,—राजपुत्र! दुःखमिदं श्रोतुं वक्तुञ्च न शक्यम्। भवन्मितो गतं श्रुत्वा, कादम्बर्य्यां निराशा अहं पुनस्तपसे इममेवाऽऽश्रममायाता यथापूर्व्वमतिष्ठम्। एकदाऽहं कमपि विप्रयुवकं भवतः समवयसमद्राक्षम्। स तु मां दृष्ट्वा व्यग्रः प्रोवाच,—'सुन्दरि! किमर्थं त्वया तपः क्रियते? पीड़यति मां मृणालकोमलायाः ते अयं वयसः आकृतेश्च अत्यन्तविसदृशः तपश्चरणाऽऽयासः। भवादृशी चेत् विषयसुखेभ्यः निःस्पृहा कठोरतपसा क्लेशयति आत्मानं, तदा कामोऽधिज्यं धनुर्वृथा वहति। हे कृशाङ्गि! तव रूपमस्य-दाऽहं प्रधर्षितः, विह्वलचेताश्चाभवम्। कामः पञ्चानामत्र

शराणां लक्ष्यं मां करोति, तन्मां पाहि"। अहन्तु तं तस्य दुष्टभावं बुद्ध्वा न किञ्चिदप्येनम् अवोचम् ; अगाञ्च ततोऽन्यत्र, तत्रस्था तरलिकामाहूय,—'वारय दुष्टाऽऽशयमिनं, यथा न पुनरत्र आयाति, आयास्यत् चेत्, नास्य क्षेममभविष्यत्' इति अवदम् ।

अथ स तदानीमकृतार्थः पुनर्निशीथे ज्योत्स्नया धवलोज्ज्वले समुपेत्य, किमपि वाञ्छन् पाणी प्रसारयामास । अहन्तु तदा क्रोधविवशा तथा दुराशयं तमशपम्,—'अहो ! पञ्च भूतानि इत्थमविनीतस्य ते देहमधुनाऽपि न आत्मनि विलाययन्ति ? तिर्य्यग्जातिरिव शुकस्त्वमित्थं प्रलपसि ? तदेतामेव जातिं सद्यः समाप्नुहि, नैवं कदाचिदविनयं पुनः करिष्यसि' इति वाक्यावसान एव स्वकृतात् पापान्, मच्छापवचनान्, गतजीवं भूमौ पतन्तं तमहमपश्यम् ; अश्रौषञ्च तदनु त्वत्सुहृदं तम्'। श्रुत्वैतत् राजपुत्रस्तामाह,—"देवि ! जन्मनि अस्मिन् देव्याः कादम्बर्य्याः सेवां कर्त्तुं न मया पारितम् । जन्मान्तरे त्वमेव तत्समागमविधात्री भव" इति ब्रुवत एव तस्य हृदयमस्फोटत सद्यः । तदवस्थं चन्द्रापीड़ं दृष्ट्वा तरलिका तां महाश्वेतां विहाय "हा ! हा ! किमिदमापतितम् !!" इति कृत्वा तस्य देहं दधार । महाश्वेता तु तदवलोक्य यत् व्यलपत्, तत् केन वक्तुं शक्यते ?

अत्रान्तरे देवी कादम्बरी अच्छोदसरःसमीपमागतं चन्द्रापीड़ं निशम्य, महाश्वेतादर्शनच्छलेन पित्रोरनुज्ञां लब्ध्वा कृताभिसरणनेपथ्या रतिरिव कामं,—"यदि सत्यमागतः स शठः, नाहं तमालपामि, अद्य त्वयैव वक्रोक्तिभिरसौ वाच्यः" इत्येवमुपदिश्यमानया सख्या मदलेखया सार्द्धं पत्रलेखाधृतपाणिः केयूरकेण दर्शिताध्वा आगत्यैव, तदवस्थं तमालोक्य

मोहमगात्। पत्रलेखा अपि कादम्बर्य्याः पाणिमुत्सृज्य उपरतस्य राजसुतस्य समीपमागत्य गतचेतना भूमौ न्यपतत्। कृच्छ्रेण च लब्धसंज्ञा कादम्बरी स्वकृते उपरतं कुमारमवगत्य भृशं मूढेव, लिखितेव निश्चलस्तब्धदृष्टिः, अन्तःस्थशोकभारेण निस्पन्दा, स्त्रीप्रकृतिविरुद्धेन चेतसा अतिष्ठत्। मदलेखा तु कृताऽऽर्त्तनादा तथाऽवस्थितां तामवोचत्,—"भर्त्तृदारिके! मा कुरु शोकं, कुलं पाहि, भवत्या ईदृशीमवस्थां श्रुत्वा पितरौ नियतं प्राणान् प्रहास्यतः" इति। सा तामुवाच,—"मूढे! जिजीविषोः पित्रारक्षणे वाञ्छा भवति, मम तु जिजीविषैव नास्ति, मत्परमनेन सह गन्तुं प्राणास्त्वरन्ते। तत् मदीयं समग्रं द्रव्यजातमर्थिभ्यः प्रयच्छ, क्रीड़ाशैलं कस्मैचित् मुनये प्रदेहि, वीणां स्वयं स्वीकुरु, पितरौ मान्त्वय, मा त्वं मत्कृते शोकं कुरु" एवमुक्त्वा स्वमखीं, महाश्वेतामाश्लिष्याब्रवीत्,—"सखि! प्रत्याशाऽस्ति ते काऽपि, मम तु साऽपि नास्ति, तत् त्वामामन्त्रये, जन्मान्तरे भूयात् पुनस्त्वत्सङ्गमो मे" इति।

अथ सा युवराजदेहं पुष्पैरलङ्कृत्य,—"त्वच्चरणौ मदर्थं क्रान्ता" इति तौ स्वाङ्के निधाय समुपाविशत्। अत्रान्तरे तद्देहतो धवलं ज्योतिरुद्गम्य स्वमुद्गामयन्नब्रवीत्,—"महाश्वेते! पूर्व्वमसि मया समाश्वासिता,—यतः प्राणान् धारयसि। अस्ति च मदीये लोके अक्षत एव देहस्ते पुण्डरीकस्य। समये प्राप्स्यसि पुनः तेन सङ्गमम्। चन्द्रापीड़शरीरान्त्वदं स्वत एवाविनाशि, ममैव देहोऽयम्। विशेषतः कादम्बरीकरतलस्पर्शात् आप्यायितम्। स्वल्पेनैव कालेन शापावसानात् अनया सङ्गंस्यते। भवत्याः विश्वासार्थमत्रैव अनया समर्च्यमानम् आ शापावसानात् तिष्ठतु" इति। इत्यमशरीरां वाचं निशम्य, दृष्ट्वा चैतत् ज्योतिरुदितं, पत्रलेखावर्ज्जं सर्वास्ताः सुविस्मिता आसन्।

सा तु पत्रलेखा तस्य ज्योतिषः तुहिनशीतेन स्पर्शेन प्राप्तचेतना उत्थाय उन्मत्ता इव वेगात् प्रधाविता—"विना वाहनं सुदूरमुपगते देवे चन्द्रापीडे, त्वं पुनरेकाकी क्षणमपि अत्रावस्थातुं नार्हसि" इति कथयन्ती, अश्वपालहस्तात् इन्द्रायुधं प्रगृह्य सहसैवाच्छोदसरसि निममज्ज। क्षणान्तर एव सरस उत्तिष्ठन् स मुनिकुमारः कपिञ्जलो महाश्वेतया दृष्टः; प्रणम्य च पृष्टः सर्व्वं वृत्तान्तमशेषतः समकथयत्,—"देवि! तदा मम सुहृदेहं उत्क्षिप्य नीते, "कं देशं मे सखायं नयसि?" इति वदन् तमनुसरन्नहं तेनैव महापुरुषेण चन्द्रलोकं गतः; तत्र महोदयाऽऽख्यायां सभायां चन्द्रकान्तमणिमये शयनीये तद्देहं संस्थाप्य सोऽवदत्,—'कपिञ्जल! अवेहि मां चन्द्रमसम्। सखा ते कामार्त्तः,—'यत्त्वं मां निपीडयसि भृशं करैः, तस्मात्त्वमपि अहमिव जन्मनि जन्मनि मर्त्त्यं भावं प्राप्य, एवमेव तीव्रतमां विरहव्यथामनुभूय प्राणान् त्यक्ष्यसि' इति मां निरागसं शशाप। श्रुत्वैतच्छापवचनमकृताऽऽगसि मयि, भृशं कुपितोऽहमस्मै प्रतिशापमदां,—'भव मत्समानसुखदुःखस्त्वमपि' इति। तदनु मम महाश्वेताव्यतिकरोऽस्य विदितः। असौ च मन्मयूखजातात् अप्सरसः कुलात् सम्भूतायाः गौर्य्याः समुत्पन्ना, तया च अयं स्वयमेव पतित्वेन वृतः। शापदोषादस्मात् स्वकृतादेवासौ भुवि मया सह द्विर्जनिष्यते,—येन च 'जन्मनि जन्मनि' इति तव सुहृदुक्ता वीप्सा चरितार्था स्यात्। तत्तस्य शरीरमिदमाशापान्तात् मया रक्षितं मदीय एव लोके तिष्ठतु। आचक्ष्व चास्य पित्रे वृत्तान्तमिमं, सोऽपि महाप्रभावः यदत्र क्षेमं, तत् कुर्य्यात्'। एवमुक्तः सद्य एवास्य पितृसमीपं गच्छन्तं शाकविवशं त्वरया प्रमादतः कृतोल्लङ्घनः कोऽपि विमानविहारी क्रोधनः पथि मामशपत्,—'यस्मात् अतिप्रशस्तेऽपि नभोमार्गे

वाजीव मामुल्लङ्घ्य त्वरया यासि, तस्मात् त्वं वाजी भूत्वा मर्त्य-लोकं याहि' इति। अहन्तु सबाष्पनेत्रः प्रणतस्तमवोचं,—'भगवन्! अज्ञानात् सुहृद्व्यसनदुःखेन गच्छतो मे सुहृदिष्टार्थं व्यग्रस्य अपराधमिमं क्षमस्व, शापमिमं कृपया प्रतिसंहर' इति। स तु,—'नैव मे वचनमन्यथा भवेत्, तत्तव प्रणत्या तुष्टोऽहं तथा विधास्यामि, यथा,—यस्य वाहनं भविष्यसि, तस्यान्ते जलमज्जनेन ते शापान्तः' इति। एवमभिहितः पुनरहमवोचम्;—'भगवन्! तेन मे प्रियसुहृदा, चन्द्रेण साद्धं शापवशात् मर्त्यलोके जनिष्यते, तत् भगवान् एवमनुगृह्णातु मां,—यथा अश्वजन्मनि अपि मे वयस्येन समं वियोगो मा भूत्' इति। स तु क्षणमिव ध्यानस्तिमितलोचनः पुनरुवाच,—'अनेन ते मित्रानुरागेण द्रवीकृतं मे चित्तम्; दृष्टञ्च मया उज्जयिन्यां तारापीड़स्य राज्ञः पुत्रत्वमवाप्स्य सुधाकरेण, पुण्डरीकेणापि शुकनासाऽऽख्यस्य तदमात्यस्य; त्वमपि सख्युस्ते मित्रस्य चन्द्रात्मनः राजतनयस्य वाहनरूपेण स्थितस्तत्रैव सुहृत्सङ्गं लप्स्यसे' इति। अथ सद्य एवाहं जलधौ न्यपतम्, अश्वो भूत्वा उदातिष्ठञ्च, स्मृतिशक्तिस्तु मे नापगता,—येन एतदश्वमेव तुरङ्गमुखमिथुनानुसारेण युवराजो वाहनेन मया एतद्देशमानीतः; यश्चासौ अज्ञानात् भवत्या शापानलेन भस्मीकृतः, सोऽपि मे प्रियसुहृदः पुण्डरीकस्यैव अवतारः पूर्व्वजन्मसम्भूतात् अनुरागसंस्कारादेव त्वयि साभिलाषः अभवत्" इति।

श्रुत्वा चैतत् महाश्वेता, द्वितीयजन्मन्यपि अविस्मृतमहाश्वेताऽनुरागं वैशम्पायनमेव स्वाप्रियतमं पुण्डरीकं ज्ञात्वा, तथा आत्मानमेव तस्य हन्त्रीं निश्चित्य, मुक्तकण्ठं सारस्ताड़न विविधं विलपन्ती क्षितौ आत्मानं पातयामास। कपिञ्जलस्तु सानुकम्पं बहुविधाऽऽश्वासवचनैस्तां सान्त्वयामास। अथ किञ्चिदुप-

शान्तायां महाश्वेतायां, विषण्णवदना कादम्बरी तमपृच्छत्,—"भगवन्! कपिञ्जल! त्वया अश्वरूपिणा सहैव पत्रलेखा जलं प्राविशत्, सा क्व गता?—अस्ति काचिद् वार्त्ता तस्याः?" इति। "जलमज्जनानन्तरं न जानेऽहं कदानीं चन्द्रापीडस्य आत्मा, पुण्डरीकात्मकस्य वैशम्पायनस्य च जन्म, का वा तस्या वार्त्ता इति; तत् यामीदानीं मुहूर्त्तपितुः पार्श्वं सर्व्ववृत्तान्ता-वगमाय" इत्युक्त्वा तस्मिन्नन्तर्हिते, सा देवी कादम्बरी समा-श्वस्तमनाः दिव्यैर्विचित्रैः कुसुमादिभिरत्यादरेण युवराजदेह-मर्चयन्ती तं दिनमतिवाह्य, अन्येद्युस्तथैव दिव्याङ्गमविकृतं दृष्ट्वा सविस्मया समाश्वस्ता च सख्यै मदलेखायै अदर्शयत्। सा च प्रमुदिता आसीत्।

ततस्तदनुगामिनः विषादलुप्तप्रतिपत्तीन् राजलोकान् आकार्य्य, कादम्बरी निखिलं तद् वृत्तं तेभ्यः निवेद्य तं देहं सन्दर्शयामास। दृष्ट्वा च ते सुविश्वस्तास्तां प्रशशंसुः,—"देवि! त्वत्सम्बन्धादेतत् सर्व्वं शुभोदर्कं सम्पत्स्यते" इति। अपरेद्युश्च चन्द्रापीडस्य पुनर्जीवने सञ्जातप्रत्यया सा,—"सखि! इममपूर्व्व-वृत्तान्तं पितरं मातरञ्च गत्वा विज्ञापय,यथा तौ मदीयेन दुःखेन न दुःखितौ तिष्ठतः, यथा च अत्र आगत्य मामेवंविधां न पश्यतः, तथा करिष्यसि" इत्युक्त्वा मदलेखां प्रेरितवती। गत्वा च सा प्रत्यावृत्त्य,—"सखि! सिद्धं ते समीहितम्" इत्युक्त्वा चित्ररथ-सन्देशं तां व्यजिज्ञपत्। अत्रान्तरे कादम्बरी राज्ञस्तारापीडस्य चरान् प्राप्तान् निशम्य मेघनादात्, आनाय्य तान्, दर्शयित्वा च तद्देहं, निवेद्य च सर्व्वं वृत्तान्तं, कुमारस्य उपरतिवार्त्तां प्रका-शयितुं निषिध्य च,'दृष्टोऽस्माभिः अच्छोदसरसि स तिष्ठति' इति वक्तुमुपदिश्य च, तैः सह त्वरितकं नाम कुमारसेवकम् उज्ज-यिनीं प्राहिणोत्। आगत्य ते उज्जयिनीं, राजानं राज्ञीञ्च व्यक्त-

मूचुः,—"दृष्टोऽस्माभिरच्छोदसरस्तीरे युवराजः, शेषन्तु अस्मात् त्वरितकात् शृणुतम्" इति।

अथ राजा तस्मात् सर्व्वं वृत्तान्तमाकर्ण्य कष्टं विस्मय-करञ्चावगत्य सपरिवारस्तत्रायासीत्। आगत्य च तद्देह-मविकृतं तथैव दृष्ट्वा कादम्बरीप्रभावात् सर्व्वं शुभोदर्कममन्यत। आगतं नरेन्द्रं श्रुत्वा "हा! हतास्मि" इत्यभिदधाना ह्रिया धावित्वा महाश्वेता गुहाऽभ्यन्तरं, देवी च कादम्बरी तूष्णीमिव मोहान्धकारमभजेताम्। राजा तदवस्थं सुतं शोचन्तीं स्वां प्रियां विलासवतीमुवाच,—"देवि! साम्प्रतं खेदोऽयुक्तः, सान्त्वय वत्सां कादम्बरीं स्नुषां मे मोहगतां, यत्प्रभावात् सुतदेहमद्यापि पूर्व्ववदविकृतं पश्यामः"। अथ सा राज्ञी तामुत्सङ्गे निधाय, परिमृज्य मुखं, निवार्य्य च वाष्पौघमवादीत्,—"वत्से! भाग्यात् तेऽहमद्यापि पश्यामि वत्सं, त्यजाम्ब! मोहम्"। एवमाश्वासिता सा चन्द्रापीडनामोच्चारणेन विलासवतीदेहस्पर्शेन च लब्धचेतनाऽपि लज्जानम्रमुखी परवत्येव यथाक्रमं श्वश्रूश्वशुरादीनां गुरूणां चरणौ नत्वा विलासवत्याः पार्श्वे भेजे। ते च—"वत्स! अविधवा भव" इति तामाशासत। अथ राजा सभार्य्यः मन्त्रिणा शुकनासेन सह तां स्नुषां तद्देहपरिचर्य्यायै पूर्व्ववत् नियुज्य तपस्तप्तुमुपचक्रमे"। जावालिरित्थं सद्वृत्तान्तं सर्व्वं सर्व्वान् मुनीन् श्रावयित्वा अवदत्,—"पश्यत, सोऽयं कामोपहतचेताः, स्वकृतादेव अविनयात् दिव्याल्लोकात् भ्रष्टः पुण्डरीकः मर्त्त्येऽस्मिन् वैशम्पायननामा शुकनासपुत्रः अभवत्। स एव एषः पुनः निजाऽऽचरितेनैव दुर्व्यवहारेण चाञ्चल्यदोषाच्च कोपितस्य पितुः महाश्वेतायाश्च शापात् शुकतामगात्" इति।

अथ शुकः शूद्रकमाह,—"राजन्! मुनौ तस्मिन् मदीयं

वृत्तं कथयति, मम तत्क्षणमेव जन्मद्वयान्तरस्मृतिराविरासीत् । ततः च सुहृदादीनां महाश्वेतायाश्च कृते उत्सुकचेताः, स्वाविनयश्रवणलज्जया आनतशिरा विलीयमान इव शनैः शनैः अवोचं तमहं महर्षिं प्रणतः,—'भगवन् ! तत्रास्ति मे जिगमिषा, यत्र मे सखा मदीयेन विरहेण स्फुटितहृदयः पञ्चत्वमगात्' । स तु किञ्चित् कुपित इव मामवदत्,—"दुरात्मन् ! नाद्याप्यपगच्छति ते चाञ्चल्यम् ? गमनक्षमो भूत्वा गमिष्यसि, तावत् सुखमत्र तिष्ठ" इति । मम तु महाश्वेतायामनुरागः, चन्द्रापीडे च तत् सौहृद्यं पूर्व्ववदेव मनसि स्थानमाप, तेन तयोरुभयोः सकाशं गन्तुं मनो मे नितरामुत्कण्ठितमभूत् ।

अथ हारीतः कुतूहली पितरमपृच्छत्,—"तात ! कस्मादसौ मुनिसुतोऽपि तथा कामाधीनः सञ्जातः, येन जीवनमपि धारयितुं नाशक्नोत् ? कथं वा दिव्यलोकसम्भूतोऽपि तथा स्वल्पायुरासीदिति ?" पिता तमब्रवीत्,—"वत्स ! स्पष्टमेव अत्र कारणम् ; कामरागमोहमयात् अल्पसारात् स्त्रीवीर्य्यात् केवलादुद्भूतिः । श्रुतिरपि एवमस्ति,—'यादृशात् वै जायते, तादृगेव भवति' इति" । एवं कथाः समाप्य सर्व्वान् मुनीन् विसर्ज्य च रात्रावसाने स्वयं स्नानाय उदचलत् । मुनिपुत्रोऽपि मां शयने संस्थाप्य प्रातःकृत्यसम्पादनाय गतः । इत्थमापदां स्मरणेन व्यथितं 'किं करोमि इदानीम्' इति च चिन्तयन्तं मामभ्येत्य स्मेराननः हारीतोऽब्रवीत्,—"भ्रातर्वैशम्पायन ! दिष्ट्या वर्द्धसे, त्वामन्विष्यन् पितुस्ते भगवतः श्वेतकेतोः सकाशात् कपिञ्जलः प्राप्तः" इति । श्रुत्वैतत् विवशत्वात् "मां तत्र नय, यत्राऽऽस्ते स मम पूर्व्वः सखा" इति वदन्नेव समीपमुपगतं तं चुम्बितुमिच्छन्निव आश्लिष्यन्, गद्गदिकारुद्धरवः सुदीनया वाचा अव-

दम्, —"सखि! जन्मद्वयात् परमद्य तव दर्शनं प्राप्तं, विमुखे विधौ सर्व्वाणि अभिलषितानि विमुखान्येव भवन्ति प्रायेण"। सोऽपि मामुत्तोल्य मद्वियोगदुःखदुर्बले वक्षसि निवेश्य गाढमालिङ्ग्य च, मच्चरणौ स्वशिरसि निधाय भृशरोदनश्चक्रन्द, ममाश्वासयामास च हृद्यैर्वचोभिः।

अथ पितुः कुशलं पृष्ट्वा,—"मद्वार्त्तामाकर्ण्य पिता किमुक्तवान्, कुपितो न वा ममोपरि?" इति अपृच्छम्। ततस्तेन "आवयोः सर्व्वं वृत्तान्तं पित्रा ते विज्ञाय, विमुखं दैवञ्च ते प्रशमयितुं कर्म्माऽऽरब्धं, माता च लक्ष्मीस्तत्र व्यापृता; ताभ्याञ्चैतत् समादिष्टं,—'अत्रैवाऽऽश्रमे आ कर्म्मसमाप्तेर्वस, चाञ्चल्यं मा गाः, अचिरेण शुभं भावि' इति। अधुना यास्याम्यहं पितुस्ते पार्श्वम्, इतः कुत्रापि न यातव्यम्, अहमपि तत्रैव कर्म्मणि व्यापृत एव" इत्युक्त्वा गते तस्मिन्, अहं कतिपयान् दिवसान् तत्रैवाऽऽश्रमेऽतिष्ठम्। एकस्मिन् दिवसे महाश्वेतानिमित्तं समुत्कण्ठितचेताः आत्मानं समर्थं मत्वा 'तत्सकाशं गत्वा तिष्ठामि' इति निश्चित्य उत्तरां दिशं गृहीत्वा नभसि उदपतम्; श्रान्तश्च कियन्तमध्वानमुड्डीय, कस्यचित् तरोर्मूले निपत्यास्वापम्। चिरात् प्रबुद्धश्च आत्मानं पाशबद्धं दृष्ट्वा सुदुःखितः पुरतः स्थितमन्त्यजमेकं सुदीनया वाचा अब्रवं,—'भद्र! कस्त्वम्? कथं मां पाशबद्धं कृतवानसि? यदि आमिषपिपासा त्वा बाधते, तत् किं सुप्तस्यैव मे जीवननाशं न अकार्षीः? मया पुनः प्रियजनदिदृक्षासमुत्कण्ठेन दूरं यातव्यम्; न विलम्बं सहते मे हृदयं, मुञ्च मां, किं निरपराधेन मया बन्धनक्लेशमनुभावितेन? मम प्राणत्राणात् ते कुशलं भवतु' इति। स्मित्वा असौ प्रत्यब्रवीत्,—'महाभाग! दासोऽस्मि, का मम शक्तिर्भवतस्त्राणे? मद्भर्त्तुः शवराधिपतेः पुत्री कुतूहलिनी

अस्ति पक्षिपोषणे । तस्याः श्रुतिपथं नीता केनापि दुष्टेन वार्त्तैषा यत्—'जाबालेराश्रमे अस्त्यतिगुणवान् कोऽपि शुक-शिशुः' इति तमादातुं बहवोऽनुचरास्तया प्रेषिताः, मया तु लब्धोऽसि, साम्प्रतं तत्सकाशं त्वां नयामि, सैव तव बन्धने मोक्षणे च अधिकारिणी' इति । अहन्तु तदाकर्ण्य वज्रताडित इव शिरसि, भृशम् उद्विग्नान्तःकरणः भूयोऽपि सविनयं तमवदं,—'भद्र ! जातिस्मरोऽहं मुनिपुत्र आसं, तदस्मात् शवरसंसर्गात् मां परित्राय धर्म्मसञ्चयं कुरु, त्यज माम्' इत्युक्त्वा तस्य पादयोरपतम् । स तु मद्वचनमनादृत्य निर्भर्त्स्य च मां गृहीत्वा पक्कणाभिमुखं प्रस्थितः ।

अथ तेन उपानीतं मां दृष्ट्वा हसितमुखी शवरदुहिता तत्करात् मामादाय,—'पुत्रक ! प्राप्तोऽसि, यास्यसि क्वेदानीम् ? व्यपनयामि ते कामचारित्वं दुराचार !' इत्युक्त्वा अमेध्ये पञ्जरान्तरे निवेशयामास । 'धिक् पुण्डरीक ! यत्त्वं मुनितनयत्वमपास्य एतां दशां प्राप्तोऽपि पुनः चण्डालस्य पाणौ पतितः !! युक्तमिदं ते दुर्विनीतस्य मूढ़ !' इत्थं स्वाऽऽत्मानं बहुशो निन्दन्, —'नैवाहमालपामि ; अनालपतो मे मोक्षो भवेत् ; अथवा नाश्नामि, न पिबामि ; एवं कुर्व्वन् सत्वरं निन्द्यामेतां तनुं परित्यक्ष्यामि' इति निश्चित्य तूष्णीमासम् ।

अथ तया चाण्डालदारिकया आलप्यमानोऽपि, तुद्यमानोऽपि, पुनः पुनः पानाशनार्थम् अनुरुध्यमानोऽपि न किञ्चिदहमगृह्णां, केवलं बहुशः चीत्कारमकरवम् । ततस्तया प्रोक्तं,—'किमेतत् न पिबसि ?—न चाश्नासि ?—नास्ति फले कश्चिद् दोषः, जलं चाण्डालभाण्डादपि भूवि पतितं न दोषाय । यदि तेऽत्र विचिकित्सा, तत् कथमिमां दशां प्राप्तोऽसि ? अग्रतस्तथा विमृश्य प्रवर्त्तितव्यं,—यथा नानुतप्येत' इति । अहन्तु चण्डालजात्य-

सद्दर्शन तस्याः तेन वाक्येन विवेकेन च विस्मितः, तद्वाक्यं तदानीं युक्तं मन्यमानः जीवितदृष्णया तानि फलानि अभक्षयम्, अपिबञ्च सलिलम् ; परं मौनन्तु न अमुञ्चम्। इत्थं कियन्तं कालं नयन्तं, क्रमेण च तरुणत्वमापन्नं, सहसैकदा प्रत्यूषे तत् पक्कणाख्यं चाण्डालपुरम् अपर दिव्यलोकमिव,तां चाण्डालदारिकां रूपिणीं लक्ष्मीमिव, तच्च स्वं पञ्जरं सौवर्णं दृष्ट्वा।नवृत्तचण्डालवासवसतिदुःखम्, अतीव विस्मितं, 'चित्रम्!! एतत् किम्?' इति प्रष्टुमुद्यतञ्च मां समादाय सा कन्या भवत्पार्श्वमायाता। तत् केयम्?—कथमसौ आत्मानं चाण्डालत्वेन ख्यापितवती?—कथं वा माम् अबध्नात्?—कथं वा अत्र आनीतवती? तत् भवानेव इमां पृच्छतु" इति।

अथ नृपेण शूद्रकेण पृष्टा सा विस्मृतनिजरूपं तं, निजं रूपं स्मारयामास,—"तारापते! त्रैलोक्याऽऽनन्द! रोहिणीकान्त! कादम्बरीहृदयवल्लभ! चन्द्र! सत्वरायमनं त्वमवगच्छ। अस्य स्वस्य च पूर्व्वजन्मवृत्तान्तम् आकर्णितवान् एव भवान्। अत्रापि जातौ कामान्धः अयं दुर्वृत्तः, निवारितोऽपि पित्रा, तच्छासनमनादृत्य वधूसमीपं प्रस्थितः; तदप्यसौ स्वयमेव अकथयत्। 'आ शापमोचादेनं बद्धा रक्ष,—यथाऽनुतापः स्यात्' इति अस्य पिता मामादिशत्, ततो मया बद्धोऽयम्, एतावन्तं कालं रक्षितश्च। अहमस्य माता श्रीः, भवत्सकाशमेनमनयम्। सम्प्रति भवतोः शापान्तसमय उपस्थितः, शापान्ते च युवयोः सममेव सुखेन भवितव्यम्, इति मयाऽयमत्राऽऽनीतः। जनसमागमपरिहारायैव आत्मनश्चण्डालत्वं प्रकटीकृतम् ; तदिमे जन्मजराव्याधिमरणाऽऽदिदुःखभूयिष्ठे निन्द्ये तनू त्यक्त्वा, अनुभूयतां युवाभ्यां दिव्यलोकोचितमभिलषितम् इष्टजनसमागमसुखम्" इत्यभिधाय सा सद्य एव तिरोदधे। ततः स नृपतिः सपदि

कादम्बरीं स्मरन्, तद्विरहानलसन्तप्तः परां कामवशता-मवाप्य शूद्रकदेहं तत्याज ; शुकोऽपि महाश्वेताविरहेण तनुं विजहौ ।

अथ माधवे एकस्यां निशायां देवी कादम्बरी कामार्त्ता, मकरकेतोः परमास्त्रेण वसन्तेन उत्कण्ठितमानसा, कामदेवस्य महोत्सवे कृच्छ्रेण अतिवाहितदिवसा, सायाह्ने सम्पादित-कामार्च्चना निजं कान्तं चन्द्रापीडं विचित्रकुसुममाल्यैः, चन्द-नेन, विचित्रैः रत्नैश्च भूषितं कृत्वा निर्निमेषा आपिवन्तीव प्रेमाऽऽर्द्रया दृष्ट्या, पुलकितसर्व्वाङ्गी, धैर्य्यं धारयितुमशक्नुवती सहसा तस्योपरि पतित्वा जीवन्तमिव तं गूढमालिलिङ्ग । आलि-ङ्गितश्च तया असौ सुप्तोत्थित इव सहसा संज्ञां प्राप्य, अतिहर्षेण तां दोर्भ्यां भृशमालिङ्गन्, भीतामालोक्य प्रियां श्रुतितर्पणेन स्वरेण प्रहर्षयन् प्रोवाच,—"भीरु ! विहाय शङ्काम् आकल्पं मया सार्द्धं विहर । उज्जीवितोऽस्मि तवैव अमुना अमृतसंकाऽऽह्लादिना कण्ठग्रहेण । उक्तमेव मया पूर्व्वं, यत्—एतदाविनाशि शरीरं, विशेषतस्तव करतलस्पर्शात् ; एतावन्त्यपि दिनानि त्वया करेण स्पृश्यमानोऽपि यत् न उज्जीवितोऽस्मि,—तत् शापप्रभा-वात् ; अद्य तु अपगतः स शापः, अतः सम्प्रति ते समालिङ्ग-नात् प्रबुद्धोऽस्मि । शापात् यत् मया मर्त्त्यशरीरं शूद्रकाऽऽख्यं प्राप्तं, तत् त्यक्तं शापावसानात् । तव प्रीत्या वपुरेतत् चान्द्रे लोकेऽपि ममास्ति । तदयं लोकः चन्द्रलोकश्च द्वावपि ते पाद-तललग्नौ विद्धि । तव सख्याः पतिः पुण्डरीकोऽपि मदीय एव लोके तिष्ठति, सोऽपि मयैव सह विगतशापः सञ्जातः, क्षणेनैव तेन सङ्गंस्यते महाश्वेता" इति ।

अत्रान्तरे नभसः कण्ठेन तामेवैकावलीं बिभ्रत्, तेनैव सख्या कपिञ्जलेन सह विरहक्षामः, स पुण्डरीकः अवतरन्

अदृश्यत। दूरत एव तमवलोक्य सा कादम्बरी स्वयमेव धावित्वा यावत् महाश्वेतां पुण्डरीकागमनवार्त्ताकथनमहोत्सवेन न संवर्द्धयति, तावत् पुण्डरीक आगच्छन् चन्द्रापीड़मुपजगाम। चन्द्रापीड़स्य सखायमेनं कण्ठे जग्राह, जगाद च,—"सखे! यदि चैतद्दपुर्योगात् जामाताऽसि, तथाऽपि अनन्तरजन्मा-ऽऽहितेन आकल्पं सखिभावेनैव मयि वर्त्तस्व" इति।

अथ केयूरकः तत्क्षणं चित्ररथं हंसञ्च आवेदयितुं, मद-लेखा च तारापीड़ं विलासवतीञ्च संवर्द्धयितुमगाताम्। राजा सुतप्रत्युज्जीवितं तेन मन्त्रितनयेन साकं निशम्य, आनन्दाब्धौ पतितमात्मानममन्यत। "क्वासौ? क्वासौ?" इति पुनः पुनः तां पृच्छन्, समुत्थितः सभार्य्यः स्वेन मन्त्रिणा सार्द्धं तनयदर्शनाय सद्यः समाजगाम। चन्द्रापीड़ः पितरमागतं मातरं शुकनासञ्च दृष्ट्वा, भूतलनिहितमौलिः पादावेतेषां ववन्दे। अथ सत्वरमागम्य तथा प्रणतं तमुत्थाप्य पित्रा,—"यद्यपि पुत्रस्त्वमद्य सञ्जातः, तथाऽपि चन्द्रमसं देवं त्वां जाने, अपि च मयि योऽयः नमस्यः आसीत्, सोऽपि मया त्वयि निधापितः; तत् उभयथाऽपि त्वमेवासि सर्व्वेषां नो वन्द्यः" इत्येवमुक्तः, मात्रा च प्रस्नुतस्तन्या वात्सल्यात् परिष्वक्तः, मन्त्रिणा आशीःसहस्रेण संवर्द्धितश्च लज्जानम्राऽऽननं पुण्ड-रीकं करे गृहीत्वा उपसृत्य यथाक्रमं शुकनासं मनोरमाञ्च आबभाषे,—"तात! वैशम्पायन एषः वः प्रणमति, गृहाण तनयं स्वम्" इत्येवमु[illegible]चिवं स कपिञ्जलः किञ्चित् वृत्तमुक्त-वान्,—"मन्त्रिन्! [illegible]ान् महर्षिः श्वेतकेतुर्भवन्तं प्राह,—'यद्यप्ययं मम [illegible] [illegible]ापावमुक्तो मयैव ग्राह्यः, तथाऽपि संवर्द्धित एवायं के[illegible], पुत्रस्तु तव एव। मया मत्तेजोऽत्र संस्थाप्य ब्राह्मे [illegible] प्रक्रान्तं, तत् त्वयाऽयं वैशम्पायन

एव इति मत्वा अविनयात् रक्षणीयः, न चोपेक्षणीयः परोऽय-मिति कृत्वा, तवैवायम्, अद्यापि भवतु एव बद्धस्नेह एषः' इति। अथासौ मन्त्रिवर्य्यः तं तनयं पुण्डरीकं वैशम्पायनमेवेति बुद्ध्वा पर्य्यष्वजत, अभवच्च स्नेहाऽऽकुलः पूर्व्वतोऽपि समधिकम्। महा-श्वेता च तं पुण्डरीकमासाद्य भृशं मुमुदे। सोऽप्येनां लज्जा-नम्रवदनामङ्के कृत्वा नितरां हर्षमाययौ। तौ च हंसचित्ररथौ मदिरागौरीभ्यां सकलगन्धर्व्वलोकेन च तत्र समागत्य जामातृ-दर्शनात् मुदितौ, सपरिजनयोः तारापीड़शुकनासयोः अनु-मतौ स्वां स्वां पुरं कन्याजामातरौ नीत्वा, यथावत् परिणय-विधिं सम्पाद्य च, स्वं स्वं राज्यमनयोः यौतकमुपाहरताम्। एवं तौ पुण्डरीकचन्द्रापीड़ौ अभिमतरमणीमङ्गमुदितौ प्रणय-परवशौ च चक्रवाकाविव सुखेन कालं निन्यतुः।

अथैकदा देवी कादम्बरी पत्रलेखाऽर्थं साश्रुनयना विषण्ण-मुखी भर्त्तारं प्राह,—"देव! वयं सर्व्व एव मृता अपि पुन-र्जीविताः, परस्परं सम्मिलिताश्च; सा पुनः वराकी तव साङ्गनी पत्रलेखा क्व गतेति महत् कौतुकं मे; तद् ब्रूहि तस्या वृत्तान्तम्" इति। चन्द्रापीड़ः प्राह,—"प्रिये! सा हि रोहिणी, शप्तं मां ज्ञात्वा मद्दुःखदुःखिता 'कथं त्वमेकाकी एव मर्त्त्यवासदुःख-मनुभवसि?' इत्युक्त्वा निवार्य्यमाणाऽपि मया मत्परिचर्य्यार्थं मर्त्त्यलोकेऽवातरत्। मान्तु विरतं दृष्ट्वा सा स्वं धाम प्रपेदे। पुनर्मया सह मर्त्त्यलोके स्थातुमिच्छन्त्यपि मया निर्भर्त्स्य बलात् निवारिता; मदीये लोके तां द्रक्ष्यसि। अयं लोकः मदीयश्च लोकः सम्प्रति त्वदधीन एव" इति। कादम्बरी तु रोहिण्याः तथा पतिव्रततया उदारतया स्नेहलतया च विस्मिता परं लज्जिता च तूष्णीं तस्थौ।

एवं प्रियां परितोष्य गन्धर्व्वपुरे कतिपयान् दिवसान्

स्थित्वा, ततः पितरमुपेत्य समकालमेव अनुभूतदुःखं राजलोकं विभूत्या स्वसमं कुर्व्वन्, सख्यौ पुण्डरीके राज्यभारं निधाय राजप्रीत्या जन्मभूमिस्नेहाच्च अवन्त्यां, रोहिणीप्रीत्या चान्द्रे लोके, गन्धर्व्वराजगौरवेण च हेमकूटे, पुण्डरीकप्रीत्या लक्ष्मी-निवाससरसि, कादम्बरीरुच्या च तेषु तेषु रम्यतरस्थानेषु विहरन् न केवलं चन्द्रमाः कादम्बर्य्या सह, कादम्बरी महाश्वेतया, महाश्वेता पुण्डरीकेण, पुण्डरीकोऽपि चन्द्रमसा सह परस्परावियोगेन कालं नयन्तः परमां प्रीतिमवापुः।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचितः

उत्तरकादम्बरीकथासङ्ग्रहः।

समाप्तोऽयं ग्रन्थः।

शुद्धिपत्रम् ।

पृष्ठा	पङ्क्ति	अशुद्धि:	शुद्धि: ।
६	४	अर्गीचत	अगाचयत् ।
”	११	आगच्छत्	आगच्छन्तम् ।
”	२२	गांमिष्यन्ते	गंस्यते ।
४	१०	प्राप्त	भूते ।
१२	४	तेनानुमत:	तस्यानुमत: ।
१३	३	साहाय्यकत्व	साहाय्यकाय ।
१५	११	महमत्त्वतया	महामत्त्वतया ।
२३	१९	अदृदृदृकार्ञलिम्	अदृदादृदकार्ञलिम ।
२४	१	तातं	तताय ।
२४	२३	मौनमतिष्ठत	मौनी अतिष्ठत् ।
२५	१७	पृकेव आज्ञया गुर्गोजंगं	पृक: आज्ञया गुर्गोजंगामिव ।
२८	४	गांमिष्यन्ते	गंस्यते ।
५१	१०	वृत्तान्तस्योपलब्धिर्भवत्”	वृत्तान्तोपलब्धिर्भवत” ।
५४	२३	असं पित	अस्य पितं ।
”	२४	शाक	शोक- ।

प्रकाशक— पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न ।

प्राप्तिस्थान— २ नं०, रमानाथ मजुमदार ष्ट्रीट्, ह्यारिसन-
रोड—पोष्ट अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।

२ नं०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।